अमरकोषः ।

श्रीमदमरसिंहविरचितः ।

पण्डितकुलपतिना
वि, ए, उपाधि-धारिणा
श्रीजीवानन्द-विद्यासागर-भट्टाचार्य्येण
संस्कृतः प्रकाशितश्च ।

तृतीयसंस्करणम्

कलिकातानगर्य्याम्
सिद्धेश्वरयन्त्रे
मुद्रितः ।

मूं १८०० ।

প্রকাশক—শ্রীজীবানন্দবিদ্যাসাগর বি, এ।
২নং রমানাথ মজুমদারের ষ্ট্রীট্, কলিকাতা।

প্রিণ্টর—শ্রীসিদ্ধেশ্বর পান।
৩৮নং শিবনারায়ণ দাসের লেন, কলিকাতা।

सूचीपत्रम्

विषयः	पृष्ठा
स्वर्गवर्गः	१
पातालवर्गः	२६
भूमिवर्गः	३२
पुरवर्गः	३६
शैलवर्गः	३८
वनौषधिवर्गः	४०
सिंहादिवर्गः	५८
मनुष्यवर्गः	६२
ब्रह्मवर्गः	८२
क्षत्रियवर्गः	८६
वैश्यवर्गः	१०३
शूद्रवर्गः	११७
विशेष्यनिघ्नवर्गः	१२३
सङ्कीर्णवर्गः	१३७
नानार्थ कान्तवर्गः	१४३
खान्तवर्गः	१४६
गान्तवर्गः	१४६
घान्तवर्गः	१४७
ङान्तवर्गः	१४७
छान्तवर्गः	१४८
जान्तवर्गः	१४८
झान्तवर्गः	१४८
टान्तवर्गः	१४९
ठान्तवर्गः	१५०
डान्तवर्गः	१५०
ढान्तवर्गः	१५०
णान्तवर्गः	१५१
तान्तवर्गः	१५२
थान्तवर्गः	१५६
दान्तवर्गः	१५७
धान्तवर्गः	१५८
नान्तवर्गः	१५८
पान्तवर्गः	१६२
फान्तवर्गः	१६२
बान्तवर्गः	१६३
भान्तवर्गः	१६३
मान्तवर्गः	१६४
यान्तवर्गः	१६५
रान्तवर्गः	१६७
लान्तवर्गः	१७१
वान्तवर्गः	१७२
शान्तवर्गः	१७३
षान्तवर्गः	१७४
सान्तवर्गः	१७५
हान्तवर्गः	१७७
अव्ययनानार्थः	१७८
अव्ययवर्गः	१८०
लिङ्गादिसंग्रहवर्गः	१८४



पण्डितकुलपतिः

श्रीजीवानन्दविद्यासागर वि, ए,

PANDITA-KULAPATI

JIBANANDA VIDYASAGARA, B. A.

Superintendent, Free Sanskrit College, Calcutta.

अमरकोषः ।

स्वर्गवर्गः ।

यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः ।
सेव्यतामनघयोधीराः स श्रिये चामृताय च ॥ १ ॥
समाहृत्यान्धतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः ।
सम्पूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम् ॥ २ ॥
प्रायशो रूपभेदेन साहचर्य्याच्च कुत्रचित् ।
स्त्रीपुंनपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित् ॥ ३ ॥
भेदाख्यानाय न द्वन्द्वो नैकशेषो न सङ्करः ।
कृतोऽत्र भिन्नलिङ्गानामनुक्तानां क्रमाहते ॥ ४ ॥
त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने च द्वयोरिति ।
निषिद्धलिङ्गं शेषार्थं त्वन्ताद्यादि न पूर्वभाक् ॥ ५ ॥
स्वर् (अव्ययं) स्वर्ग नाक त्रिदिव त्रिदशालयाः ।
सुरलोको द्यौ दिवौ (द्वे स्त्रियौ) (क्लीबे) त्रिविष्टपम् ॥ ६ ॥
अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः ।
सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥ ७ ॥
आदितेया दितिसुता लेखा अदितिनन्दनाः ।
आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः ॥ ८ ॥
बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः ।
हरिद्वारका दैवतानि (पुंसि वा) दैवता (स्त्रियाम्) ॥ ९ ॥
आदित्या विश्ववसवस्तुषिताभास्वरानिलाः ।
महाराजिकसाध्याश्च (च) रुद्राश्च (च) गणदेवताः ॥ १० ॥

विद्याधरो ऽप्सरो यक्ष रक्षो गन्धर्व किन्नरा: ।
पिशाचो गुह्यक: सिद्धो भूतो (ऽमी) देवयोनय: ॥११॥
असुरा दैत्य दैतेया दनुजेन्द्रारिदानवा: ।
शुक्रशिष्या दितिसुता: पूर्वदेवा: सुरद्विष: ॥ १२ ॥
सर्वज्ञ: सुगतो बुद्धो धर्मराजस्तथागत: ।
समन्तभद्रो भगवान् मारजित् लोकजित् जिन: ॥१३॥
षडभिज्ञो दशबलो ऽद्वयवादी विनायक: ।
मुनीन्द्रो श्रीघन: शास्ता मुनि:
शाक्यमुनिस् (तु य:) ॥ १४ ॥
(स) शाक्यसिंह: सर्वार्थसिद्ध: शौद्धोदनिश् (च स:) ।
गौतमश् (चा) ऽर्कबन्धुश् (च) मायादेवीसुतश् (च स:) ॥१ ५
ब्रह्मात्मभू: सुरज्येष्ठ: परमेष्ठी पितामह: ।
हिरण्यगर्भो लोकेश: स्वयम्भुश्चतुरानन: ॥ १६ ॥
धाता स्रयोनिर्धिषणो विरिञ्चि: कमलासन: ।
स्रष्टा प्रजापति र्वेधा विधाता विश्वसृग् विधि: ॥ १७ ॥
विष्णुर्नारायण: कृष्णो वैकुण्ठो विष्टरश्रवा: ।
दामोदरो हृषीकेश: केशवो माधव: स्वभू: ॥ १८ ॥
दैत्यारि: पुण्डरीकाक्षो गोविन्दो गरुड़ध्वज: ।
पीताम्बरो ऽच्युत: शार्ङ्गी विष्वक्सेनो जनार्दन: ॥ १९ ॥
उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुज: ।
पद्मनाभो मधुरिपु र्वासुदेवस्त्रिविक्रम: ॥ २० ॥
देवकीनन्दन: शौरि: श्रीपति: पुरुषोत्तम: ।
वनमाली वलिध्वंसी कंसारातिरधोक्षज: ॥ २१ ॥
विश्वम्भर: कैटभजिद् विधु: श्रीवत्सलाञ्छन: ।
वसुदेवो (ऽस्य जनक: स एवा) नकदुन्दुभि: ॥ २२ ॥
बलभद्र: प्रलम्बघ्नो बलदेवो ऽच्युताग्रज: ।

रैवंतीरमणो रामः कामपालो हलायुधः ॥ २३ ॥
नीलाम्बरो रोहिणेयस्तालाङ्को मुषलो हली ।
सङ्कर्षणः सीरपाणिः कालिन्दीभेदनो बलः ॥ २४ ॥
मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः ।
कन्दर्पो दर्पको ऽनङ्गः कामः पञ्चशरः स्मरः ॥ २५ ॥
शम्बरारिर्मनसिजः कुसुमेषुरनन्यजः ।
पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः ॥ २६ ॥
ब्रह्मसूर्विश्वकेतुः (स्याद्) अनिरुद्ध उषापतिः ।
लक्ष्मीः पद्मालया पद्मा कमला श्री र्हरिप्रिया ॥ २७ ॥
इन्दिरा लोकमाता मा क्षीराब्धितनया रमा ।
(शङ्खो लक्ष्मीपतेः) पाञ्चजन्यश्
(चक्रं) सुदर्शनः ॥ २८ ॥
कौमोदकी (गदा)
(खड्गो) नन्दकः
कौस्तुभो (मणिः) ।
गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः ॥ २९ ॥
नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः ।
शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः ॥ ३० ॥
ईश्वरः सर्व ईशानः शङ्करश्चन्द्रशेखरः ।
भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः ॥ ३१ ॥
मृत्युञ्जयः कृत्तिवासाः पिनाकी प्रमथाधिपः ।
उग्रः कपर्दी श्रीकण्ठः क्षितिकण्ठः कपालभृत् ॥ ३२ ॥
वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः ।
कृशानुरेताः सर्वज्ञो धूर्जटि र्नीललोहितः ॥ ३३ ॥
हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः ।
गङ्गाधरो ऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः ॥ ३४ ॥

व्योमकेशो भवो भीमः स्थाणुः रुद्र उमापतिः ।
कपर्दी (ऽस्य जटाजूटः)
पिनाकी ऽजगवं (धनुः) ॥ ३५ ।
प्रमथाः (स्युः पारिषदा)
ब्राह्मी (त्याद्यास्तु मातरः) ।
विभूतिर्भूतिरैश्वर्य्यम् (अणिमादिकमष्टधा) ॥ ३६ ॥
उमा कात्यायनी गौरी काली हैमवतीश्वरी ।
शिवा भवानी रुद्राणी सर्वाणी सर्वमङ्गला ॥ ३७ ॥
अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका ।
विनायको विघ्नराज द्वैमातुर गणाधिपाः ॥ ३८ ॥
(अप्ये) कदन्त हेरम्ब लम्बोदर गजाननाः ।
कार्त्तिकेयो महासेनः शरजन्मा षड़ाननः ॥ ३९ ॥
पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः ।
बाहुलेयस्तारकजित् विशाखः शिखिवाहनः ॥ ४० ॥
षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः ।
इन्द्रो मरुत्वान् मघवा विड़ौजाः पाकशासनः ॥ ४१ ॥
हरिहयः सुनासीरः पुरुहूतः पुरन्दरः ।
जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः ॥ ४२ ॥
सुत्रामा गोत्रभिद् वज्री वासवो वृत्रहा वृषा ।
वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः ॥ ४३ ॥
जम्भभेदी हरिहयः स्वाराट् नमुचिसूदनः ।
संक्रन्दनो दुश्चवनस्तुराषाट् मेघवाहनः ॥ ४४ ॥
आखण्डलः सहस्राक्ष ऋभुक्षास्
(तस्य तु प्रिया) ।
पुलोमजा शचीन्द्राणी
(नगरी त्व) मरावती ॥ ४५ ॥

(हय) उच्चैःश्रवाः

(सूतौ) मातलि

नन्दनं (वनम्) ।

(स्यात् प्रासादौ) वैजयन्तौ

जयन्तः पाकशासनिः ॥ ४६ ॥

ऐरावती ऽभ्रमातङ्गैरावणाभ्रमुवल्लभाः ।

क्रकादिनौ वज्रम (ऽस्त्री स्यात्) कुलिशं भिदुरं पविः ॥४७॥

शतकोटिः स्वरुः शम्बो दम्भोलिरशनि (र्द्वयोः) ।

व्योमयानं विमानो (ऽस्त्री)

(नारदाद्याः) सुरर्षयः ॥ ४८ ॥

(स्यात्) सुधर्मा देवसभा

पीयूषममृतं सुधा ।

मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका ॥ ४८ ॥

मेरुः सुमेरुर्हैमाद्रिः रत्नसानुः सुरालयः ।

(पञ्चैते देवतरवो) मन्दारः पारिजातकः ॥ ५० ॥

सन्तानः कल्पवृक्षश्च् (च पुंसि वा) हरिचन्दनम् ।

सनत्कुमारो वैधात्रः

सर्वैद्यावश्विनीसुतौ ॥ ५१ ॥

नासत्यावश्विनौ दस्रावाश्विनेयौ (च तावुभौ) ।

(स्त्रियां बहुष्वप्सरसः सर्वेश्या उर्वशीमुखाः ॥ ५२ ॥

(हाहा हुहुश्चैवमाद्या) गन्धर्वाः (विदिवौकसां)

अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः ॥ ५३ ॥

कृपीटयोनिर्ज्वलनो जातवेदास् तनूनपात् ।

बर्हिः शुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः ॥ ५४ ॥

आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः ।

रोहिताश्वो वायुसखा शिखावानाशुशुक्षणिः ॥ ५५ ॥

हिरण्यरेता हुतभुग् दहनो हव्यवाहनः ।
सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः ॥ ५६ ॥
शुचिरप्पित्तं
और्वस् (तु) वाड़वो वाड़वानलः ।
(वह्नेर्द्वयो) ज्वालकीलावर्चिर्हेतिः शिखा (स्त्रियाम्) ॥५७॥
(विषु) स्फुलिङ्गोऽग्निकणः
सन्तापः संज्वरः (समौ) ।
धर्मराजः पितृपतिः समवर्त्ती परेतराड् ॥ ५८ ॥
कृतान्तो यमुनाभ्राता शमनो यमराड् यमः ।
कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः ॥ ५९ ॥
राक्षसः कौणपः क्रव्यात् क्रव्यादोऽस्रप आशरः ।
रात्रिञ्चरो रात्रिचरः कर्बुरो निकषात्मजः ॥ ६० ॥
यातुधानः पुण्यजनो नैर्ऋतो यातु रक्षसी ।
प्रचेता वरुणः पाशी यादसां पतिरप्पतिः ॥ ६१ ॥
प्रभञ्जनः सपर्णनो वायुर्मातरिश्वा सदागतिः ।
पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः ॥ ६२ ॥
समीरः मारुत मरुज् जगत्प्राण समीरणाः ।
नभस्वद् वात पवन पवमान प्रभञ्जनाः ॥ ६३ ॥
प्राणोऽपानः समानश् (चो) दान व्यानो (च वायवः ।)
शरीरस्था इमे)
रंहस्तरसी (तु) स्यः स्वदः ॥ ६४ ॥
जवो
(ऽथ) शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् ।
सत्वरं चपलं तूर्णमविलम्बितमाशु (च) ॥ ६५ ॥
सततेऽनारताश्रान्त सन्ततानिरतानिशम् ।
नित्यानवरताजस्रम (ऽथ्य)

(ज्या) ऽतिशयो भरः ॥ ६६ ॥

अतिवेलः भृशात्यर्थातिमात्रोद्गाढ निर्भरम् ।

तीव्रैकान्तमितान्तानि गाढ वाढ दृढ़ानि (च) ॥ ६७ ॥

(क्लीबे शीघ्राद्यसत्वे स्यात् विश्वेषां भेद्यगामि यत्) ।

कुबेरस्त्र्यम्बकसखो यक्षराड् गुह्यकेश्वरः ॥ ६८ ॥

मनुष्यधर्म्मा धनदो राजराजो धनाधिपः ।

किन्नरेशो वैश्रवणः पौलस्त्यो नरवाहनः ॥ ६९ ॥

यक्षैकपिङ्गैलविल श्रीद पुण्यजनेश्वराः ।

(अस्योद्यानं) चैत्ररथं

(पुनस्तु) नलकूबरः ॥ ७० ॥

कैलासः (स्थानम्)

अलका (पुर्)

(विमानं तु) पुष्पकम् ।

(स्यात्) किन्नरः किंपुरुषस्तुरङ्गवदनो मयुः ॥ ७१ ॥

निधि (र्नां) शेवधि

(भेदाः पद्मशङ्खादयो निधेः) ।

द्यो दिवौ (द्वे स्त्रियाव) ऽभ्रं व्योम पुष्करमम्बरम् ॥ ७२ ॥

नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम् ।

वियद् विष्णुपदं (वा तु पुंस्या) काश विहायसी ॥७३॥

दिशस् (तु) ककुभः काष्ठा आशाश् च हरितश् (च ताः) ।

प्राच्यवाची प्रतीच्यस् (ताः पूर्व दक्षिण पश्चिमाः) ॥७४॥

(उत्तरा दिग्) उदीची (स्याद्)

दिश्यं (तु विषु दिग्भवे) ।

इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत् ॥ ७५ ॥

कुबेर ईशः (पतयः पूर्वादीनां दिशां क्रमात्) ।

ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ॥ ७६ ॥

पुष्पदन्तः सार्वभौमः सुप्रतीकश्च (च दिग्गजाः) ।
(करिण्यो) ऽभ्रमुः कपिला पिङ्गलानुपमा (क्रमात्) ॥७७॥
ताम्रकर्णी शुभ्रदन्ती (चा) ऽङ्गना (चा) ऽञ्जनावती ।
(क्षौवाव्ययं त्व) ऽपदिशं (दिशोर्मध्ये) विदिक् (स्त्रियाम्)॥७८॥
अभ्यन्तरं (त्व) ऽन्तरालं
चक्रवालं (तु) मण्डलम् ।
अभ्रं मेघो वारिवाहः स्तनयित्नुर्वलाहकः ॥ ७९ ॥
धाराधरो जलधरस्तडित्वान् वारिदो ऽम्बुभृत् ।
घन जीमूत मुदिर जलमुग् धूमयोनयः ॥ ८० ॥
कादम्बिनी मेघमाला
(त्रिषु मेघभवे) ऽभ्रियम् ।
स्तनितं गर्जितं मेघनिर्घोषे रसिता (दि च) ॥ ८१ ॥
शम्पा शतह्रदा ह्रादिन्यैरावत्यः क्षणप्रभा ।
तड़ित् सौदामिनो विद्युत् चञ्चला चपला (ऽपि च) ॥८२॥
स्फूर्जथु (र्वज्रनिष्पेषो)
मेघज्योतिरिरम्मदः ।
इन्द्रायुधं शक्रधनुस्
(तदेव ऋजु) रोहितम् ॥ ८३ ॥
वृष्टिर्वर्षं
(तद्विघाते) ऽवग्राहावग्रहौ (समौ) ।
धारासम्पात आसारः
शीकरो (ऽम्बुकणाः स्मृताः) ॥ ८४ ॥
वर्षोपलस् (तु) करका
(मेघच्छन्नेऽह्नि) दुर्दिनम् ।
अन्तर्धा व्यवधा (पुंसि त्व) ऽन्तर्धिरपवारणम् ॥ ८५ ॥
अपिधान तिरोधान पिधानाच्छादनानि (च) ।

हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ॥ ८६ ॥
विधुः सुधांशु शुभ्रांशुरोषधीशो निशापतिः ।
अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः ॥ ८७ ॥
द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः ।
कला (तु षोड़शो भागो)
बिम्बो (ऽस्त्री) मण्डलं (विषु) ॥ ८८ ॥
भित्तं शकलखण्डे (वा पुंस्य) ऽर्धो
ऽर्धं (समेऽंशके) ।
चन्द्रिका कौमुदी ज्योत्स्ना
प्रसादस् (तु) प्रसन्नता ॥ ८९ ॥
कलङ्काङ्की लाञ्छनं (तु) चिह्नं लक्ष्म (च) लक्षणम् ।
सुषमा (परमा शोभा)
शोभा कान्तिर्द्युतिश्छविः ॥९०॥
अवश्यायम् (तु) नीहारस्तुषारस्तुहिनं हिमम् ।
प्रालेयं मिहिका (चा)
(ऽथ) हिमानो हिमसंहतिः ॥ ९१ ॥
शीतं (गुणे)
(तद्वदर्थाः) सुषीमः शिशिरो जड़ः ।
तुषारः शीतलः शीतो हिमः (समान्यलिङ्गकाः) ॥ ९२ ॥
ध्रुव औत्तानपादिः (स्याद्)
अगस्त्यः कुम्भसम्भवः ।
मैत्रावरुणिर
(ऽस्यैव) लोपामुद्रा (सधर्मिणी) ॥ ९३ ॥
नक्षत्रमृक्षं भं तारा तारका (प्यु) डु (वा स्त्रियाम्) ।
दाक्षायिण्यो (ऽश्विनीत्यादि तारा)
अश्वयुगश्विनौ ॥ ९४ ॥

राधा विशाखा

पुष्ये (तु) सिध्य तिष्यौ

अविष्ठया ।

(समा) धनिष्ठा

(स्यु:) प्रोष्ठपदा भाद्रपदा: (स्त्रिय:) ॥ ९५ ॥

मृगशीर्षं मृगशिरस् (तस्मिन्नेवा) ग्रहायणी ।

इल्वलास् (तच्छिरो देशे तारका निवसन्ति या:) ॥९६॥

बृहस्पति: सुराचार्य्यो गीष्पतिर्धिषणो गुरु: ।

जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिज: ॥ ९७ ॥

शुक्रो दैत्यगुरु: काव्य उशना भार्गव: कवि: ।

अङ्गारक: कुजो भौमो लोहिताङ्गो मह्यीसुत: ॥ ९८ ॥

रौहिणेयो बुध: सौम्य:

(समौ) शौरि शनैश्चरौ ।

तमस् (तु) राहु: स्वर्भानु: सैंहिकेयो विधुन्तुद: ॥ ९९ ॥

(सप्तर्षयो मरीच्यत्रिमुखाश्) चित्रशिखण्डिन: ।

(राशीनामुदयो) लग्नं

(ते तु मेषवृषादय:) ॥ १०० ॥

सूर सूर्य्यार्य्यमादित्य द्वादशात्म दिवाकरा: ।

भास्करार्हस्कर ब्रध्न प्रभाकर विभाकरा: ॥ १०१ ॥

भास्वद् विवस्वत् सप्ताश्व हरिदश्वोष्णरश्मय: ।

विकर्त्तनार्क मार्त्तण्ड मिहिरारुण पूषण: ॥ १०२ ॥

द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचन: ।

विभावसुर्ग्रहपतिस्त्विषां पतिरहर्पति: ॥ १०३ ॥

भानुर्हंस: सहस्रांशुस्तपन: सविता रवि: ।

माठर: पिङ्गलो दण्डश् (चण्डांशो: परिपार्श्विका:) ॥१०४॥

सूरसूतो ऽरुणो ऽनूरु: काश्यपिर्गरुड़ाग्रज: ।

परिवेशस् (तु) परिधिरुपसूर्य्यक मण्डले ॥ १०५ ॥
किरणोऽस्र मयूखांशु गभस्ति हृणि हृणयः ।
भानुः करो मरीचिः (स्त्रीपुंसयो) दीधितिः (स्त्रियाम्)॥१०६॥
(स्यः) प्रभारुग् रुचि त्विड् भाभाश् छवि द्युति दीप्तयः ।
रोचिः शोचि (रुभे क्लीवे)
प्रकाशो द्योत आतपः ॥ १०७ ॥
कोष्णं कवोष्णं मन्दोष्णं कटुष्णं (त्रिषु तद्वति) ।
तिग्मं तीक्ष्णं खरं (तद्वत्)
मृगतृष्णा मरीचिका ॥ १०८ ॥
कालो दिष्टी (प्य) नेहा (पि) समयो (प्य)
(ऽथ) पत्तिः ।
प्रतिपद् (दे द्वमे स्त्रीत्वे)
(तदाद्याम्) तिथयो (द्वयोः) ॥ १०९ ॥
वस्रो दिनाह्नी (वा तु क्लीवे) दिवस वासरौ ।
प्रत्यूषो ऽह्नर्मुखं कल्यमुषः प्रत्यूषसी (अपि) ॥ ११० ॥
प्रभातं (च)
(दिनान्ते तु) सायं
सन्ध्या पितृप्रसूः ।
प्राह्णापराह्ण मध्याह्नास् (त्रिसन्ध्यम्)
(अथ) शर्वरी ॥ १११ ॥
निशा निशीथिनी रात्रिस् त्रियामा क्षणदा क्षपा ।
विभावरी तमस्विन्यौ रजनी यामिनी तमी ॥ ११२ ॥
तमिस्रा तामसी (रात्रिः)
ज्योत्स्नी (चन्द्रिकयान्विता) ।
(आगामिवर्त्तमानाह्न्यर्युक्तायां निशि) पक्षिणी ॥ ११३ ॥
गणरात्रं (निशावह्नः)

प्रदोषो रजनीमुखम् ।

अर्द्धरात्र निशीथौ (द्वौ)

(द्वौ) याम प्रहरौ (समौ) ॥११४॥

(स) पर्वसन्धिः (प्रतिपत्पञ्चदश्योर्यदन्तरम्) ।

पक्षान्तौ (पञ्चदश्यौ ते)

यौर्णमासी (तु) पूर्णिमा ॥ ११५ ॥

(कलाहीने सा) ऽनुमतिः

(पूर्णे) राका (निशाकरे) ।

अमावास्या (त्व) ऽमावस्या दर्शः सूर्येन्दुसङ्गमः ॥११६॥

(सा दृष्टेन्दुः) सिनीवाली

(सा नष्टेन्दुकला) कुहूः ।

उपरागो ग्रहो

(राहुग्रस्ते त्विन्दौ च पृथ्वि च) ॥ ११७ ॥

सोपप्लवोपरक्तौ (द्वाव)

ऽग्न्युत्पात उपाश्रितः ।

(एकयोक्त्या) पुष्यवन्तौ (दिवाकर निशाकरौ) ॥११८॥

(अष्टादश निमेषास्तु) काष्ठाः

(विंशत्तु ताः) कलाः ।

(तास्तु विंशत्) क्षणः

(ते तु) मुहूर्त्तौ (द्वादशाक्षियाम्) ॥ ११९ ॥

(ते तु विंशद) ऽहोरात्रः

पञ्च (स्ते दश पञ्च च) ।

(पक्षौ पूर्वापरौ) शुक्ल कृष्णौ

मास (स्तु तावुभौ) ॥ १२० ॥

(द्वौ द्वौ मासादिमासौ स्याद) ऋतु

(स्त्रैर) यनं (त्रिभिः) ।

(अयने हे गतिरुदग् दक्षिणार्कस्य वत्सरः ॥ १२१ ॥
(समरात्रिन्दिवे काले) विषुवद्विषुवं (च तत्) ।
मार्गशीर्षे सहा मार्ग आग्रहायणिक (श्च सः) ॥ १२२ ॥
पौषे तैष सहस्यौ (द्वौ)
तपा माघे
(ऽथ) फाल्गुने ।
(स्यात्) तपस्यः फाल्गुनिकः
(स्यात्) चैत्रे चैत्रिको मधुः ॥ १२३ ॥
वैशाखे माधवो राधो
ज्यैष्ठ शुक्रः
शुचि (रूवयम्) ।
आषाढे
श्रावणे (तु स्यात्) नभाः श्रावणिक (श्च मः) ॥१२४॥
(स्य) नभस्यप्रौष्ठपद भाद्र भाद्रपदाः (समाः) ।
(स्यादा) श्विन इषो (ऽप्या) श्वयुजो (ऽपि)
(स्यात्तु) कार्त्तिके ॥ १२५ ॥
आहुलोर्ज्जौ कार्त्तिकिको
हैमन्तः
शिशिरो (ऽस्त्रियाम्) ।
वसन्ते पुष्पसमयः सुरभिर्
ग्रीष्म उष्मकः ॥ १२६ ॥
निदाघ उष्णोपगम उष्ण उष्णागमस्तपः ।
(स्त्रियां) प्रावृट् (स्त्रियां भूम्नि) वर्षा
(अथ) शरत् (स्त्रियाम्) ॥ १२७ ॥
(षड़मो ऋतवः पुंसि मार्गादीनां युगैः क्रमात्) ।
संवत्सरो वत्सरो ऽब्दो हायनो (ऽस्त्री) शरत् समाः ॥१२८॥

(मासेन स्याद) ऽहोरात्रः पैत्र्यो
(वर्षेण) दैवतः ।
(दैवे युगसहस्रे द्वे) ब्राह्म:
कल्पौ (तु तौ नृणाम्) ॥ १२८ ॥
मन्वन्तरं (तु दिव्यानां युगानामेकसप्ततिः) ।
संवर्त्तः प्रलयः कल्पः क्षयः कल्पान्त (इत्यपि) ॥ १२० ॥
(अस्त्री) पङ्कं (पुमान्) पाप्मा पापं किल्बिष कल्मषम् ।
कलुषं ह्रजिनैनोऽघमंहो दुरित दुष्कृतम् ॥ १२१ ॥
(स्याद्) धर्म (मस्त्रियां) पुण्य श्रेयसौ सुकृतं वृषः ।
मुत् प्रीतिः प्रमदो हर्षः प्रमोदामोद सम्मदाः ॥ १२२ ॥
(स्यादा) नन्दथुरानन्दः शर्म शात सुखानि (च) ।
श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ॥ १२३ ॥
भावुकं भविकं भव्यं कुशलं क्षेम (मस्त्रियाम्) ।
शस्तं (चा)
(ऽथ त्रिषु द्रव्ये पाप पुण्य सुखादि च) ॥१२४॥
मतल्लिका मर्चिका प्रकाण्ड मुह्व तल्लजौ ।
(प्रशस्तवाचकान्यमून्य)
ऽयः (शुभावहो विधिः) ॥ १२५ ॥
दैवं दिष्टं भागधेयं भाग्यं (स्त्री) नियतिर्विधिः ।
हेतु नौ कारणं बीजं
(निदानं त्वा) दिकारणम् ॥ १२६ ॥
जेत्रज्ञ आत्मा पुरुषः
प्रधानं प्रकृतिः (स्त्रियाम्) ।
(विशेषः कालिको) ऽवस्था
(गुणाः) सत्वं रज स्तमः ॥ १२७ ॥
जनर्जनन जन्मानि जनिरुत्पत्तिरुद्भवः ।

प्राणी (तु) चेतनो जन्मी जन्तु जन्यु शरीरिणः ॥ १३८ ॥
जातिर्जातं (च) सामान्यं
व्यक्ति (स्तु) पृथगात्मिका ।
चित्तं (तु) चेतो हृदयं स्वान्तं हृत् मानसं मनः ॥१३९॥
बुद्धि र्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ।
प्रेक्षोपलब्धिश्चित् संवित् प्रतिपज् ज्ञप्ति चेतनाः ॥ १४० ॥
(धीर्धारणावती) मेधा
संकल्पः (कर्म्म मानसम्) ।
चित्ताभोगो मनस्कारश्
चर्चा संख्या विचारणा ॥ १४१ ॥
अध्याहारस्तर्क ऊहो
विचिकित्सा (तु) संशयः ।
सन्देह द्वापरौ (चा)
(ऽथ समौ) निर्णय निश्चयौ ॥ १४२ ॥
मिथ्यादृष्टिर्नास्तिकता
व्यापादो द्रोहचिन्तनम् ।
(समौ) सिद्धान्त राद्धान्तौ
भ्रान्तिर्मिथ्यामति भ्रमः ॥ १४३ ॥
संविदागूः प्रतिज्ञानं नियमाश्रवः संश्रवाः ।
अङ्गीकाराभ्युपगम प्रतिश्रव समाधयः ॥ १४४ ॥
(मोक्षे धी) र्ज्ञानम्
(अन्यत्र) विज्ञानं शिल्पशास्त्रयोः) ।
मुक्तिः कैवल्य निर्वाणं श्रेयो निःश्रेयसामृतम् ॥ १४५ ॥
मोक्षोऽपवर्गो
(ऽथा) ज्ञानमविद्याहं मतिः (स्त्रियाम्) ।
रूपं शब्दो गन्ध रस स्पर्शाश् (च)

विषया (अमी) ॥ १४६ ॥

गोचरा इन्द्रियार्थाश् (च)

हृषीकं विषयीन्द्रियम् ।

कर्मेन्द्रियं (तु पायूपादि)

(मनो नेत्रादि) धीन्द्रियम् ॥ १४७ ॥

तुवरम् (तु) कषायो (ऽस्त्री)

मधुरो लवणः कटुः ।

तिक्तोऽम्लश् (च रसाः पुंसि)

(तद्वत्सु षड़मी त्रिषु) ॥ १४८ ॥

(विमर्दोत्थे) परिमलो (गन्धे जनमनोहरे) ।

आमोदः (सोऽतिनिर्हारी)

(वाच्यलिङ्गत्वमागुणात्) ॥१४९॥

समाकर्षी (तु) निर्हारी

सुरभिर्घ्राणतर्पणः ।

इष्टगन्धः सुगन्धिः (स्याद्)

आमोदो मुखवासनः ॥ १५० ॥

पूतिगन्धिस् (तु) दुर्गन्धो

विस्रं (स्यादा) मगन्धि (यत्) ।

शुक्ल शुभ्र शुचि श्वेत विशद श्वेत पाण्डुराः ॥ १५१ ॥

अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः ।

हरिणः पाण्डुरः पाण्डुर्

(ईषत्पाण्डुस्तु) धूसरः ॥ १५२ ॥

कृष्णे नीलासित श्याम काल श्यामल मेचकाः ।

पीतो गौरो हरिद्राभः

पालाशो हरितो हरित् ॥ १५३ ॥

रोहितो लोहितो रक्तः

शोणः कोकनदच्छविः ।

(अव्यक्तरागस्त्व) रुणः

(श्वेतरक्तस्तु) पाटलः ॥ १५४ ॥

श्यावः (स्यात्) कपिशो

धूम्र धूमलौ कृष्णलोहिते ।

कड़ारः कपिलः पिङ्ग पिशङ्गौ कद्रु पिङ्गलौ ॥ १५५ ॥

चित्रं किर्मीर कल्माष शबलेता (श्व) कर्बुरे ।

(गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति) ॥ १५६ ॥

ब्राह्मी (तु) भारती भाषा गीर्वाग् वाणी सरस्वती ।

व्याहार उक्तिर्लपितं भाषितं वचनं वचः ॥ १५७ ॥

अपभ्रंशोऽपशब्दः (स्यात्)

(शास्त्रे) शब्द (स्तु) वाचकः ।

तिङ्सुबन्तचयो) वाक्यं (क्रिया वा कारकान्विता) ॥१५८॥

श्रुतिः (स्त्री) वेद आम्नायस्

त्रयीधर्म्म (स्तु तद्विधिः) ।

(स्त्रियाम्) ऋक् साम यजुषी

(इति वेदास्त्रयम्) त्रयी ॥ १५९ ॥

(शिक्षेत्यादि श्रुतेर्) अङ्गम्

ओङ्कार प्रणवौ (समौ) ।

इतिहासः पुरावृत्तं

(उदात्ताद्यास्त्रयः) स्वराः ॥ १६० ॥

आन्वीक्षिकी दण्डनीति (स्तर्कविद्यार्थशास्त्रयोः) ।

आख्यायिका (पलब्धार्था)

पुराणं पञ्चलक्षणम् ॥ १६१ ॥

(प्रबन्धकल्पना) कथा

प्रवल्हिका प्रहेलिका ।

स्मृति (स्तु) धर्मसंहिता
समाहृति (स्तु) संग्रहः ॥ १६२ ॥
समस्या (तु) समासार्था
किंवदन्ती जनश्रुतिः ।
वार्त्ता प्रवृत्ति र्वृत्तान्त उदन्तः (स्याद्)
(अथा) ह्वयः ॥ १६३ ॥
आख्याह्वे (चा) भिधानं (च) नामधेयं (च) नाम (च) ।
ह्वतिराकरणाह्वानं
संह्वति (र्बहुभिः कृता) ॥ १६४ ॥
विवादो व्यवहारः (स्याद्)
उपन्यास (स्तु) वाङ्मुखम् ।
उपोद्घात उदाहारः
शपनं शपथः (पुमान्) ॥ १६५ ॥
प्रश्नो ऽनुयोगः पृच्छा (च)
प्रतिवाक्योत्तरे (समे) ।
मिथ्याभियोगो ऽभ्याख्यानम्
(अथ) मिथ्याभिशंसनम् ॥ १६६ ॥
अभिशापः
प्रणाद (स्तु शब्दः स्यादनुरागजः) ।
यशः कीर्त्तिः समज्ञा (च)
स्तवः स्तोत्रं स्तुतिर्नुतिः ॥ १६७ ॥
आम्रेडितं (द्विरुक्तम्)
(उच्चैर्घुष्टं (तु) घोषणा ।
काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः ॥१६८॥
प्रवर्णाक्षेपनिर्वाद परीवादापवाद (वत्) ।
उपक्रोशो जुगुप्सा (च) कुत्सा निन्दा (च) गर्हणे ॥१६९॥

पारुष्यमभिवादः (स्यात्)

भर्त्सनं (त्व) पकारगीः ।

(यः सनिन्द उपालम्भ स्तव स्यात्) परिभाषणम् ॥१७०॥

(तव त्वा) ऽऽच्चारणा (यः स्यादाक्रोशो मैथुनं प्रति) ।

(स्याद्) आभाषणमालापः

प्रलापो (ऽनर्थकं वचः) ॥ १७१ ॥

अनुलापो मुहुर्भाषा

विलापः परिदेवनम् ।

विप्रलापो विरोधोक्तिः

संलापो (भाषणं मिथः) ॥ १७२ ॥

सुप्रलापः सुवचनं

अपलाप (स्तु) निह्नवः ।

सन्देशवाग् वाचिकं (स्याद्)

(वागभेदास्तु चिषूत्तरे) ॥ १७३ ॥

उषती (वागकल्याणी)

(स्यात्) कल्या (तु शुभात्मिका) ।

(अत्यर्थमधुरं) सान्त्वं

सङ्गतं हृदयङ्गमम् ॥ १७४ ॥

निष्ठुरं परुषं

ग्राम्यमश्लीलं

मृतं (प्रिये ।

सत्ये)

(ऽथ) सङ्कुलः क्लिष्टे परस्परपराहते ॥ १७५ ॥

(लुप्तवर्णपदं) ग्रस्तं

निरस्तं त्वरितोदितम् ।

(अम्बूकृतं) सनिष्ठेवं

अवद्यं (स्याद) ऽनर्थकम् ॥ १७६ ॥

अनुत्तरमवाच्यं (स्याद्)

आहतं (तु) मृषार्थकम् ।

(अथ) म्लिष्टमविस्पष्टं

वितथं (ऋ) नृतं (वचः) ॥ १७७ ॥

सत्यं तथ्यमृतं सम्यग्

(अमूनि त्रिषु तद्वति) ।

शब्दे निनाद निनद ध्वनि ध्वान रव स्वनाः ॥ १७८ ॥

ध्वान निर्घोष निर्ह्राद नाद निस्वान निस्वनाः ।

आरवाराव संराव विरावा

(अथ) समेरः ॥ १७९ ॥

(स्वनितं वस्त्रपर्णानां)

(भूषणानां तु शिञ्जितम् ।

निक्वाणो निक्वणः क्वाणः क्वणः क्वणन (मित्यपि) ॥ १८० ॥

(वीणायाः कणितं प्रादेः) प्रक्वाण पक्वणा (दयः) ।

कोलाहलः कलकलम्

(तिरश्चां) वाशितं रुतम् ॥ १८१ ॥

(स्त्री) प्रतिश्रुत् प्रतिध्वानि

गीतं गान (मिमे समे) ।

निषादर्षभ गान्धार षड्ज मध्यम धैवताः ॥ १८२ ॥

पञ्चमश् (चेत्यमी मत्त तन्त्रीकण्ठोत्थिताः स्वराः) ।

काकली (तु कले सूक्ष्मे)

(ध्वनौ तु मधुरास्फुटे) ॥ १८३ ॥

कलौ

मन्द्र (स्तु गम्भीर)

तारौ (ऽत्युच्चैस्)

(चयं स्त्रिषु) ।

(समन्वितलयत्वे)—कतालौ

वीणा (तु) वल्लकी ॥ १८४ ॥

विपञ्ची

(सा तु तन्त्रीभिः सप्तभिः) परिवादिनी ।

ततं (वीणादिक वाद्यम्)

आनद्धं (मुरजादिकम्) ॥ १८५ ॥

(वंश्यादिकं तु) शुषिरं

(कांस्यतालादिकं) घनम् ।

(चतुर्विधमिदं) वाद्यं वाद्यित्रातोद्य (नामकम्) ॥ १८६ ॥

मृदङ्गा मुरजा

(भेदास्त्व) ङ्यालिङ्ग्योर्ध्वका (स्त्रयः) ।

(स्याद्) यशः पटहो ढक्का

भेरी (स्त्री) दुन्दुभिः (पुमान्) ॥ १८७ ॥

आनकः पटहो (ऽस्त्री स्यात्)

कोणो (वीणादिवादनम्) ।

वीणादण्डः प्रवालः (स्यात्)

ककुभ (स्तु) प्रसेवकः ॥ १८८ ॥

कोलम्बक (स्तु) कायो ऽस्त्या)

उपनाहो निबन्धनम् ।

(वाद्यप्रभेदा) डमरु मड्डु, डिण्डिम झर्झराः ॥ १८९ ॥

महलः पणवो (ऽन्ये च)

नर्त्तकी लासिके (समे) ।

(विलम्बितं द्रुतं मध्यं) तत्त्रयोद्घोद्घनं (क्रमात्) ॥ १९० ॥

तालः (कालक्रियामानं)

लयः (साम्यम्)

(अथास्त्रियाम्)।

ताण्डवं नटनं नाट्यं लास्यं नृत्यं (च) नर्त्तने ॥ १८१ ॥

तौर्य्यत्रिकं (नृत्यगीतवाद्यं) नाट्य (मिदं त्रयम्)।

भ्रकुंस (श्च) भ्रकुंस (श्च) भृकुंस (श्चेति नर्त्तकः ॥१८२॥

स्त्रीवेषधारी पुरुषो)

(नाट्योक्तौ गणिका) ऽज्जुका ।

(भगिनीपतिरा) बुत्तो

भावो (विद्वान्)

(अय्या) बुकः ॥ १८३ ॥

(जनको)

(युवराजस्तु) कुमारो भर्त्तृदारकः ।

(राजा) भट्टारको देवस्

(तत्सुता) भर्त्तृदारिका ॥ १८४ ॥

देवी (कृताभिषेकायाम्)

(इतरासु च) भट्टिनी ।

अब्रह्मण्य (मबध्योक्तौ)

(राजश्यालस्तु) राष्ट्रियः ॥ १८५ ॥

अम्बा (माता)

(ऽथ बाला स्याद) वासूर्

(आर्य्यस्तु) मारिषः ।

अन्तिका (भगिनी ज्येष्ठा)

निष्ठा निर्वहणे (समे) ॥ १८६ ॥

हण्डे हञ्जे हला (ह्वानं नीचं चेटीं सखीं प्रति)।

अङ्गहारोऽङ्गविक्षेपो

व्यञ्जकाभिनयौ (समौ) ॥ १८७ ॥

(निर्वृत्ते त्वङ्गसत्वाभ्यां द्वे त्रिष्वा) ङ्गिक सात्विके ।

(शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः ॥ १९८ ॥
बीभत्सरौद्रे च) रसाः

शृङ्गारः शुचिरुज्ज्वलः ।
उत्साहवर्द्धनो वीरः

कारुण्यं करुणा घृणा ॥ १९९ ॥
कृपा दयानुकम्पा (स्याद) ऽनुक्रोशो (ऽप्य)
(ऽथो) हसः ।
हासो हास्यं (च)

बौभत्सं विकृतं (विप्लिटं द्वयम्) ॥ २०० ॥
विस्मयो ऽद्भुतमाश्चर्यं चित्र (मप्य)
(ऽथ) भैरवम् ।
दारुणं भीषणं भीष्मं घोरं भीमं भयानकम् ॥ २०१ ॥
भयङ्करं प्रतिभयं

रौद्रं (तू) ग्रम्
(ग्रमौ त्रिषु ।
चतुष्टय ।

दर त्रासो भीतिर्भीः साध्वसं भयम् ॥ २०२ ॥
(विकारो मानसो) भावो

ऽनुभावो (भावबोधकः) ।
गर्वो ऽभिमानो ऽहंकारो

मानश्चित्तसमुन्नतिः ॥ २०३ ॥
अनादरः परिभवः परिभावस्तिरस्क्रिया ।
रौढ़ावमाननावज्ञा अवहेलमसूत्तणम् ॥ २०४ ॥
मन्दादरं क्रीस्तपा व्रीड़ा लज्जा

(सा) ऽपत्रपा (ऽन्यतः) ।
कान्तिस्तितिच्छा

ऽभिध्या (तु परस्वविषये स्पृहा) ॥ २०५ ॥

अक्षान्तिरीर्ष्या

ऽसूया (तु दोषारोपो गुणेष्वपि) ।

वैरं विरोधो विद्वेषो

मन्यु शोकौ (तु) शुक् (स्त्रियाम्) ॥ २०६ ॥

पश्चात्तापो ऽनुताप (श्च) विप्रतीसार (इत्यपि) ।

कोप क्रोधा ऽमर्ष रोष प्रतिघा रुक्क्रुधौ (स्त्रियाम्) ॥२०७

(शुची तु चरितं) शीलम्

उन्माद श्चित्तविभ्रमः ।

प्रेमा (ना) प्रियता हार्दं प्रेम स्नेहो

(ऽथ) दोहदम् ॥ २०८ ॥

इच्छाकाङ्क्षा स्पृहेहा तृड्वाञ्छा लिप्सा मनोरथः ।

कामोऽभिलाषस्तर्ष (श्च)

(स मह्यां) लालसा (द्वयोः) ॥ २०९ ॥

उपाधि (र्ना) धर्मचिन्ता

(पुंस्या) धि (र्मानसी व्यथा) ।

(स्यात्) चिन्ता स्मृतिराध्यानं

उत्कण्ठोत्कलिके (समे) ॥ २१० ॥

उत्साहोऽध्यवसायः (स्यात्)

(स) वीर्य्य (मतिशक्तिभाक्) ।

कपटो (ऽस्त्री) व्याज दम्भोपधयश्छद्म कैतवे ॥ २११ ॥

कुस्मृतिर्निकृतिः शाठ्यं

प्रमादो ऽनवधानता ।

कौतूहलं कौतुकं (च) कुतुकं (च) कुतूहकम् ॥ २१२ ॥

(स्त्रीणां विलास विव्वोक विभ्रमा ललितं तथा ।

हेला लीलेत्यमी) हावाः (क्रियाः शृङ्गारभावजाः) ॥२१३॥

द्रव केलि परीहासाः क्रीड़ा लीला (च) नर्म (च)।
व्याजो ऽपदेशो लक्ष्यं (च)
क्रीड़ा खेला (च) कूर्दनम् ॥२१४॥
घर्मो निदाघः स्वेदः (स्यात्)
प्रलयो नष्टचेष्टता।
अवहित्थाकाराद्गुप्तिः
(समौ) संवेग सम्भ्रमौ ॥ २१५ ॥
(स्यादा) च्छुरितकं (हासः सोत्रासः)
(स मनाक्) स्मितम्।
(मध्यमः स्याद्) विहसितं
रोमाञ्चो लोमहर्षणम् ॥ २१६ ॥
क्रन्दितं रुदितं क्रुष्टं
जृम्भ (स्तु त्रिषु) जृम्भणम्।
विप्रलम्भो विसंवादो
रिङ्गण स्खलनं (समे) ॥ २१७ ॥
(स्यात्) निद्रा शयनं स्वापः स्वप्नः संवेश (इत्यपि)।
तन्द्रौ प्रमीला
भ्रकुटि र्भ्रुकुटी भ्रूकुटिः (स्त्रियः) ॥ २१८ ॥
अदृष्टिः (स्यादसौम्ये ऽक्ष्णि)
संसिद्धि प्रकृतौ (त्रिषु)।
स्वरूपं (च) स्वभाव (श्च) निसर्ग (श्चा)
(ऽथ) वेपथुः ॥ २१९ ॥
कम्पो (ऽथ) क्षण उद्वर्षो मह उद्भव उत्सवः।

इति स्वर्गवर्गः।

अथ पातालवर्गः ।

अधोभुवन पाताल बलिसद्म रसातलम् ।
नागलोको
(ऽथ) कुहरं शुषिरं विवरं विलम् ॥ १ ॥
छिद्रं निर्व्यथनं रोकं रन्ध्रं खभ्रं वपा शुषिः ।
गर्त्ता ऽवटौ (भुवि खभ्रे)
(सरन्ध्रे) शुषिरं (त्रिषु) ॥ २ ॥
अन्धकारो (ऽस्त्रियां) ध्वान्तं तमिस्रं तिमिरं तमः ।
(ध्वान्ते गाढ़े) ऽन्धतमसं
(क्षीणे) ऽवतमसं
(तमः ॥ ३ ॥
विष्वक्) सन्तमसं
नागाः काद्रवेया-
(स्तदीश्वरः) ।
शेषो ऽनन्तो
वासुकि (स्तु) सर्पराजो
(ऽथ) गोनसे ॥ ४ ॥
तिलित्सः (स्याद्)
अजगरे शयुर्वाह्यस (इत्युभौ) ।
अलगर्दो जलव्याल:
(समौ) राजिल डुण्डुभौ ॥ ५ ॥
मालुधानो मातुलाहिः
निर्मुक्तो मुक्तकञ्चुकः ।
सर्पः पृदाकुर्भुजगो भुजङ्गो ऽहिर्भुजङ्गमः ॥ ६ ॥
आशीविषो विषधरस्वक्षी व्यालः सरीसृपः ।

कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी ॥ ७ ॥
दर्वीकरो दीर्घपृष्ठो दन्दशूको विलेशयः ।
उरगः पन्नगी भोगी जिह्मगः पवनाशनः ॥ ८ ॥
(विष्वा) हेयं (विषास्यादि)
फटायां (तु) फणा (द्वयोः) ।
(समौ) कञ्चुक निर्मोकौ
क्ष्वेड (स्तु) गरलं विषम् ॥ ९ ॥
(पुसि क्लीवे च) काकोल कालकूट हलाहलाः ।
सौराष्ट्रिकः शौक्तिकेयो ब्रह्मपुत्रः प्रदीपनः ॥ १० ॥
दारदो वत्सनाभ (श्च विषभेदा अमी नव) ।
विषवैद्यो जाङ्गलिको
व्यालग्राह्यहितुण्डिकः ॥ ११ ॥
(स्यात्) नारक (स्तु) नरका निरयो दुर्गतिः (स्त्रियाम्) ।
(तद्भेदाः) तपनावीचि महारौरव रौरवाः ॥ १२ ॥
संहारः कालसूत्रं (चेत्याद्याः)
(सत्वास्तु) नारकाः ।

प्रेता
वैतरणी (सिन्धुः)
(स्याद) ऽलक्ष्मो (स्तु) निर्ऋतिः ॥१३॥

विष्टराजूः
कारणा (तु) यातना तीव्रवेदना ।
पीडा बाधा व्यथा दुःखममानस्यं प्रसूतिजम् ॥ १४ ॥
(स्यात्) कष्टं कृच्छ्रमाभीलं
(त्रिष्वेषां भेद्यगामि यत्) ।
समुद्रो ऽब्धिरकूपारः पारावारः सरित्पतिः ॥ १५ ॥
उदन्वानुदधिः सिन्धुः सरस्वान् सागरो ऽर्णवः ।

रत्नाकरो जलनिधिर्यादःपतिरपाम्पतिः ॥ १६ ॥
(तस्य प्रभेदाः) क्षीरोदो लवणोद (स्तथापरे) ।
आपः (स्त्री भूम्नि) वार्वारि सलिलं कमलं जलम् ॥ १७ ॥
पयः कीलालममृतं जीवनं भुवनं वनम् ।
कबन्धमुदकं पाथः पुष्करं मर्वतो मुखम् ॥ १८ ॥
अम्भो ऽर्णस्तोय पानीय नीर क्षीराम्बु शम्बरम् ।
मेघपुष्पं घनरसम्
(त्रिषु हे) आप्यमम्मयम् ॥ १९ ॥
भङ्गस्तरङ्ग ऊर्मि (र्वा स्त्रियां) वीचिर्
(ऽथोर्म्मिषु ।
महत्सू)-ल्लोल कल्लोलौ
(स्यादा)-वर्त्तौ (ऽम्भमां भ्रमः) ॥ २० ॥
पृषन्ति विन्दु पृषताः (पुमांसो) विप्रुषः (स्त्रियः) ।
वक्राणि पुटभेदाः (स्युः)
भ्रमा (स्व) जलनिर्गमाः ॥ २१ ॥
कूलं रोध (स्व) तीरं (च) प्रतीरं (च) तटं (त्रिषु) ।
पारावारे (परार्वाचौ तीरे)
पात्रं (तदनन्तरम्) ॥ २२ ॥
द्वीपो (ऽस्त्रियाम) न्तरीपं (यदन्तर्वारिण्यस्तटम्) ।
(तोयोत्थितं तत्) पुलिनं
सैकतं सिकतामयम् ॥ २३ ॥
निषद्वर (स्तु) जम्बालः पङ्को (ऽस्त्री) शाद कर्दमौ ।
जलोच्छ्वासाः परीवाहाः
कूपका (स्तु) विदारकाः ॥ २४ ॥
नाव्यं (त्रिलिङ्गं नौतार्यं)
(स्त्रियां) नौस्तरणिस्तरिः ।

उडुपं (तु) प्लवः कोलः
स्रोतो (ऽम्बु सरणं स्रतः) ॥ २५ ॥
आतरस्तरपण्यं (स्याद्)
द्रोणी काष्ठाम्बुवाहिनी ।
सांयात्रिकः पोतवणिक्
कर्णधार (स्तु) नाविकः ॥२६॥
नियामकाः पोतवाहाः
कूपको गुणवृक्षकः ।
नौकादण्डः क्षेपणिः (स्याद्)
अरित्रं केनिपातकः ॥ २७ ॥
अभ्रिः (स्त्री) काष्ठकुद्दालः
सेकपात्रं (तु) सेचनम् ।
(क्लीवे) ऽर्ङनावं (नावोऽर्ङे)
(ऽतीत नौके) ऽतिनु (त्रिषु) ॥२८॥
(त्रिष्वागाधात्)
प्रसन्ना ऽच्छः
कलुषो ऽनच्छ आविलः ।
निम्नं गभीरं गम्भीरम्
उत्तानं (तद्विपर्य्यये) ॥ २९ ॥
अगाधमतलस्पर्शं
कैवर्त्ते दास धीवरौ ।
आनायः (पुंसि) जालं (स्यात्)
शणसूत्रं पवित्रकम् ॥ ३० ॥
मत्स्याधानी कुवेणी (स्याद्)
वड़िशं मत्स्यवेधनम् ।
पृथुरोमा झषो मत्स्यो मीनो वैसारिणो ऽण्डजः ॥ ३१ ॥

विसारः शकली (त्रा)

(ऽथ) गडकः शकुलार्भकः ।

सहस्रदंष्ट्रः पाठीन

उलूपी शिशुकः (समौ) ॥ ३२ ॥

नलमीनश्चिलिचिमः

प्रोष्ठी (तु) शफरी (द्वयोः) ।

क्षुद्राण्डमत्स्यसङ्घातः पोताधानम्

(अथो झषाः) ॥ ३३ ॥

रोहितो मद्गुरः शालो राजीवः शकुलस्तिमिः ।

तिमिङ्गिला (दयश्चा)

(ऽथ) यादांसि जलजन्तवः ॥ ३४ ॥

(तज्ज्ञेदाः) शिशुमारोद्र शङ्कवा मकरा (दयः) ।

(स्यात् (कुलीरः कर्कटकः

कूर्मे कमठ कच्छपौ ॥ ३५ ॥

ग्राहो ऽवहारो

नक्र (स्तु) कुम्भीरो

(ऽथ) महीलता ।

गण्डूपदः किञ्चुलको

निहाका गोधिका (ममे) ॥ ३६ ॥

रक्तपा (तु) जलौकायां (स्त्रियां भृम्नि) जलौकसः ।

मुक्तास्फोटः (स्त्रियां) शुक्तिः

शङ्खः (स्यात्) कम्बु (रस्त्रियाम्) ॥३७॥

क्षुद्रशङ्खाः शङ्खनखाः

शम्बूका जलशुक्तयः ।

भेके मण्डूक वर्षाभू शालूर प्लव दर्दुराः ॥ ३८ ॥

शिलो गण्डूपदौ

भेकी वर्षाभ्वी

कमठी दुलिः ।

(मद्गुरस्य प्रिया) शृङ्गी

दुर्नामा दीर्घकोषिका ॥ ३९ ॥

जलाशया जलाधारा

(स्तवागाधजलो) ह्रदः ।

आहाव (स्तु) निपानं (स्याद्पकूप जलाशये) ॥ ४० ॥

(पुंस्येवा-)म्बु प्रहो कूप उदपानं (तु पुंसि वा) ।

नेमिस्त्रिका (ऽस्य)

वीनाहो (मुखबन्धनमस्य यत्) ॥ ४१ ॥

पुष्करिण्यां (तु) खातं (स्याद्)

अखातं देवखातकम् ।

पद्माकरस्तडागो (ऽस्त्री)

कासारः सरसी सरः ॥ ४२ ॥

वेशन्तः पल्वलं (चा) ऽल्पसरो

वापी (तु) दीर्घिका ।

खेयं (तु) परिखा

ऽऽधार (स्तम्भसां यत्र धारणम्) ॥ ४३ ॥

(स्याद्) आलवालमावालमावापो

(ऽथ) नदो सरित् ।

तरङ्गिणी शैवलिनो तटिनो ह्रदिनो धुनो ॥ ४४ ॥

स्रोतस्विनो द्वीपवती स्रवन्ती निम्नगापगा ।

गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा ॥ ४५ ॥

भागीरथी त्रिपथगा त्रिस्रोता भीष्मसू (रपि) ।

कालिन्दो सूर्य्यतनया यमुना शमनस्वसा ॥ ४६ ॥

रेवा (तु) नर्मदा सोमोद्भवा मेकलकन्यका ।

करतोया सदानीरा
बाहुदा सैतवाहिनी ॥ ४७ ॥
शितद्रु (स्तु) शतद्रुः (स्यात्)
विपाशा (तु) विपाट्) स्त्रियाम् ।
शोणो हिरण्यबाहुः (स्यात्)
कुल्या (ऽल्पा क्षुद्रिमा सरित्) ॥ ४८ ॥
शरावती वेत्रवती चन्द्रभागा सरस्वती ।
कावेरी (सरितोऽन्याश्च)
सम्भेदः सिन्धुसङ्गमः ॥ ४९ ॥
(द्वयोः) प्रणाली (पयसः पदव्यां)
(त्रिषु तूत्तरौ ।
देविकायां सरय्वां च भवे) दाविक सारवौ ॥ ५० ॥
सौगन्धिकं (तु) कह्लारं
हल्लकं रक्तसन्ध्यकम् ।
(स्याद्) उत्पलं कुवलयम्
(अथ) नीलाम्बुजन्म (च) ॥ ५१ ॥
इन्दीवरं (च नीले ऽस्मिन्)
(सिते) कुमुद कैरवे ।
शालूक (मेषां कन्दः स्याद्)
वारिपर्णी (तु) कुम्भिका ॥ ५२ ॥
जलनीली (तु) शैवालं शेवलो
(ऽथ) कुमुद्वती ।
कुमुदिन्यां
नलिन्यां (तु) विसिनी पद्मिनी (मुखाः) ॥ ५३ ॥
(वा पुंसि) पद्मं नलिनमरविन्दं महोत्पलम् ।
सहस्रपत्रं कमलं शतपत्रं कुशेशयम् ॥ ५४ ॥

पङ्केरुहं तामरसं सारसं सरसीरुहम् ।
विसप्रसून राजीव पुष्कराम्भोरुहाणि (च) ॥ ५५ ॥
पुण्डरीकं सिताम्भोजम्
(अथ) रक्तसरोरुहे ।
रक्तोत्पलं कोकनदं
नालानालम्
(अथास्त्रियाम्) ॥ ५६ ॥
मृणालं विसम्
(अजादिकदम्बे) षण्ड (मस्त्रियाम्) ।
करहाटः शिफाकन्दं
किञ्जल्कः केशरो (ऽस्त्रियाम्) ॥ ५७ ॥
संवर्त्तिका नवदलं
बीजकोशे वराटकः ।
(उक्तं स्वर्योम दिक्कालधीशब्दादि सनाद्यकम् ॥ ५८ ॥
पातालभोगि नरकं वारि चैषां तु सङ्गतम्) ।

इति पातालवर्गः ।

अथ पृथिवीवर्गः ।

वर्गाः पृथ्वी पुर क्ष्माभृद्वनौषधि मृगादिभिः ।
न ब्रह्म क्षत्र विट् शूद्रैः साङ्गोपाङ्गैरिहोदिताः ॥ १ ॥
भूर्भूमिरचलाऽनन्ता रमा विश्वम्भरा स्थिरा ।
धरा धरित्री धरणिः क्षोणी ज्या काश्यपी क्षितिः ॥ २ ॥
सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा ।
गोत्रा कुः पृथिवी पृथ्वी क्ष्माऽवनिर्मेदिनी महौ ॥ ३ ॥
मृन्मृत्तिका

(प्रशस्ता तु) मृत्सा मृत्स्ना (च मृत्तिका)।
उर्वरा (सर्वशस्याढ्या)
(स्याद्) ऊषः क्षारमृत्तिका ॥ ४ ॥
ऊषवानूषरो (द्वावप्यन्यलिङ्गौ)
स्थलं स्थली।
(समानौ) मरु धन्वानौ
(द्वे) खिलाऽप्रहते (समे) ॥ ५ ॥
(विष्व)
(ऽथो) जगती लोको विष्टपं भुवनं जगत्।
(लोको ऽयं) भारतं (वर्षं)
(शरावत्यास्तु यो ऽवधेः ॥ ६ ॥
देशः प्राग्दक्षिणः) प्राच्य
उदीच्यः (पश्चिमोत्तरः)।
प्रत्यन्तो म्लेच्छदेशः (स्यात्)
(मध्यदेश) स्तु (मध्यमः ॥ ७ ॥
आर्य्यावर्त्तः पुण्यभूमि (र्मध्यं विन्ध्यहिमालयोः)।
नीवृज्जनपदो
देश विषयौ (तू)-पवर्त्तनम् ॥ ८ ॥
(विष्वागोष्ठात्)
(नडप्राये) नड्वान्नड्वल (दित्यपि)॥
कुमुद्वान् (कुमुदप्राये)
वेतस्वान् (बहुवेतसे) ॥ ९ ॥
शाद्वलः (शादहरिते)
(सजम्बाले तु) पङ्किलः।
जलप्रायमनूपं (स्यात्)
(पुंसि) कच्छ (स्तथाविधः) ॥ १० ॥

(स्त्री) शर्करा शर्करिलः शार्करः शर्करावति ।
(देश एवादिमाव्)
(एवमुन्नेयाः) सिकतावति ॥ ११ ॥
(देशो नद्यम्ब, वृष्ट्यम्ब, सम्पन्नव्रीहिपालितः ।
स्यात्) नदीमातृको
देवमातृक (श्च यथाक्रमम्) ॥ १२ ॥
(सुराष्ट्रि देशे) राजन्वान्
(स्यात्ततो ऽन्यत्र) राजवान् ।
गोष्ठं गोस्थानकं
(तत्तु) गोष्ठीनं (भूतपूर्वकम्) ॥ १३ ॥
पर्य्यन्तभूः परिसरः
सेतुरालौ (स्त्रियां पुमान्) ।
वामलूर (श्च) नाकु (श्च) वल्मीकं (पुंनपुंसकम्) ॥ १४ ॥
अयनं वर्त्म मार्गाध्व पन्थानः पदवी सृतिः ।
मरगिः पद्धतिः पद्या वर्त्मन्येकपदी (ति च) ॥ १५ ॥
अतिपन्थाः सुपन्था (श्च) सत्पथ (स्वार्च्चितेऽध्वनि) ।
व्यध्वो दुरध्वो विपथः कदध्वा कापथः (समाः) ॥ १६ ॥
अपन्था (स्त्व) पथं (तुल्ये)
शृङ्गाटक चतुष्पथे ।
प्रान्तरं (दूरशून्योऽध्वा)
कान्तारो (वर्त्म दुर्गमम्) ॥ १७ ॥
गव्यूतिः (स्त्री) क्रोशयुगं
नल्वः (किष्कुचतुःशतम्) ।
घण्टापथः संतरणं
(तत्पुरस्यो)-पनिष्करम् ॥ १८ ॥

अथ पुरवर्गः ।

पूः (स्त्री) पुरी नगर्य्यौ (वा) पत्तनं पुटभेदनम् ।
स्थानीयं निगमो
(ऽन्यत्तु) यन्मूलनगरात्पुरम् ॥ १ ॥
(तत्) शाखानगरं
वेणी वेश्याजनसमाश्रयः ।
आपण (स्तु) निषद्यायां
विपणिः पण्यवीथिका ॥ २ ॥
रथ्या प्रतोली विशिखा
(स्यात्) चयो वप्र (मस्त्रियाम्) ।
प्राकारो वरणः शालः
प्राचीरं (प्रान्ततो वृतिः) ॥ ३ ॥
भित्तिः (स्त्री) कुड्यम्
एडूकं (यदन्तर्न्यस्तकीकसम्) ।
गृह गेहोदवसितं वेश्म सद्म निकेतनम् ॥ ४ ॥
निशान्त वस्त्य सदनं भवनागार मन्दिरम् ।
गृहाः (पुंसि च भूम्नेव) निकाय्य निलयालयाः ॥ ५ ॥
वासः कूटौ (द्वयोः) शाला सभा
सप्तवनं (त्विदम्) ।
चतुःशालं
(मुनीनां तु) पर्णशालोटजौ (ऽस्त्रियाम्) ॥ ६ ॥
चैत्यमायतनं (तुल्ये)
वाजिशाला (तु) मन्दुरा ।
आवेशनं शिल्पशाला
प्रपा पानीयशालिका ॥ ७ ॥

मठ (स्थात्रादिनिलयो)

गञ्जा (तु) मदिरागृहम् ।

गर्भागारं वासगृहम्

अरिष्टं सूतिकागृहम् ॥ ८ ॥

वातायनं गवाक्षः (स्यात्)

मण्डपः (ऽस्त्री) जनाश्रयः ।

हर्म्या-(दि धनिनां वासः)

प्रासादो (देवभूभुजाम्) ॥ ९ ॥

सौधो (ऽस्त्री) राजसदनम्

उपकार्योपकारिका ।

स्वस्तिकः सर्वतोभद्रो नन्द्यावर्त्ता-(दयो ऽपि च) ॥ १० ॥

विच्छन्दकः (प्रभेदा हि भवल्लोश्वरसङ्घनाम्) ।

(स्त्र्यागारं भूभुजाम्) अन्तःपुरं (स्याद्) अवरोधनम् ॥ ११ ॥

गुह्यान्त (श्चा) ऽवरोध (श्च)

(स्याद्) अट्टः क्षौम (मस्त्रियाम्) ।

प्रघाण प्रघणालिन्दा (बहिर्द्वारप्रकोष्ठके) ॥ १२ ॥

गृहावग्रहणी देहल्य-

ऽङ्गनं चत्वराऽजिरे ।

(अधस्ताद्दारुणि) शिला

नासा (दारूपरि स्थितम्) ॥ १३ ॥

प्रच्छन्नमन्तर्द्वारं (स्यात्)

पक्षद्वारं (तु) पक्षकः ।

जलौक नीभ्र पटलप्रान्ते

(ऽथ) पटलं छदिः ॥ १४ ॥

गोपानसी (तु) वलभौ (छादने वक्रदारुणि) ।

कपोतपालिकायां (तु) विटङ्कं (पुंनपुंसकम्) ॥ १५ ॥

(स्त्री) द्वार्द्वारं प्रतीहारः

(स्याद्) वितर्दिं (स्तु) वेदिका ।

तोरणो (ऽस्त्री) बहिर्द्वारं

पुरद्वारं (तु) गोपुरम् ॥ १६ ॥

(कूटं पूर्द्वारि यत्) हस्तिनख (स्तस्मिन्)

(अथ त्रिषु) ।

कपाटमरारं (तुल्ये)'

(तद्विष्कम्भे) ऽर्गलं (न ना) ॥ १७ ॥

आरोहणं (स्यात्) सोपानं

निःश्रेणि (स्त्र) धिरोहिणी ।

सम्मार्जनी शोधनी (स्यात्)

सङ्करो ऽवकर (स्तया) ॥१८॥

(क्लिशे)

मुखं निःसरणं

सन्निवेशो निकर्षणम् ।

(समौ) संवसथ ग्रामौ

वेश्मभूर्वास्तु (रस्त्रियाम्) ॥ १९ ॥

ग्रामान्त उपश्रल्यं (स्यात्)

सीमसीमे (स्त्रियामुभे) ।

घोष आभीरपल्लौ (स्यात्)

पक्कणः शवरालयः ॥ २० ॥

इति पुरवर्गः ।

अथ पर्वतवर्गः ।

महीध्रे शिखरि-च्माभृदहार्य्य धर पर्वताः ।
अद्रि गोत्र गिरि ग्रावाचल शैल शिलोच्चयाः ॥ १ ॥
लोकालोकश्चक्रवाल
स्त्रिकूटस्त्रिककुत् (समौ) ।
अस्त (स्तु) चरमच्माभृद्
उदयः पूर्वपर्वतः ॥ २ ॥
हिमवान्निषधो ञिम्ध्यो माल्यवान् पारियात्रकः ।
गन्धमादन (मन्ये) च हेमकूटा-(दयो नगाः) ॥ ३ ॥
पाषाण प्रस्तर ग्रावोपलाश्मानः शिला दृषत् ।
कूटो (ऽस्त्री) शिखरं शृङ्गं
प्रपात (स्त्व)-तटो भृगुः ॥ ४ ॥
कटको (ऽस्त्री नितम्बो ऽद्रेः)
स्नुः प्रस्थः सानु- (रस्त्रियौ) ।
उत्सः प्रस्रवण
(वारिप्रवाहो) निर्झरो झरः ॥ ५ ॥
दरी (तु) कन्दरो (वा स्त्री)
(देवखात विले) गुहा ।
गह्वरं
गण्डशैला (स्तु च्युताः स्थूलोपला गिरेः) ॥ ६ ॥
खनिः (स्त्रियाम्) आकरः (स्यात्)
पादाः प्रत्यन्तपर्वताः ।
उपत्यका (ऽद्रेरासन्ना भूमिर्)
(ऊर्ध्वम)-धित्यका ॥ ७ ॥
धातु (र्मनः शिलाद्यद्रेर्)

गैरिकं (तु विशेषतः) ।
निकुञ्ज कुञ्जौ (वा क्लीवे लतादिपिहितोदरे ॥ ८ ॥
इति पर्वतवर्गः ।

अथ वनौषधिवर्गः ।

अटव्यरण्यं विपिनं गहनं काननं वनम् ।
महारण्यमरण्यानौ
गृहारामा (स्तु) निष्कुटाः ॥ १ ॥
आरामः (स्याद् उपवनं (कृत्रिमं वनमेव तत्) ।
(अमात्यगणिका गेहोपवने) वृक्षवाटिका ॥ २ ॥
(पुमाना)-क्रीड़ उद्यानं (राज्ञः साधारणं वनम्) ।
(स्यादेतदेव) प्रमदवन (मन्तः पुरोचितम्) ॥ ३ ॥
वीथ्यालिरावलिः पङ्क्तिः श्रेणी
लेखा (स्तु) राजयः ।
वन्या वनसमूहे (स्याद्)
अङ्कुरो ऽभिनवोद्भिदि ॥ ४ ॥
वृक्षो महीरुहः शाखी विटपी पादपस्तरुः ।
अनोकहः कुटः सालः पलाशी द्रु द्रुमागमाः ॥ ५ ॥
वानस्पत्यः (फलैः पुष्पात्)
(तैरपुष्पाद्) वनस्पतिः ।
ओषध्यः (फलपाकान्ताः)
(स्याद्) अवन्ध्यः फलेग्रहिः ॥ ६ ॥
वन्ध्यो ऽफलो ऽवकेशी (च)
फलवान् फलिनः फली ।
प्रफुल्लोत्फुल्ल संफुल्ल व्याकोष विकच स्फुटाः ॥ ७ ॥

फुल्ल (स्यैते) विकसिते (स्युर्)

(अवन्ध्यादय स्त्रिषु) ॥ ८ ॥

स्थाणु (र्वा ना) ध्रुवः शङ्कुः

(क्षुपशाखाशिफः) क्षुपः ।

(अप्रकाण्डे) स्तम्ब गुल्मौ

वल्ली (तु) व्रततिर्लता ।

(लता प्रतानिनी) वीरुद्गुल्मिन्युलप (इत्यपि) ॥ ९ ॥

(नगाद्यारोह) उच्छ्राय उत्सेध (श्वो) च्छ्रय (श्व मः) ।

(अस्त्री) प्रकाण्डः स्कन्धः (स्यान्मूलाच्छाखावधेस्तरोः) ॥ १० ॥

(समे) शाखा लते

स्कन्धशाखा शाले

शिफा जटे ।

(शाखाशिफा) ऽवरोहः (स्यात्)

(मूलाच्छाखं गता) लता ॥ ११ ॥

शिरो ऽग्रं शिखरं (वा ना)

मूलं ब्रध्नो (ऽङ्घ्रिनामकः) ।

सारो मज्जा (समौ)

त्वक् (स्त्री) वल्कं वल्कलम् (मस्त्रियाम्) ॥ १२ ॥

काष्ठं दार्वे-

इन्धनं (त्वे) ध इध्ममिधः समित् (स्त्रियाम्) ।

निष्कुहः कोटरं (वा ना)

वल्लरिर्मञ्जरिः (स्त्रियौ) ॥ १३ ॥

पत्रं पलाशं छदनं दलं पर्ण छदः (पुमान्) ।

पल्लवो (ऽस्त्री) किसलयं

विस्तारो विटपो (ऽस्त्रियाम्) ॥ १४ ॥

(वृक्षादीनां) फलं शस्यं

द्वन्तं प्रसवबन्धनम् ।

(आमि फले) शलाटुः (स्यात्)

(शुष्के) वान (सुभे त्रिषु) ॥ १५ ॥

चारको जालकं (क्लीवे)

कलिका कोरकः (पुमान) ।

(स्यात्) गुच्छक (स्तु) स्तवकः

कुड्मलो मुकुलो (ऽस्त्रियाम्) ॥ १६ ॥

(स्त्रियः) सुमनसः पुष्पं प्रसूनं कुसुमं (समम्) ।

मकरन्दः पुष्परसः

परागः सुमनोरजः ॥ १७ ॥

(द्विहीनं प्रसवे सर्वं हरीतक्यादयः स्त्रियाम्) ।

आश्वत्थ वैणव प्लाक्ष न्यग्रोधोडुम्बरं (फले) ॥ १८ ॥

वाऽहेतं (च)

(फले जम्बा) जम्बूः (स्त्री) जम्बु जाम्बवम् ।

(पुष्पे जातीप्रभृतयः स्वलिङ्गा व्रीहयः फले ॥ १९ ॥

विदार्यादयस्तु मूले ऽपि)

(पुष्पे क्लीवे ऽपि) पाटला ॥ २० ॥

बोधिद्रुमश्चलदलः पिप्पलः कुञ्जराशनः ।

अश्वत्थे

(ऽथ) कपित्थे (स्युः) दधित्थ ग्राहि मन्मथाः ॥ २१ ॥

(तस्मिन्) दधिफलः पुष्पफलदन्तशठा (वपि) ।

उदुम्बरं जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ॥ २२ ॥

कोविदारे चमरिकः कुद्दालो युगपत्रकः ।

सप्तपर्णो विशालत्वक् शारदो विषमच्छदः ॥ २३ ॥

आरग्वधे राजवृक्ष सम्पाक चतुरङ्गुलाः ।

आरेवत व्याधिघात क्षतमाल सुवर्णकाः ॥ २४ ॥

(स्युः) जम्बीरे दन्तशठ जम्भ जम्भीर जम्भलाः ।
वरुणो वरणः सेतुस्तिक्तशाकः कुमारकः ॥ २५ ॥
पुन्नागे पुरुषस्तुङ्गः केसरो देववल्लभः ।
पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः ॥ २६ ॥
तिनिशे स्यन्दनो नेमौ रथद्रुरतिमुक्तकः ।
वञ्जुलश्चित्रकश्च् (चा
ऽथ द्वौ) पीतन कपीतनौ ॥ २७ ॥
आम्रातके
मधूके (तु) गुड़पुष्प मधुद्रुमौ ।
वानप्रस्थ मधुष्ठीलौ
(जलजे ऽच) मधूलकः ॥ २८ ॥
पीलौ गुडफलः सर्मी
(तस्मिंस्तु गिरिसम्भवे) ।
अक्षोड़ कन्दरालौ (द्वा-)
वङ्कोठे (तु) निकोचकः ॥ २९ ॥
पलाशे किंशुकः पर्णी वातपोथौ
(ऽथ) वेतसे ।
रथा ऽभ्रपुष्प विदुल शीत वानीर वञ्जुलाः ॥ ३० ॥
(द्वौ) परिव्याधविदुलौ नादेयौ (चा) म्बुवेतसे ।
शोभाञ्जन शिग्रु तीक्ष्णगन्धकाक्षौव मोचकाः ॥ ३१ ॥
(रक्तो ऽसौ) मधुशिग्रुः (स्याद्)
अरिष्टः फेनिलः (सर्मी) ।
विल्वे शाण्डिल्य शैलूषौ मालूर श्रीफला (वपि) ॥ ३२ ॥
प्लक्षो जटी पर्कटी (स्यात्)
न्यग्रोधो बहुपाद्वटः ।
गालवः शावरो लोध्रस्तिरीटस्तिल्व मार्जनौ ॥ ३३ ॥

आम्रश्चूतो रसालो
(ऽसौ) सहकारो (ऽतिसौरभः)।
कुम्भोलूखलकं (क्लीवे) कौशिको गुग्गुलुः पुरः ॥ ३४ ॥
श्लेलुः श्लेष्मातकः श्रीत उद्दालो बहुवारकः।
राजादनं पियाल (श्च) सन्नकद्रुर्धनुः पटः ॥ ३५ ॥
गम्भारी सर्वतोभद्रा काश्मरी मधुपर्णिका।
श्रीपर्णी भद्रपर्णी (च) काश्मर्य्य (श्वा प्य)
(ऽथ द्वयोः) ॥३६॥

कर्कन्धूर्बदरी कोलिः
कोलं कुवल फेनिले।
सौवीरं बदरं घोण्टा (ऽप्य-)
(ऽथ स्यात्) स्वादुकण्टकः ॥ ३७ ॥
विकङ्कतः सुवाह्वक्षो ग्रन्थिलो व्याघ्रपाद-(पि)।
गरावतो नागरङ्गो नादेयो भूमिजम्बुका ॥ ३८ ॥
तिन्दुकः स्फूर्जकः कालस्कन्ध (श्च) श्रितिसारके।
काकेन्दुः कुलकः काकतिन्दुकः काकपीलुके ॥ ३९ ॥
गोलीढ़ो भाटलो घण्टापाटलिर्मोच्च मुष्ककौ।
तिलकः क्षुरकः श्रीमान्
(समौ) पिचुल भावुकौ ॥ ४० ॥
श्रीपर्णिका कमुदिका कुम्भी कैटर्य्य कट्फलौ।
क्रमुकः पट्टिका (ख्यः स्यात्) पट्टी लाक्षाप्रसादनः ॥४१॥
नूद (स्तु) पूषः क्रमुको ब्रह्मण्यो ब्रह्मदारु (च)।
तूलं (च)
नीप प्रियक कदम्बा (स्तु) हलिप्रिये ॥ ४२ ॥
वीरवृक्षो ऽरुष्करो ऽग्निमुखो भल्लातको (त्रिषु)।
गर्दभाण्डे कन्दराल कपीतन सुपार्श्विकाः ॥ ४३ ॥

म्लक्क (स्व)

तिन्तिड़ी चिञ्चा ऽम्लिका-

(ऽथ) पीतसालके ।

सर्ज्जका ऽसन बन्धूकपुष्प प्रियक जीवकाः ॥ ४४ ॥

साले (तु) सर्ज कार्ष्या ऽश्वकर्णकाः शस्यसंवरः ।

नदीसर्जो वीरतरुरिन्द्रद्रुः ककुभो ऽर्जुनः ॥ ४५ ॥

राजादन फलाध्यक्षे चौरिकायाम्

(अथ द्वयोः) ।

इङ्गुदी-तापसतरुः

भूर्जे चर्मि मृदुत्वचौ ॥ ४६ ॥

पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलि (र्द्वयोः) ।

पिच्छा (तु) शाल्मलीवेष्टे

रोचनः कूटशाल्मलिः ॥ ४७ ॥

चिरबिल्वो नक्तमालः करज (स्व) करञ्जके ।

प्रकीर्य्यः पूतिकरजः पूतिकः कलिमारकः ॥ ४८ ॥

(करञ्जभेदाः) षड्ग्रन्थो मर्कव्यङ्गारवल्लरी ।

रोही रोहितकः प्लीहशत्रुर्दाड़िमपुष्पकः ॥ ४९ ॥

गायत्री बालतनयः खदिरो दन्तधावनः ।

अरिमेदो विट्खदिरे

कदरः (खदिरे सिते) ॥ ५० ॥

सोमवल्को (ऽप्य-)

(ऽथ) व्याघ्रपुच्छ गन्धर्वहस्तकौ ।

एरण्ड उरुवूक (स्व) रुचकश्चिचक (स्व सः) ॥ ५१ ॥

चक्षुः पश्वाङ्गुलो मण्ड वर्द्धमान व्यडम्बकाः ।

(अल्पा शमी) शमीरः (स्यात्)

शमी सक्तुफला शिवा ॥ ५२ ॥

पिण्डीतको मरुवकः खसनः करहाटकः ।
शल्य (स्व) मदने
शक्रपादपः पारिभद्रकः ॥ ५३ ॥
भद्रदारु द्रुकिलिमं पीतदारु (च) दारु (च) ।
पूतिकाष्ठं (च सप्त स्युः) देवदारुण्य-
(ऽथ द्वयोः) ॥ ५४ ॥
पाटलिः पाटला ऽमोघा काचस्थाली फलेरुहा ।
कृष्णहन्ता कुवेराक्षी
श्यामा (तु) महिला-(ह्वया) ॥ ५५ ॥
लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली ।
विष्वक्सेना गन्धफली कारम्भा प्रियक (स्व सा) ॥५६॥
मण्डूकपर्णं पत्रोर्णं नट कट्वङ्ग टुण्टुकाः ।
श्योनाक शुकनासर्क्षं दीर्घवृन्त कुटन्नटाः ॥ ५७ ॥
शोणक (श्वा-) ऽरलौ
तिष्यफला (त्वा-) मलकी (त्रिषु) ।
अमृता (च) वयःस्था (च)
(त्रिलिङ्ग (स्तु) विभीतकः ॥ ५८ ॥
अक्षस्तुषः कर्षफलो भूतवासः कलिद्रुमः ।
अभया (त्व) व्यथा पथ्या वयःस्था पूतना ऽमृता ॥ ५९ ॥
हरीतकी हैमवती चेतकी श्रेयसी शिवा ।
पीतद्रुः सरलः पूतिकाष्ठं (चा)
(ऽथ) द्रुमोत्पलः ॥ ६० ॥
कर्णिकारः परिव्याधो
लकुचो लिकुचो डहुः ।
पनसः कण्टकिफलो
निचुलो ऽम्बुज इज्जलः ॥ ६१ ॥

काकोडुम्बरिका फल्गु र्मलपूर्ज्जघनेफला ।
अरिष्टः सर्वतोभद्र हिङ्गुनिर्य्यास मालकाः ॥ ६२ ॥
पिचुमर्द (स्व) निम्बे
(ऽथ) पिच्छिला ऽगुरु शिंशपा ।
कपिला भस्मगर्भा (सा)
शिरीष (स्तु) कपीतनः ॥ ६३ ॥
भण्डिलो (प्य-)
(ऽथ) चाम्पेयश्चम्पको हेमपुष्पकः ।
(एतस्य कलिका) गन्धफली (स्याद्)
(अथ) केसरे ॥ ६४ ॥
वकुलो
वञ्जुलो ऽशोके
(समौ) करकदाड़िमौ ।
चाम्पेयः केसरो नागकेसरः काञ्चना- (ह्वयः) ॥ ६५ ॥
जया जयन्ती तर्क्कारी नादेयी वैजयन्तिका ।
स्रौपर्णमग्निमन्थः (स्यात्) कणिका गणिकारिका ॥ ६६ ॥
जयो
(ऽथ) कूटजः शक्रो वत्सको गिरिमल्लिका ।
(एतस्यैव) कलिङ्गेन्द्रयवं मद्रयवं (फले) ॥ ६७ ॥
कृष्णपाकफलाः ऽविघ्न सुषेणाः करमर्द के ।
कालस्कन्धस्तमालः (स्यात्) तापिञ्छो (ऽप्य-)
(ऽथ) सिन्दुकः ॥ ६८ ॥
सिन्दुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिके (त्यपि) ।
वेणी खरा गरी देवताड़ो जीमूत (इत्यपि) ॥ ६९ ॥
श्रीहस्तिनी (तु) भूतृणी
तृणशून्यं (तु) मक्षिका ।

भूपदी शीतभीरु- (स्व)

(सैवा-) स्फोता (वनोद्भवा) ॥७०॥

शेफालिका (तु) सुवहा निर्गुण्डी नीलिका (च सा) ।

(सितासौ) श्वेतसुरसा भूतवेश्य

(ऽथ) मागधी ॥ ७१ ॥

गणिका यूथिका ऽम्बष्ठा

(सा पीता) हेमपुष्पिका ।

अतिमुक्तः पुण्ड्रकः (स्यात्) वासन्ती माधवीलता ॥ ७२ ॥

सुमना मालती जातिः

सप्तला नवमालिका ।

माध्यं कुन्दं

रक्तक (स्तु) बन्धूको बन्धुजीवकः ॥ ७३ ॥

सहा कुमारी तरणिर्-

अम्लान (स्तु) महासहा ।

(तत्र शोणे) कुरुवक

(स्तत्र पीते) कुरुण्टकः ॥ ७४ ॥

(नीला झिण्टी द्वयोः) बाणा दासी (चा) ऽर्त्तगल (श्च सा) ।

सैरीयक (स्तु) झिण्टी (स्यात्)

(तस्मिन्) कुरवको (ऽरुणे) ॥ ७५ ॥

(पीता) कुरुण्टको (झिण्टी तस्मिन्) सहचरी (द्वयोः) ।

ओड्रपुष्पं जवा

वज्रपुष्पं (पुष्पं तिलस्य यत्) ॥ ७६ ॥

प्रतिहास ग्रतप्रास चण्डात द्वयमारकाः ।

करवीरे

करीरे (तु) क्रकर ग्रन्थिला (वुभौ) ॥ ७७ ॥

उन्मत्तः कितवो धूर्त्तो धुस्तूरः कनका (द्वयः) ।

मातुलो मदन (स्रा-)

(ऽस्य फले) मातुलपुत्रकः ॥ ७८ ॥

फलपूरो बीजपूरो रुचको मातुलुङ्गके ।

समीरणो मरुवकः प्रस्थपुष्पः फणिज्झकः ॥ ७९ ॥

जम्भीरो (म्य)

(ऽथ) पर्णासे कठिञ्जर कुठेरको ।

(सिते) ऽर्जको । ऽत्र)

पाठो (तु) चित्रको वह्नि (संज्ञकः) ॥८०॥

अर्का (ह्व) वसुक्रास्फोत मणरूप विकीरणाः ।

मन्दार (स्रा) ऽर्कपर्णे

(ऽत्र शुक्ले) ऽलर्कं प्रतापसौ ॥८१॥

शिवमल्ली पाशुपत एकाष्ठौलो वको वसुः ।

वन्दा वृक्षादनी वृक्षरुहा जीवन्तिके-(त्यपि) ॥ ८२ ॥

वत्सादनी छिन्नरुहा गुडूची तन्त्रिका ऽमृता ।

जीवन्तिका सोमवल्ली विशल्या मधुपर्ण्य-(पि) ॥ ८३ ॥

मूर्वा देवी मधुरसा मोरटा तेजनी सुवा ।

मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्य-(ऽपि) ॥ ८४ ॥

पाठा ऽम्बष्ठा विडङ्गर्णी स्थापनी ऽयसी रसा ।

एकाष्ठीला पापचेली प्राचीना वनतिक्तिका ॥ ८५ ॥

कटः कटम्बरा ऽशोकरोहिणी कटुरोहिणी ।

मत्स्यपित्ता कृष्णभेदी चक्राङ्गी शकुलादनी ॥ ८६ ॥

आत्मगुप्ता जडा ऽव्यण्डा कण्डुरा प्राव्हषायणी ।

ऋष्यप्रोक्ता शूकशिम्बिः कपिकच्छु (स्व) मर्कटी ॥ ८७ ॥

चित्रोपचित्रा न्यग्रोधी द्रवन्ती शम्बरी हृषा ।

प्रत्यक्श्रेणी सुतश्रेणी रण्डा मूषिकपर्ण्य (ऽपि) ॥ ८८ ॥

अपामार्गः शैखरिको धामार्गव मयूरकौ ।

प्रत्यक्पर्णी कौशपर्णी किणिही खरमञ्जरी ॥ ८८ ॥
फञ्जिका ब्राह्मणी पद्मा भार्गी ब्राह्मणयष्टिका ।
अङ्गारवल्ली बालेयशाक शर्वर वर्धकाः ॥ ८० ॥
मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्य-(ऽपि) ॥ ८१ ॥
यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः ।
रोदनी कच्छुरा ऽनन्ता समुद्रान्ता दुरालभा ॥ ८२ ॥
पृष्णिपर्णी पृथक्पर्णी चित्रपर्ण्यङ्गवल्लिका ।
क्रोष्टुविन्ना सिंहपुच्छी कलशिर्धावनिर्गुहा ॥ ८३ ॥
निर्दिग्धिका स्पृगी व्याघ्री बृहती कण्टकारिका ।
प्रचोदनी कुली क्षुद्रा दुःस्पर्शा राष्ट्रिके-(त्यपि) ॥ ८४ ॥
नीली काला क्रीतकिका ग्रामीणा मधुपर्णिका ।
रज्जनी श्योफली तुत्था द्रोणी दोला (च) नोलिनी ॥८५॥
अवल्गुजः सोमराजी सुवल्लिः सोमवल्लिका ।
कालमेषी कृष्णफला वाकुची पूतिफल्य-(ऽपि) ॥ ८६ ॥
कृष्णोपकुल्या वैदेही मागधी चपला कणा ।
उषणा पिप्पली शौण्डी काला
(ऽथ) कारिपिप्पली ॥ ८७ ॥
कपिवल्ली कोलवल्ली श्रेयसी वशिरः (पुमान्) ।
चव्य (न्तु) चविका
काकचिञ्ची गुञ्जे (तु) कृष्णला ॥ ८८ ॥
पलङ्कषा (त्वि) क्षुगन्धा श्वदंष्ट्रा स्वादुकण्टकः ।
गोकण्टको गोक्षुरको वनशृङ्गाट (इत्यपि) ॥ ८९ ॥
विश्वा विषा प्रतिविषा ऽतिविषोपविषा ऽरुणा ।
शृङ्गी महौषधं (चा-)
(ऽथ) क्षीरावी दुग्धिका (समे) ॥ १०० ॥

शतमूली बहुसुता ऽभीरुरिन्दीवरी वरी ।
ऋष्यप्रोक्ता भीरुपत्री नारायणः शतावरी ॥ १०१ ॥
अहेरः
(अथ) पीतद्रु कालेयक हरिद्रवः ।
दार्वी पचम्पचा दारुहरिद्रा पर्ज्जनी-(त्यपि) ॥ १०२ ॥
वचोग्रगन्धा षड्ग्रन्था गालोमो शतपर्विका ।
(शुक्ला) हैमवती
वैद्यमातृमिंह्यो (तु) वासिका ॥ १०३ ॥
वृषो ऽटरूषः सिंहास्यो वासको वाजिदन्तकः ।
आस्फोता गिरिकर्णी (स्यात्) विष्णुक्रान्ताऽपराजिता ॥१०४॥
इक्षुगन्धा (तु) काण्डेक्षु कोकिलाक्षेक्षुरक्षुराः ।
शालेयः (स्यात्) शीत शिवस्फूर्जा मधुरिका मिशी ॥१०५॥
मिश्रेया (प्य-)
(ऽथ) सौहृण्डो वज्रदुः स्नुक् स्नुही गुडा ।
मभन्तदुग्धा
(ऽथो) वेल्लममोघा चित्रतण्डुला ॥ १०६ ॥
तण्डुल (स्व) क्रिमिघ्न (स्व) विड्गं (पुंनपुंसकम्) ।
बला वाट्यालको
घण्टारवा (तु) शणपुष्पिका ॥ १०७ ॥
मृद्वीका गोस्तनी द्राक्षा स्वादौ मधुरसं- (ति च) ।
सर्वानुभूतिः सरला त्रिपुटा चिह्नता चिह्नत् ॥ १०८ ॥
त्रिभण्डी रोचनी
श्यामा पालिन्ध्यौ (तु) सुषेणिका ।
काला मसूरविदला ऽर्द्धचन्द्रा कालमेषिका ॥ १०९ ॥
मधुकं क्लीतकं यष्टिमधुका मधुयष्टिका ।
विदारी क्षीरशुक्लेक्षुगन्धा क्रोष्ट्री (च या शिता) ॥११०॥

(अन्या) चीरविदारी (स्यात्) महाश्वेतर्क्षगन्धिका ।
लाङ्गली शारदी तोयपिप्पली शकुलादनी ॥ १११ ॥
खराश्वा कारवी दीप्यो मयूरो लोचमस्तकः ।
गोपी श्यामा शारिवा (स्यात्) अनन्तोत्पलशारिवा ॥ ११२ ॥
योग्यस्यृद्धिः सिद्धि लक्ष्म्यौ
वृद्धे (रप्याह्वया इमे) ।
कदली वारणबुसा रम्भा मोचांशुमत्फला ॥ ११३ ॥
काष्ठीला
मुद्गपर्णी (तु) काकमुद्गा सहे (त्यपि) ।
वार्त्ताकी हिङ्गुली सिंही भण्टाकी दुष्प्रधर्षणी ॥ ११४ ॥
नाकुली सुरसा रास्ना सुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी च्छत्राकी सुवहा (च सा) ॥ ११५ ॥
विदारीगन्धांशुमती शालपर्णी स्थिरा ध्रुवा ।
तुण्डिकेरी समुद्रान्ता कर्पासी वदरे (ति च) ॥ ११६ ॥
भारद्वाजी (तु सा वन्या)
शृङ्गी (तु) वृषभो वृषः ।
गाङ्गेरुकी नागबला भृषा क्रुखगवेधुका ॥ ११७ ॥
धामार्गवो घोषकः (स्यात्)
महाजाली (स पीतकः) ।
ज्योत्स्नी पटोलिका जाली
नादेयी भूमिजम्बुका ॥ ११८ ॥
(स्यात्) लाङ्गलिक्यग्निशिखा
काकाङ्घ्री काकनासिका ।
गोधापदी (तु) सुवहा
मुसली तालमूलिका ॥ ११९ ॥
अजशृङ्गी विषाणी (स्यात्)

गोजिह्वा दार्विके (समे) ।
ताम्बूलवल्ली ताम्बूली नागवल्ल्य-(प्य-)
(ऽथ) हिजा ॥ १२० ॥
हरेणू रेणुका कौन्ती कपिला भस्मगन्धिनी ।
एलवालुकमैलेयं सुगन्धि हरिवालुकम् ॥ १२१ ॥
वालुकं (चा-)
(ऽथ) पालङ्क्यां मुकुन्दः कुन्द कुन्दुरू ।
बालं झीवेर वर्हिष्ठोदीच्यं (केशाम्बु नाम च) ॥ १२२ ॥
कालानुसार्य्येवृद्धा ऽश्मपुष्प शीतशिवानि (तु) ।
शैलेयं
तालपर्णी (तु) दैत्या गन्धकूटी मुरा ॥ १२३ ॥
गन्धिनी
गजभक्ष्या (तु) सुवहा सुरभी रसा ।
महेरणा कुन्दुरुकी शल्लकी ह्लादिनी- (ति च) ॥ १२४ ॥
अग्निज्वाला सुभिक्षे (तु) धातकी धातुपुष्पिका ।
पृथ्वीका चन्द्रवालैला निष्कुटिर्बहुला-
(ऽथ सा) ॥ १२५ ॥
(सूक्ष्मोप) कुञ्चिका तुल्या कोरङ्गी त्रिपुटा त्रुटिः ।
व्याधिः कुष्ठं पारिभाव्यं वाप्यं पाकलमुत्पलम् ॥ १२६ ॥
शङ्खिनी चोरपुष्पी (स्यात्) केशिन्यर्क-
(ऽथ) वितुन्नकः ।
झटाऽमलाऽज्झटा ताली शिवा तामलकी-(ति च) ॥१२७॥
अपौण्डरीकं पुण्ड्र्यम्
(अथ) तुन्नः कुवेरकः ।
कुणिः कच्छः कान्तलको नन्दिवृक्षो
(ऽथ) राजसी ॥ १२८ ॥

चण्डा धनहरी चेम दुष्पत्र गणहासकाः ।
खाडायुधं व्याघ्रनखं करजं चक्रकारकम् ॥ १२८ ॥
शुषिरा विद्रुमलता कपोताङ्घ्रिर्नटी नली ।
धमन्यष्ठनकेशी (च) हनुहट्टविलासिनी ॥ १३० ॥
शुक्तिः शङ्खः खुरः कोलदलं नखम्
(अथा) ढकी ।
काञ्ची मृत्स्ना तुवरिका मृतालक सुराष्ट्रजे ॥ १३१ ॥
कुटन्नटं दाशपुरं वानेयं परिपेलवम् ।
प्लव गोपुर गोनर्द कैवर्त्तिमुस्तकानि (च) ॥ १३२ ॥
ग्रन्थिपर्णं शुकं वर्हिपुष्पं स्थौणेय कुक्कुरे ।
मरुन्माला (तु) पिशुना स्पृक्का देवी लता लघुः ॥ १३३ ॥
समुद्रान्ता बधूः कोटिवर्षा लङ्गोपिके-(त्यपि) ।
तपस्विनी जटामांसी जटिला लोमशा मिसी ॥ १३४ ॥
त्वक्पत्रमुत्कटं भृङ्गं त्वचं चोचं वराङ्गकम् ।
कर्चूरको द्राविड़कः काल्पको वेधमुख्यकः ॥ १३५ ॥
ओषध्यो (जातिमात्रे स्युः)
(अजातौ सर्वम्) औषधम् ।
शाका-(ख्यं पत्र पुष्पादि)
तण्डुलीयो ऽल्पमारिषः ॥ १३६ ॥
विशल्या ऽग्निशिखा ऽनन्ता फलिनी शक्रपुष्पय-(ऽपि) ।
(स्यात्) ऋक्षगन्धा कृगलान्त्रावेगी हडदारुकः ॥ १३७ ॥
जङ्गो
ब्राह्मी (तु) मत्स्याक्षी वयस्था सोमवल्लरी ।
पट्टपर्णी हैमवती स्वर्णक्षीरी हिमावती ॥ १३८ ॥
हयपुच्छो (तु) काम्बोजी मासपर्णी महासहा ।
तुण्डिकेरी रक्तफला बिम्बिका पीलुपर्ण्य-(ऽपि) ॥ १३९ ॥

वर्वरा कवरी तुङ्गी खरपुष्पा ऽजगन्धिका ।
एलापर्णी (तु) सुवहा राखा युक्तरसा (च सा) ॥१४०॥
चाङ्गेरी चुक्रिका दन्तशठा ऽम्बष्ठा ऽम्लवेतसः ।
सहस्रवेधौ चक्रो ऽम्लवेतसः शतवेध्य-(ऽपि) ॥ १४१ ॥
नमस्कारी गण्डकालो समङ्गा खदिरौ-(त्यपि) ।
जीवन्तौ जीवनो जीवा जीवनीया मधु (श्च सा) ॥ १४२ ॥
कूर्चशीर्षौ मधुरकः शृङ्ग क्रस्वाङ्ग जीवकाः ।
किराततिक्तो भूनिम्बो ऽनार्यतिक्तो-
(ऽथ) समला ॥१४३॥
विमला सातला भूरिफेना चर्मकषे-(त्यपि) ।
वायसोली स्वादुरसा वयस्या
(ऽथ) मकूलकः ॥ १४४ ॥
निकुम्भो दन्तिका प्रत्यक्श्रेण्युदुम्बरपर्ण्ये-(ऽपि) ।
अजमोदा (तू) ग्रगन्धा
ब्रह्मदर्भा यवानिका ॥ १४५ ॥
(मूले) पुष्कर काश्मीर पद्मपत्राणि (पौष्करे) ।
अव्यथा ऽतिचरा पद्मा चारटी पद्मचारिणी ॥ १४६ ॥
काम्पिल्लः कर्कशश्चन्द्रो रक्ताङ्गी रोचनी (त्यपि) ।
प्रपुन्नाड (स्त्वे) डगजा दद्रुघ्नश्चक्रमर्दकः ॥ १४७ ॥
पद्माट उरणाक्ष (श्च)
पलाण्डु (स्तु) सुकन्दकः ।
लताकं दुद्रुमौ (तत्र हरिते)
(ऽथ) महौषधम् ॥ १४८ ॥
लशुनं गृञ्जना ऽरिष्ट महाकन्द रसोनकाः ।
पुनर्नवा (तु) शोथघ्नी
वितुन्नं सुनिषण्णकम् ॥ १४९ ॥

(स्यात्) वातकः शीतलो ऽपराजिता ऽग्निपर्ण्य-(ऽपि) ।
पारावताङ्घ्रिः कटभी पर्ण्या ज्योतिष्मती लता ॥ १५० ॥
वार्षिकं चायमाणा (स्यात्) त्रायन्ती बलभद्रिका ।
विष्वक्सेनप्रिया गोष्टिर्वाराह्यौ वदरे-(त्यपि) ॥ १५१ ॥
मार्कवो भृङ्गराजः (स्यात्)
काकमाची (तु) वायसी ।
शतपुष्पा सितच्छत्रा ऽतिच्छत्रा मधुरा मिसिः ॥ १५२ ॥
अवाक्पुष्पौ कारवी (च)
सरणा (तु) प्रसारणी ।
(तस्यां) कटम्भरा राजवला भद्रवल्ले-(ति च) ॥ १५३ ॥
जनी जतूका रजनी जतुश्चक्रवर्त्तिनी ।
सस्पर्शा
(ऽथ) शटी गन्धमूली षड्ग्रन्थिके (त्यपि) ॥ १५४ ॥
कर्वूरी (ऽपि) पलाशी
(ऽथ) कारवेल्लः कटिल्लकः ।
सुषवी (चा
ऽथ) कुलकं पटोलस्तिक्तकः पटुः ॥ १५५ ॥
कुष्माण्डकं (स्तु) कर्कारुः
इर्वारुः कर्कटी (स्त्रियाम्) ।
इक्ष्वाकुः कटुतुम्बी (स्यात्)
तुम्बलाबू (रुमे समे) ॥ १५६ ॥
चित्रा गवाक्षी गोडम्बा
विशाला (त्वि) न्द्रवारुणी ।
अर्शोघ्नः शूरणः कन्दो
गण्डीर (स्तु) समष्ठिला ॥ १५७ ॥
कलम्बुश्पोदिका (स्त्री तु) मूलकं हिलमोचिका ।

वास्तूकं (शाकभेदाः स्युः)
दूर्वा (तु) शतपर्विका ॥ १५८ ॥
सहस्रवीर्य्या मार्गव्यौरुहाऽनन्ता
(ऽथ सा मिता) ।
गोलोमी शतवीर्य्या (च) गण्डाली शकुलाद्दकः ॥ १५९ ॥
कूरुविन्दो मेघ (नामा) मुस्ता मुस्तक (मस्त्रियाम्) ।
स्याद् भद्रमुस्तको गुन्द्रा
चूड़ाला चक्रनोच्चटा ॥ १६० ॥
वंशे त्वक्सार कर्मार त्वक्सार तृणध्वजाः ।
शतपर्वा यवफलो वेणु मस्कर तेजनाः ॥ १६१ ॥
(वेणवः) कीचका (स्ते स्युर्ये स्वनन्त्यनिलोद्धताः) ।
ग्रन्थि र्नी) पर्वपरुषी
गुन्द्रस्तेजनकः शरः ॥ १६२ ॥
नड (स्तु) धमनः पोटगलो
(ऽथ) काश (मस्त्रियाम्) ।
इक्षुगन्धा पोटगलः
(पुंसि भूम्नि तु) वल्वजाः ॥ १६३ ॥
रसाल इक्षु-
(स्तद्भेदाः) पुण्ड्र कान्तारका (दयः) ।
(स्यात्) वीरणं वीरतरं
(मूलेऽस्यो)-शीर (मस्त्रियाम्) ॥ १६४ ॥
अभयं नलदं सेव्यमसृणालं जलाशयम् ।
लामज्जकं लघुलयमवदाहिष्टकापथे ॥ १६५ ॥
(नलादय·) स्तृणं (गर्मुत्श्यामाकप्रमुखा अपि) ।
(अस्त्री) कुशं कुथो दर्भः पवित्रम्
(अथ) कत्तृणम् ॥ १६६ ॥

पौर सौगन्धिक ध्याम देवजग्धक रौहिषम् ।
छत्वा ऽतिछत्र पालघ्नी
मालातृणक भूस्तृणि ॥ १६७ ॥
शष्पं बालतृणं
घासो यवस-
स्तृणमर्जुनम् ।
(तृणानां संहति-) स्तृण्या
नड्या (तु नडसंहतिः) ॥१६८॥
तृणराजा (ह्वय-) स्तालो
नारिकेर (स्तु) लाङ्गली ।
घोण्टा (तु) पूगः क्रमुको गुवाकः खपुरो
(ऽस्य तु ॥ १६९ ॥
फलम्) उडुंबरम्
(एते च) हिन्ताल (सहितास्त्रयः) ।
खर्जूरः
केतकी
तालो
खर्जूरी (च) तृणद्रुमाः ॥ १७० ॥
इति वनौषधिवर्गः ।

अथ पशुवर्गः ।

सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः ।
शार्दूल द्वीपिनौ व्याघ्रे
तरक्षु (स्तु) मृगादनः ॥ १ ॥
वराहः शूकरो घृष्टिः कोलः पोतौ किरः किटिः ।

दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार (इत्यपि) ॥ २ ॥
कपि प्लवङ्ग प्लवग शाखामृग वलीमुखाः ।
मर्कटो वानरः कीशो वनौका
(अथ) भल्लुके ॥ २ ॥
ऋक्षाऽच्छभल्ल भाल्लूका
गण्डके खड्ग खड्गिनौ ।
लुलापो महिषो वाहदिषत्कासर सैरिभाः ॥ ४ ॥
(स्त्रियां) शिवा भूरिमाय गोमायु मृगधूर्त्तकाः ।
शृगाल वञ्चक क्रोष्टृ फेरु फेरव जम्बुकाः ॥ ५ ॥
ओतुविडालो मार्जारो द्वषदंशक आखुभुक् ।
(चयो) गोधर गोधार गोधेया गोधिकात्मजे ॥ ६ ॥
श्वावित् (तु) शल्य-
(स्त्रीत्रि) शल्ली शल्लं शल्लम् ।
वातप्रमीवातमृगः
कोक ईक्षामृगो वृकः ॥ ७ ॥
मृग कुरङ्ग वाताय हरिणा ऽजिनयोनयः ।
हरिणयम् (एण्याश्चर्माद्यम्)
(एणस्यै) णम् (उभे त्रिषु) ॥ ८
कदली कन्दली चीनश्चमूरु प्रियका (वपि) ।
ममरु श्वेति हरिणा अमी अजिनयोनयः ॥ ९ ॥
कृष्णसार रुरु न्यङ्कु रङ्कु शम्बर रोहिषाः ।
गोकर्ण पृषतैणेय रोहिताश्वमरो (मृगाः) ॥ १० ॥
गन्धर्वः शरभो रामः सृमरो गवयः शशः ।
(इत्यादयो मृगेन्द्राद्याः) (गवाद्याः पशु-जातयः) ॥ ११ ॥
उन्दुरुर्मूषिको (प्या ; खु-
गिरिका बालमूषिका ॥

सरटः कृकलासः (स्यात्)
मुसली गृहगोधिका ॥ १२ ॥
लूता (स्त्री) तन्तुवायोर्णनाभ मर्कटकाः (समाः) ।
नीलङ्गु (स्तु) कृमिः
कर्णजलौकाः शतपद्यु-(भे) ॥ १३ ॥
दृश्विकः शूककीटः (स्यात्)
अलि द्रोणौ (तु) दृश्विके ।
पारावतः कलरवः कपोतो
(ऽथ) शशादनः ॥ १४ ॥
पक्षी श्येन
उलूके (तु) वायसाराति पेचकौ ।
व्याघ्राटः (स्यात्) भरद्वाजः
खञ्जरीट (स्तु) खञ्जनः ॥ १५)
लोहपृष्ठ (स्तु) कङ्कः (स्यात्)
(अथ) चाषः किकीदिविः ।
कलिङ्ग भृङ्ग धूम्याटा
(अथ स्यात्) शतपत्रकः ॥ १६ ॥
दार्वाघाटो
(ऽथ) सारङ्गः स्तोककश्वातकः (समाः) ।
कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः ॥ १७ ॥
चटकः कलविङ्कः (स्यात्)
(तस्य स्त्री) चटका
(तयोः ।
पुमपत्ये) चाटकैरः (स्त्यपत्ये) चटकै-(व हि) ॥ १८ ॥
कर्करिटुः करिटुः (स्यात्)
कृकण कृकरौ (समौ) ।

घनप्रियः परभृतः कोकिलः पिक (इत्यपि) ॥ १९ ॥
काके (तु) करटाऽरिष्ट वलिपुष्ट सक्तप्रजाः ।
ध्वाङ्क्षात्मघोष परभृद्बलिभुग्बायसा (अपि) ॥ २० ॥
द्रोणकाक (स्तु) काकोलो
दात्यूहः कालकण्ठकः ।
आताम्रचिल्लौ
दात्याय्य गृध्रौ
कौर शुकौ (समौ) ॥ २१ ॥
क्रुङ् क्रौञ्चौ
(ऽथ) वकः कङ्कः
पुष्करा (ह्वस्तु) सारसः ।
कोकश्चक्रश्चक्रवाको रथाङ्गा (-ह्वयनामकः) ॥ २२ ॥
कादम्बः कलहंसः (स्यात्)
उत्क्रोश कुररौ (समौ) ।
हंसा (स्तु) श्वेतगरुत्मश्चक्राङ्गा मानसौकसः ॥ २३ ॥
राजहंसा (स्तु ते चञ्चुचरणैर्लोहिते: सिताः) ।
(मलिनै) र्मल्लिका (ख्या स्ते) धार्त्तराष्ट्राः (सितेतरैः) ॥२४॥
शरारिराटिरोडि (श्व)
वलाका विसकण्ठिका ।
(हंसस्य योषित्) वरटा
(सारसस्य तु) लक्ष्मणा ॥ २५ ॥
जतुकाजिनपत्रा (स्यात्)
परोष्णी तैलपायिका ।
वर्वणा (मक्षिका नीला)
सरघा मधुमक्षिका ॥ २६ ॥
पतङ्गिका पुत्तिका (स्याद्)

दंश: (तु) वनमक्षिका ।
दंशी (तज्जातिरल्पा स्याद्)
गन्धोली वरटा (द्वयोः) ॥२७॥
भृङ्गारी झीरुका चीरी झिल्लिका (च समा इमाः) ।
(समौ) पतङ्गशलभौ
खद्योतो ज्योतिरिङ्गणः ॥ २८ ॥
मधुव्रतो मधुकरो मधुलिट् मधुपाऽलिनः ।
द्विरेफ पुष्पलिट् भृङ्ग षट्पद भ्रमराऽलयः ॥ २९ ॥
मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक् ।
शिखावलः शिखी केकी मेघनादानुलास्य-(ऽपि) ॥ ३० ॥
केका (वाणी मयूरस्य)
(समौ) चन्द्रक मेचकौ ।
शिखा चूड़ा
शिखण्डः (तु) पिच्छ बर्हे (नपुंसके) ॥ ३१॥
खगे विहङ्ग विहग विहङ्गम विहायसः ।
शकुन्ति पत्रि शकुनि शकुन्त शकुन द्विजाः ॥ ३२ ॥
पतत्रि पत्रि पतग पतत्पत्ररथाऽण्डजाः ।
नगौको वाजि विकिर वि विष्किर पतत्रयः ॥ ३३ ॥
नीडोऽस्त्रियां गरुत्मन्तः पित्तमन्तो नभसङ्गमाः ।
(तेषां विशेषा) हारितो भृङ्गः कारण्डवः प्लवः ॥ ३४ ॥
तित्तिरिः ककुभो लावो जीवञ्जीवः चकोरकः ।
कोयष्टिकः टिट्टिभको वर्त्तको वर्त्तिका (दयः) ॥ ३५ ॥
गरुत्पत्तच्छदाः पत्रं पतत्र (श्च) तनूरुहम् ।
(स्त्री) पत्रतिः पक्षमूलं
चक्षुः त्रोटि-(रुभे स्त्रियौ) ॥३६॥
प्रडीनोड्डीन संडीना-(न्येताः खगगतिक्रियाः) ।

पेशी कोषी (द्विहीने) ऽण्डं
कुलायो नीड़ (मस्त्रियाम्) ॥३७॥
पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः ।
(स्त्री पुंसौ) मिथुनं द्वन्द्वं
युग्मं (तु) युगलं युगम् ॥ ३८ ॥
समूह निवह व्यूहसन्दोह विसर व्रजाः ।
स्तोमीय निकर व्रात वार सङ्घात सञ्चयाः ॥ ३९ ॥
समुदायः समुदयः समवायश्च यो गणः ।
(स्त्रियां तु) संहतिर्वृन्दं निकुरुम्बं कदम्बकम् ॥ ४० ॥
(वृन्दभेदाः समैः) वर्गः
सङ्घ सार्थौ (तु जन्तुभिः) ।
(सजातीयैः) कुलं
यूथं (तिरश्चां पुंनपुंसकम्) ॥ ४१ ॥
(पशूनां) समजो
(ऽन्येषां) समाजो
(ऽथ सधर्मिणाम्) ।
(स्यात्) निकायः
(पुञ्ज राशी) तूत्करः कूट (मस्त्रियाम्) ॥४२॥
कापोत शौकः मायूर तैत्तिरा (दीनि तद्गणे) ।
(गृहासक्ताः पक्षिमृगाः) छेका (स्ते) गृह्यका (श्व ते) ॥४३॥

इति पशुवर्गः ।

अथ नरवर्गः ।

मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ।
(स्युः) पुमांसः पञ्चजनाः पुरुषाः पूरुषाः नरः ॥ १

स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः ।
प्रतीपदर्शिनी वामा वनिता महिला (तथा) ॥ २ ॥
(विशेषाश्च)-ङ्गना भीरुः कामिनी वामलोचना ।
प्रमदा भाविनी कान्ता ललना (च) नितम्बिनी ॥ ३ ॥
सुन्दरी रमणी रामा
कोपना (सैव) भामिनी ।
वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी ॥ ४ ॥
(कृताभिषेका) महिषी
भोगिन्यो (ऽन्या नृपस्त्रियः) ।
पत्नी पाणिगृहीती (च) द्वितीया सहधर्मिणी ॥ ५ ॥
भार्य्या जाया (ऽथ पुंभूम्नि) दाराः
(स्यात्तु) कुटुम्बिनी ।
पुरन्ध्री
सुचरित्रा (तु) सती साध्वी पतिव्रता ॥ ६ ॥
कृतसापत्निका ऽध्यूढ़ा ऽधिविन्ना
(ऽथ) स्वयम्वरा ।
पतिम्बरा (च) वर्य्या-
(ऽथ) कुलस्त्री कुलपालिका ॥ ७ ॥
कन्या कुमारी
गौरी (तु) नग्निका ऽनागतार्त्तवा ।
(स्यात्) मध्यमा हृष्टरजाः
तरुणी युवतिः (समे) ॥ ८ ॥
(समाः) स्नुषा जनी वध्वः
चिरण्टी (तु) सुवासिनी ।
इच्छावती कामुका (स्यात्)
हृषद्यन्ती (तु) कामुकी ॥ ९ ॥

(कान्तार्थिनी तु या याति सङ्केतं सा)ऽभिसारिका ।
पुंश्चली धर्षिणी बन्धक्यसती कुलटेत्वरी ॥ १० ॥
स्वैरिणी पांशुला-
(ऽथ स्याद्) अशिश्वी (शिशुना विना) ।
अवीरा (निष्पतिसुता)
विश्वस्ता विधवे (समे) ॥ ११ ॥
आलिः सखी वयस्या (च)
पतिवत्नी सभर्त्तृका ।
वृद्धा पलिक्नी
प्राज्ञी (तु) प्राज्ञा
प्रज्ञा (तु) धीमती ॥ १२ ॥
शूद्री (शूद्रस्य भार्य्या स्यात्)
शूद्रा (तज्जातिरङ्गना) ।
आभीरी (तु) महाशूद्री (जातिपुंयोगयोः समा) ॥ १३ ॥
अर्य्याणी (स्वयम्) अर्य्या (स्यात्)
क्षत्रिया क्षत्रियाण-(ऽपि) ।
उपाध्याया (प्यु) पाध्यायी
(स्याद्) आचार्य्या (ऽपि च स्वतः) ॥ १४ ॥
आचार्य्याणी (तु पुंयोगे)
(स्याद्) अर्य्यी
(क्षत्रियी तथा) ।
उपाध्यायान्युपाध्यायी
पोटा (स्त्रीपुंसलक्षणा) ॥ १५ ॥
वीरपत्नी वीरभार्य्या
वीरमाता (च) वीरसूः ।
जातापत्या प्रजाता (च) प्रसूता (च) प्रसूतिका ॥ १६ ॥

(स्त्री) नग्निका कोट्टवी (स्याद्)

दूती सञ्चारिके (समे) ।

कात्यायन्य-(ईदूङा या काषायवसनाधवा) ॥ १७ ॥

सैरिन्ध्री (परवेश्मस्था स्ववशा शिल्पकारिका) ।

असिक्नी (स्यादूङा या) प्रैष्यान्तः पुरचारिणी ॥ १८ ॥

वारस्त्री गणिका वेश्या रूपाजीवा

(ऽथ सा जनैः ।

सत्कृता) वारमुख्या (स्यात्)

कुट्टनी शम्भली (समे) ॥ १९ ॥

विप्रश्निका (त्वी) क्षणिका दैवज्ञा

(ऽथ) रजस्वला ।

स्त्रीधर्मिण्यविरात्रेयी मलिनी पुष्पवत्य-(ऽपि) ॥ २० ॥

ऋतुमत्य-(प्यु) दक्ष्या-(ऽपि)

(स्यात्) रजः पुष्पमार्त्तवम् ।

श्रद्धालुर्दोहदवती

निष्कला विगतार्त्तवा ॥ २१ ॥

आपन्नसत्वा (स्यात्) गुर्विण्यन्तर्वत्नी (च) गर्भिण्यौ ।

(गणिकादिस्तु) गाणिक्यं

गार्भिण्यं

यौवतं (गणे) ॥ २२ ॥

पुनर्भूर्दिधिषु (रूढ़ा हि)

(तस्या) दिधिषुः (पतिः) ।

(स तु द्विजो) ऽन्ये दिधिषुः (सैव यस्य कुटुम्बिनी) ॥ २३ ॥

कानीनः कन्यकाजातः (सुतो)

(ऽथ) सुभगासुतः ।

सौभागिनेयः (स्यात्)

पारस्त्रैणेय-(स्तु परस्त्रियाः) ॥ २४ ॥

पैतृष्वसेयः (स्यात्) पैतृष्वसीयः (च पितृष्वसुः ।

सुतौ)-

(मातृष्वसुश्चैवं)

वैमातेयो विमातृजः ॥ २५ ॥

(अथ) बान्धकिनेयः (स्यात्) बन्धुल-(श्चा) ऽसतीसुतः ।

कौलटेयः कौलटेरो-

(भिक्षुकी तु सती यदि ॥ २६ ॥

तदा) कौलटिनेयो (ऽस्याः) कौलटेयो (ऽपि चात्मजः) ।

आत्मजस्तनयः सूनुः सुतः पुत्रः

(स्त्रियान्त्वमी ॥ २७ ॥

आहुः) दुहितरं (सर्वे)

ऽपत्यं तोकं (तयोः समे) ।

(स्वजाते त्वौ)-रसोरस्यौ

तात-(स्तु) जनकः पिता ॥ २८ ॥

जनयित्री प्रसूर्माता जननी

भगिनी स्वसा ।

ननान्दा (तु स्वसा पत्युः)

नप्त्री पौत्री सुतात्मजा ॥ २९ ॥

(भार्य्यास्तु भ्रातृवर्गस्य) यातरः (स्युः परस्परम्) ।

प्रजावती भ्रातृजाया

मातुलानी (तु) मातुली ॥ ३० ॥

(पतिपत्न्योः प्रसूः) श्वश्रूः

श्वशुर-(स्तु पिता तयोः) ।

(पितुर्भ्राता) पितृव्यः (स्यात्)

(मातुर्भ्राता तु) मातुलः ॥ ३१ ॥

श्यालाः (स्युर्भ्रातरः पत्न्याः)
(स्वामिनो) देवृ देवरौ ।
स्वस्रीयो भागिनेयः (स्यात्)
जामाता दुहितुः पतिः ॥ १२ ॥

पितामहः पितृपिता
(तत्पिता) प्रपितामहः ।
(मातु-) मातामहा-(द्वयं)
सपिण्डा (स्तु) सनाभयः ॥ १३ ॥
समानोदर्य्य सोदर्य्य सगर्भ्य सहजाः (समाः) ।
सगोत्र बान्धव ज्ञाति बन्धु स्व स्वजनाः (समाः) ॥ १४ ॥
ज्ञातेर्यं
बन्धुता (तेषां क्रमाज्ज्ञावसम्बन्धयोः) ।
धवः प्रियः पतिर्भर्त्ता
जार (स्तु-) उपपतिः (समौ) ॥ १५ ॥
(अमृते जारजः) कुण्डो-
(मृते भर्त्तरि) गोलकः ।
भ्रात्रीयो भ्रातृजे
भ्रातृभगिन्यौ भ्रातरा-(वुभौ) ॥ १६ ॥
मातापितरौ पितरौ मातरपितरौ (च तौ) ।
श्वश्रूश्वशुरौ श्वशुरौ
पुत्रौ (पुत्रश्च दुहिता) ॥ १७ ॥
दम्पती जम्पती जायापती भार्य्यापती (च तौ) ।
गर्भाशयो जरायुः (स्यात्) उल्वं (च) कललो (ऽस्त्रियाम्) ॥१८॥
सूतिमासो वैजननो
गर्भौ स्त्रूण (द्वमौ ममौ) ।
तृतीया प्रकृतिः शण्ढः क्लीवं षण्ढो नपुंसकम् ॥ १९ ॥

शिशुत्वं शैशवं बाल्यं
तारुण्यं यौवनं (समे) ।
(स्यात्) स्थाविरं (तु) वृद्धत्वं
वृद्धसङ्घे- (ऽपि) वार्द्धकम् ॥ ४० ॥
पलितं (जरसा शौक्लं केशादौ)
विस्रसा जरा ।
(स्यात्) उत्तानशया डिम्भा स्तनपा (च) स्तनन्धयी ॥४१॥
बाल (स्तु स्यात्) माणवको-
वयस्थस्तरुणो युवा ।
प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्न-(ऽपि) ॥४२॥
वर्षीयान् दशमो ज्यायान्
पूर्वज (स्त्व) ग्रियो ऽग्रजः ।
जघन्यजे (स्युः) कनिष्ठ यवीयो ऽवरजा ऽनुजाः ॥ ४३ ॥
अमांसो दुर्बलस्क्षातो
बलवान् मांसलो ऽंसलः ।
तुन्दिलस्तुन्दिकस्तुन्दी बृहत्कुक्षिः पिचिण्डिलः ॥ ४४ ॥
अवटीटो ऽवनाट (खा-) ऽवभ्रटो नतनासिके ।
केशवः केशिकः केशी
वलिनो वलिभः (समौ) ॥ ४५ ॥
विकलाङ्ग (स्तु) पोगण्डः
खर्वो ह्रस्व (स्व) वामनः ।
खरणाः (स्यात्) खरणसो
विग्रः (तु) गतनासिकः ॥४६॥
खुरण्णाः (स्यात्) खुरणसः
प्रङ्गुः प्रगतजानुकः ।
ऊर्द्धजानुरूर्द्धजानुः (स्यात्)

संघुः संहतजानुकः ॥ ४७ ॥

(स्यात्) एडे बधिरः

कुजे गडुलः

कुकरे कुणिः ।

पृश्निरल्पतनौ

श्रोणः पङ्गौ

मुण्ड (स्तु) मुण्डिते ॥ ४८ ॥

वलिरः केकरे

खोडे खञ्ज-

(स्त्रियु जरावराः) ।

जटुलः कालकः पिप्लु-

स्तिलकस्तिलकालकः ॥ ४९ ॥

अनामयं (स्याद्)-आरोग्यं

चिकित्सा रुक्प्रतिक्रिया ।

भेषजौषध भैषज्यान्यगदो जायु (रित्यपि) ॥ ५० ॥

(स्त्री) रुग्रुजा (चो-) पताप रोग व्याधि गदामयाः ।

(पुमान्) यक्ष्मा क्षयः शोषः

प्रतिश्याय-(स्तु) पीनसः ॥ ५१ ॥

(स्त्री) क्षुत् क्षुतं क्षवः (पुंसि)

कास (स्तु) क्षवथुः (पुमान्) ।

शोफ (स्तु) श्वयथुः शोथः

पादस्फोटो विपादिका ॥ ५२ ॥

किलासं सिध्म

कच्छा (तु) पाम पामा विचर्चिका ।

कण्डूः खर्ज्जू (श्व) कण्डूया

विस्फोटः पिटक (स्त्रियु) ॥ ५३ ॥

व्रणो (ऽस्त्रियाम्) ईर्म मरुः (क्लीवे)
नाड़ीव्रणः (पुमान्) ।
कोठो मण्डलकं
कुष्ठ श्वित्रे
दुर्नामका ऽर्शसी ॥ ५४ ॥
आनाह (स्तु) विबन्धः (स्यात्)
ग्रहणीरुक् प्रवाहिका ।
प्रच्छर्दिका वमि (श्च स्त्री पुमांस्तु) वमथुः (समाः) ॥५५॥
(व्याधिभेदा) विद्रधिः (स्त्री) ज्वर मेह भगन्दराः ।
अश्मरी मूत्रकृच्छ्रं (स्यात्)
(पूर्वं शुक्रावधेस्त्रिषु ॥ ५६ ॥
रोगहार्य्यगदङ्कारो भिषक् वैद्यौ चिकित्सके ।
वार्त्तौ निरामयः कल्य उल्लाघो (निर्गतो गदात्) ॥ ५७ ॥
ग्लान ग्लास्नू
आमयावी विकृतो व्याधितोऽपटुः ।
आतुरो ऽभ्यमितो ऽभ्यान्तः
(समौ) पामन कच्छुरौ ॥ ५८ ॥
दद्रुणो दद्रुरोगी (स्याद्)
अर्शरोगयुतो ऽर्शसः ।
वातकी वातरोगी (स्यात्)
सातिसारी ऽतिसारकी ॥ ५९ ॥
(स्युः) क्लिन्नाक्षे चुल्ल चिल्ल पिल्लाः (क्लिन्ने ऽक्षिणि चाप्यमी) ।
उन्मत्त उन्मादवति
श्लेष्मलः श्लेष्मणः कफी ॥ ६० ॥
न्युब्जो (भुग्ने रुजा)
(ह्रस्वनाभौ) तुण्डिल तुण्डिभौ ।

किलासी सिध्मलो

ऽन्धो ऽष्टक्

मूर्च्छाले मूर्त्त मूर्च्छितौ ॥ ६१ ॥

शुक्रं तेजो रेतसी (च) वीज वीर्य्येन्द्रियाणि (च)।

मायुः पित्तं

कफः श्लेष्मा

(स्त्रियां तु) त्वगस्त्रग्धरा ॥ ६२ ॥

पिशितं तरसं मांसं पललं क्रव्यमामिषम्।

उत्तमं शुष्कमांसं (स्यात्) वल्लूरं (तत् त्रिलिङ्गकम्) ॥६३॥

रुधिरे ऽस्रक् लोहिता ऽस्र रक्त क्षतज शोणितम्।

वुक्का ऽग्रमांसं हृदयं हृत्

मेद (स्तु) वपा वसा ॥ ६४ ॥

(पश्चाद् ग्रीवा शिरा) मन्या

नाड़ी (तु) धमनिः शिरा।

तिलकं क्लोम

मस्तिष्कं गोर्दं

किट्टं मलो (ऽस्त्रियाम्) ॥ ६५ ॥

श्रन्त्रं पुरीतत्

गुल्म (स्तु) प्लीहा (पुंस्य)

(ऽथ) वक्षसा।

स्नायुः (स्त्रियां)

कालखण्ड यकृतौ (तु समे इमे) ॥ ६६ ॥

सृणिका स्यन्दिनी लाला

दूषिका (नेत्रयोर्मलम्)।

मूत्रं प्रस्राव

उच्चारा ऽवस्करौ शमलं शकृत् ॥ ६७ ॥

गूथं पुरीषं वर्च्चस्क (मस्त्री) विष्ठा विषौ (स्त्रियौ) ।
(स्यात्) कर्प्परः कपालो (ऽस्त्री)
कौकसं कुल्यमस्थि (च) ॥६८॥
(स्यात् शरीरास्थि) कङ्कालः
(पृष्ठास्थि तु) कशेरुका ।
शिरोऽस्थि (तु) करोटिः (स्त्री)
पार्श्वास्थनि (तु) पर्शुका ॥ ६९ ॥
अङ्गं प्रतीको ऽवयवो ऽघनो
(ऽथ) कलेवरम् ।
गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ॥ ७० ॥
कायो देहः (क्लीवपुंसोः स्त्रियां) मूर्त्तिस्तनु स्तनूः ।
पादाग्रं प्रपदं
पादः पदङ्घ्रिश्चरणो (ऽस्त्रियाम्) ॥ ७१ ॥
(तद्ग्रन्थी) घुटिके गुल्फौ
(पुमान्) पार्ष्णि (रधस्तयोः) ।
जङ्घा (तु) प्रसृता
जानूरुपर्वा ऽष्ठीवद्व (ऽस्त्रियाम्) ॥ ७२ ॥
सक्थि (क्लीवे पुमान्) ऊरुम्
(तत्सन्धिः पुंसि) वंक्षणः ।
गुदं (त्व) पानं पायु (र्ना)
वस्ति (र्नाभेरधो) (द्वयोः) ॥ ७३ ॥
कटौ (ना) श्रोणिफलकं कटिः श्रोणौ ककुद्मती ।
(पश्चान्) नितम्बः (स्त्रीकट्याः)
(स्त्रीवे तु) जघनं (पुरः) ॥७४॥
(कूपकौ तु नितम्बस्थौ द्वयहीने) कुकुन्दरे ।
(स्त्रियां) स्फिचौ कटिप्रोथाव्

उपस्थो (वक्ष्यमाणयोः) ॥ ७५ ॥

भगं योनि (र्द्वयोः)

शिश्नो मेढ्रो मेहन शेफसी ।

मुष्को ऽण्डकोषो हषणः

(पृष्ठवंशाधरे) त्रिकम् ॥ ७६ ॥

पिचिण्ड कुक्षी जठरोदरं तुन्दं

स्तनौ कुचौ ।

चूचुकं (तु) कुचाग्रं (स्यात्)

(ननां) क्रोड़ं भुजान्तरम् ॥७७॥

उरो वक्ष (श्च) वक्षश् (च)

पृष्ठं (तु चरमं तनोः)।

स्कन्धो भुजशिरोऽंसो (ऽस्त्री)

(सन्धी तस्यैव) जत्रुणी ॥ ७८ ॥

बाहुमूले (उभौ) कक्षौ

पार्श्वं (मस्त्री तयोरधः)।

मध्यम (श्वा) ऽवलग्न (श्च) मध्यो (ऽस्त्री)

(द्वौ परौ द्वयोः) ॥७९॥

भुज वाह्व प्रवेष्टो दोः

(स्यात्) कफोणि (स्तु) कूर्परः ।

(अस्योपरि) प्रगण्डः (स्यात्)

प्रकोष्ठ (स्तस्य चाप्यधः) ॥ ८०

(मणिबन्धाटाकनिष्ठं करस्य) करभो (बहिः)।

पञ्चशाखः शयः पाणि-

स्तर्जनी (स्यात्) प्रदेशनी ॥ ८१ ॥

अङ्गुल्यः करशाखाः (स्युः)

(पुंस्य) ङ्गुष्ठः प्रदेशिनी ।

मध्यमा ऽनामिका (चापि) कनिष्ठा (चेति ताः क्रमात्)॥८२॥
पुनर्भवः करशाखो नखो (ऽस्त्री) नखरो (ऽस्त्रियाम्) ।
प्रादेश ताल गोकर्णा (स्तर्जन्यादियुते तते) ॥ ८३ ॥
(अङ्गुष्ठे स कनिष्ठे स्याद्) वितस्ति (र्द्वादशाङ्गुलः) ।
(पाणौ) चपेट प्रतल प्रहस्ता (विस्तृताङ्गुली) ॥ ८४ ॥
(द्वौ संहतौ) संहतलः (प्रतलौ वामदक्षिणौ) ।
(पाणिर्निकुञ्जः) प्रसृतम्
(तौ युताव्) अञ्जलिः (पुमान्) ॥ ८५ ॥
(प्रकोष्ठे विस्तृतकरे) हस्तो
(मुष्ट्या तु बद्धया) ।
सरत्निः (स्याद्)
अरत्नि (स्तु निष्कनिष्ठेन मुष्टिना) ॥ ८६ ॥
व्यामो (बाह्वोः सकरयोस्ततयो स्तिर्य्यगन्तरम्) ।
(ऊर्द्ध्वविस्तृतदोः पाणिनृमाने) पौरुषं (त्रिषु) ॥ ८७ ॥
कण्ठो गलो
(ऽथ) ग्रीवायां शिरोधिः कन्धरे (त्यपि) ।
कम्बुग्रीवा (त्रिरेखा सा)
ऽवट्घाटा कृकाटिका ॥ ८८ ॥
वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम् ।
(क्लीवे) घ्राणं गन्धवहा घोणा नासा (च) नासिका ॥८९॥
ओष्ठा ऽधरौ (तु) रदनच्छदौ दशनवाससी ।
(अधः स्याच्) चिबुकं
गण्डौ कपोलौ
(तत्परौ) हनुः ॥ ९० ॥
रदना दशना दन्ता रदा-
स्तालु (तु) काकुदम् ।

रसज्ञा रसना जिह्वा

(प्रान्तावोष्ठस्य) स्रक्वणी ॥ ८१ ॥

ललाटमलिकं गोधिः

(ऊर्ध्वं दृग्भ्यां) भ्रुवौ (स्त्रियाम्) ।

कूर्चं (मस्त्री) (भ्रुवोर्मध्यं)

तारका (ऽक्ष्णः) कनीनिका ॥ ८२ ॥

लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी ।

दृग्दृष्टी (चा)

ऽस्रु नेत्राम्बु रोदनं (चा) ऽस्रमस्रु (च) ॥ ८३ ॥

अपाङ्गौ (नेत्रयोरन्तौ)

कटाक्षे (ऽपाङ्गदर्शने) ।

कर्णं शब्दग्रहौ श्रोत्रं श्रुतिः (स्त्री) श्रवणं श्रवः ॥ ८४ ॥

उत्तमाङ्गं शिरः शीर्षं मूर्धा (ना) मस्तको (ऽस्त्रियाम्) ।

चिकुरः कुन्तलो वालः कचः केशः शिरोरुहः ॥ ८५ ॥

(तद् वृन्दे) कैशिकं कैश्यम्

अलकाश्चूर्णकुन्तलाः ।

(ते ललाटे) भ्रमरकाः

काकपक्षः शिखण्डकः ॥ ८६ ॥

कबरी केशवेशी

(ऽथ) धम्मिल्लः (संयताः कचाः) ।

शिखा चूड़ा केशपाशी

(व्रतिनस्तु) जटा सटा ॥ ८७ ॥

वेणिः प्रवेणिः

शीर्षण्य शिरस्यौ (विशदे कचे) ।

पाशः पक्ष (श्च) हस्त (श्च कलापार्थाः कचान्तरे) ॥ ८८ ॥

तनूरुहं रोम लोम

(तदङ्गौ) श्मश्रु (पुंसुखे) ।
आकल्प वेशौ नेपथ्यं प्रतिकर्म्म प्रसाधनम् ॥ ९९ ॥
(दशैते क्लिष्व)
ऽलङ्कर्त्ता ऽलङ्करिष्णु (स्व) मण्डितः ।
प्रसाधितो ऽलङ्कृत (स्व) भूषित (स्व) परिष्कृतः ॥ १०० ॥
विभ्राड्भ्राजिष्णु रोचिष्णू
भूषा (तु स्याद्) अलङ्क्रिया ।
अलङ्कार (स्त्वा) भरणं परिष्कारो विभूषणम् ॥ १०१ ॥
मण्डनं (चा)
(ऽथ) मुकुटं किरीटं (पुंनपुंसकम्) ।
चूड़ामणिः शिरोरत्ने
तरलो (हारमध्यगः) ॥ १०२ ॥
बालपाश्या पारितथ्या
पत्रपाश्या ललाटिका ।
कर्णिका तालपत्रं (स्यात्)
कुण्डलं कर्णवेष्टनम् ॥ १०३ ॥
ग्रैवेयकं कण्ठभूषा
लम्बनं (स्यात्) ललन्तिका ।
(स्वर्णैः) प्रालम्बिका
(ऽथो) रःसूत्रिका मौक्तिकैः कृता) ॥ १०४ ॥
हारो मुक्तावली
देवच्छन्दो (ऽसौ) शतयष्टिकः ।
(हारभेदा यष्टिभेदा) गुत्स गुत्सार्द्ध गोस्तनाः ॥ १०५ ॥
अर्द्धहारो माणवक
एकावल्य् (एकयष्टिका) ।
(सैव) नक्षत्रमाला (स्यात् सप्तविंशतिमौक्तिकैः) ॥ १०६ ॥

आवापकः पारिहार्यः कटको वलयो (ऽस्त्रियाम्) ।
केयूरमङ्गदं (तुल्ये)
अङ्गुलीयकमूर्मिका ॥ १०७ ॥
(साञ्चरा) ङ्गुलिमुद्रा (सा)
कङ्कणं करभूषणम् ।
(स्त्रीकट्यां) मेखला काञ्ची सप्तकी रसना (तथा) ॥ १०८ ॥
(क्लीवे) सारसनं (चा)
(ऽथ पुंस्कट्यां) शृङ्खलं (त्रिषु) ।
पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरो ऽस्त्रियाम्) ॥ १०९ ॥
हंसकः पादकटकः
किङ्किणी क्षुद्रघण्टिका ।
(त्वक्फलकृमिरोमाणि) वस्त्रयोनिः
(दश त्रिषु) ॥ ११० ॥
वाल्कं (क्षौमादि)
फालं (तु) कार्प्पासं वादरं (च तत्) ।
कौशेयं कृमिकोशोत्थं
राङ्कवं मृगरोमजम् ॥ १११ ॥
अनाहतं निष्प्रवाणि तल्लकं (च) नवाम्बरे ।
(तत् स्याद्) उद्गमनीयं (यद्धौतयोर्वस्त्रयोर्युगम् ॥ ११२ ॥
पत्रोर्णं धौतकौशेयं
बहुमूल्यं महाधनम् ।
क्षौमं दुकूलं (स्याद्)
(द्वे तु) निवीतं प्रावृतं (त्रिषु) ॥ ११३ ॥
(स्त्रियां बहुत्वे वस्त्रस्य) दशाः (स्युः) वस्त्रयो (र्द्वयोः) ।
दैर्घ्यमायाम आरोहः
परिणाहो विशालता ॥ ११४ ॥

पटश्चरं जीर्णवस्त्रं

(समौ) नक्तक कर्पटौ ।

वस्त्रमाच्छादनं वासश्चेलं वसनमंशुकम् ॥ ११५ ॥

सुचेलकः पटो (ऽस्त्री स्याद्)

वराभिः स्थूलघाटकः ।

निचोलः प्रच्छदपटः

(समौ) रल्लक कम्बलौ ॥ ११६ ॥

अन्तरीयोपसंव्यान परिधानान्यधोऽंशुके ।

(द्वौ) प्रावारोत्तरासङ्गौ (समौ) वृहतिका (तथा) ॥११७॥

संव्यानमुत्तरीयं (च)

चोलः कूर्पासकः (स्त्रियाः) ।

नीशारः (स्यात्प्रावरणे हिमानिलनिवारणे) ॥ ११८ ॥

(अर्द्धोरुकं वरस्त्रीणां स्यात्) चण्डातक-(मंशुकम्) ।

(स्यात् त्रिष्वा) प्रपदीनं (तत्प्राप्नोत्याप्रपदं हि यत्) ॥११९॥

(अस्त्री) वितानमुल्लोचो

दूष्या (द्यं वस्त्रवेश्मनि) ।

प्रतिसीरा जवनिका (स्यात्) तिरस्करणी (च सा) ॥१२०॥

परिकर्म्माङ्गसंस्कारः

(स्यात्) मार्ष्टिर्मार्ज्जना मृजा ।

उद्वर्त्तनोत्सादने (द्वे समे)

आम्लाव आम्लवः ॥ १२१ ॥

स्नानं

चर्चा (तु) चार्चिक्यं स्यासको

(ऽथ) प्रबोधनम् ।

अनुबोधः

पत्रलेखा पत्राङ्गुलि (रिमे समे) ॥ १२२ ॥

तमालपत्र तिलक चित्रकाणि विशेषकम् ।
(द्वितीयं च तुरीयं च न स्त्रियाम्)
(अथ) कुङ्कुमम् ॥ १२३ ॥
काश्मीरजन्मा ऽग्निशिखं वरं बाह्लीक पीतने ।
रक्त सङ्कोच पिशुनं धीर लोहितचन्दनम् ॥ १२४ ॥
लाक्षा राक्षा जतु (क्लीवे) यावो ऽलक्तो द्रुमामयः) ।
लवङ्गं देवकुसुमं श्री-(संज्ञम्)
(अथ) जायकम् ॥ १२५ ।
कालीयकं (च) कालानुसार्य्यं (चा)
(ऽथ समार्थकम्) ।
वंशिका ऽगुरु राजार्हलोह क्रिमिज जोङ्गकम् ॥ १२६ ॥
कालागुर्वगुरुः
(स्यात्तत्) मङ्ल्या (मल्लिगन्धि यत्) ।
यक्षधूपः सर्ज्जरसो ऽराल सर्वरसा (वपि) ॥ १२७ ॥
बहुरूपो (ऽप्य)
(ऽथ) द्रुकधूप कृत्रिमधूपकौ ।
तुरुष्कः पिण्डकः सिल्हो यावनो (ऽप्य)
(ऽथ) पायसः ॥ १२८ ॥
श्रीवासो द्रुकधूपो (ऽपि) श्रीवेष्ट सरलद्रवौ ।
मृगनाभिर्मृगमदः कस्तूरी (चा
ऽथ) कोलकम् ॥ १२९ ॥
कक्कोलकं कोशफलम्
(अथ) कर्पूर (मस्त्रियाम्) ।
घनसार चन्द्र (संज्ञः) सिताभ्रो हिमवालुका ॥ १३० ॥
गन्धसारो मलयजो भद्रश्रीश्चन्दनो (ऽस्त्रियाम्) ।
तैलपर्णिक गोशीर्षं हरिचन्दन (मस्त्रियाम्) ॥ १३१ ॥

तिलपर्णी (तु) पत्राङ्गं रञ्जनं रक्तचन्दनम् ।
कुचन्दनं (चा)
(ऽथ) जातीकोश जातीफले (समे) ॥१३२॥
(कर्पूरागुरुकस्तूरी ककोलैः) यक्षकर्दमः ।
गात्रानुलेपनी वर्त्तिर्वर्णकं (स्याद्) विलेपनम् ॥ १३३ ॥
चूर्णानि वासयोगाः (स्युः)
भावितं वासितं (त्रिषु) ।
(संस्कारो गन्धमाल्याद्यैर्यः स्यात्तद्) अधिवासनम् ॥१३४॥
माल्यं माला स्रजौ (मूर्ध्नि)
(केशमध्ये तु) गर्भकः ।
प्रभ्रष्टकं (शिखालम्बि)
(पुरो न्यस्तं) ललामकम् ॥ १३५ ॥
प्रालम्ब (मृजुलम्बि स्यात्कण्ठाद्)
वैकक्षकं (तु तत्) ।
(यत्तिर्य्यक् क्षिप्तमुरसि)
(शिखासा) पीड शेखरौ ॥ १३६ ॥
रचना (स्यात्) परिस्पन्द
आभोगः परिपूर्णता ।
उपधानं (तू) पवर्हः
शय्यायां शयनीय (वत्) ॥ १३७ ॥
शयनं
मञ्च पर्यङ्क पल्यङ्काः खट्वया (समाः) ।
गेण्डुकः कन्दुको
दीपः प्रदीपः
पीठमासनम् ॥ १३८ ॥
समुद्गकः सम्पुटकः

प्रतिग्राहः पतद्ग्रहः ।

प्रसाधनी कङ्कतिका

पिष्टातः पटवासकः ॥ १३९ ॥

दर्पणे मुकुरादर्शौ

व्यजनं तालवृन्तकम् ॥ १४० ॥

इति नरवर्गः ।

अथ ब्रह्मवर्गः ।

सन्ततिर्गोत्र जननकुलान्यभिजना ऽन्वयौ ।

वंशो ऽन्ववायः सन्तानो

वर्णाः (स्युर्ब्राह्मणादयः) ॥ १ ॥

राजवीजी राजवंश्यो

वैश्य (स्तु) कुलसम्भवः ।

महाकुल कुलीनार्य्य सभ्यसज्जनसाधवः ॥ २ ॥

ब्रह्मचारी गृही वानप्रस्थो भिक्षु-(स्वतुष्टये) ।

श्राश्रमी (ऽस्त्री)

द्विजात्यग्रजन्म भूदेव वाड़वाः ॥ ३ ॥

विप्र (श्च) ब्राह्मणो

(ऽस्त्री) षट्कर्मा (यागादिभिर्युतः) ।

विद्वान् विपश्चिद् दोषज्ञः सन् सुधीः कोविदो बुधः ॥ ४ ॥

धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः ।

धीमान् सूरिः ऋतौ ऋष्टिर्लब्धवर्णो विचक्षणः ॥ ५ ॥

दूरदर्शी दीर्घदर्शी

श्रोत्रियच्छान्दसौ (समौ) ।

उपध्यायो ऽध्यापको

(ऽथ स्याद्विषेकादिकृद्) गुरुः ॥ ६ ॥

(मन्त्रव्याख्याकृद्) आचार्य्य

(आदेष्टा लध्वरे) व्रती ।

यष्टा (च) यजमान (स्व)

(स सोमवति) दीक्षितः ॥ ७ ॥

दृज्याशीलो यायजूको

यज्वा (तु) विधिनेष्टवान् ।

(स गौष्पतीच्या) स्थपतिः

सोमपीती (तु) सोमपः ॥ ८ ॥

सर्ववेदाः (स येनेष्टो यागः सर्वस्वदक्षिणः) ।

अनूचानः (प्रवचने साङ्गे ऽधीती)

(गुरोस्तु यः ॥ ९ ॥

लब्धानुज्ञः) समाहृत्तः

सुत्वा (त्वभिषवे कृते) ।

छात्रान्तेवासिनौ शिष्ये

शैक्षाः प्राथमकल्पिकाः ॥ १० ॥

(एकब्रह्मव्रताचारा मिथः) स ब्रह्मचारिणः ।

सतौर्य्या-(सैक-) कगुरव

(श्वितवानग्निम्) अग्निचित् ॥ ११ ॥

(पारम्पर्य्योपदेशे स्याद्) ऐतिह्यमितिह्या (ऽव्ययम्) ।

उपज्ञा (ज्ञानमाद्यं स्यात्)

(ज्ञात्वारभ) उपक्रमः ॥ १२ ॥

यज्ञः सवो ऽध्वरो यागः सप्ततन्तुमखः क्रतुः ।

(पाठो होमश्चातिथीनां सपर्य्या तर्पणं बलिः ॥ १३ ॥

एते पञ्च) महायज्ञा (ब्रह्मयज्ञादिनामकाः) ।

समज्यापरिषद्गोष्ठी सभासमिति संसदः ॥ १४ ॥

आस्थानी (क्लीवम्) आस्थानं (स्त्रीनपुंसकयोः) सदः ।
प्राग्वंशः (प्राग्ग्रविर्गेहात्)
सदस्या विधिदर्शिनः ॥ १५ ॥
सभासदः सभास्तारः सभ्याः सामाजिका (श्च ते) ।
अध्वर्य्वुद्गात्रहोतारो (यजुःसामर्ग्विदः क्रमात्) ॥ १६ ॥
(आग्नीध्राद्या धनैर्वार्य्या) ऋत्विजो याजका (श्च ते) ।
वेदिः (परिष्कृता भूमिः)
(समे) स्थण्डिलचत्वरे ॥ १७ ॥
चषालो यूपकटकः
कुम्भा (सुगहनाहुतिः) ।
यूपाग्रं तर्म
(निर्मन्थ्य दारुणित्व) रणि (र्द्वयोः) ॥ १८ ॥
दक्षिणाग्निर्गार्हपत्याहवनीयौ (त्रयो ऽग्नयः) ।
(अग्नित्रयमिदं) त्रेता
प्रणीतः (संस्कृतो ऽनलः) ॥ १९ ॥
समूह्यः परिचाय्योपचाय्याव् (अग्नौ प्रयोगिणः) ।
(यो गार्हपत्यादानीय दक्षिणाग्निः प्रणीयते ॥ २० ॥
तस्मिन्) आनाय्यो
(ऽथा) ऽग्नायी स्वाहा (च) हुतभुक्प्रिया ।
(ऋक्) सामिधेनी धाय्या (च या स्यादग्निसमिन्धने) ॥२१॥
(गायत्री प्रमुखं) छन्दो
(हव्यपाके) चरुः (पुमान्) ।
आमिक्षा (सा शृतौष्णे या क्षीरे स्याद्दधियोगतः ॥ २२ ॥
ध्रुवित्रं (व्यजनं तद् यद्रचितं मृगचर्मणा) ।
पृषदाज्यं (सदध्याज्ये)
परमान्नं (तु) पायसः ॥ २३ ॥

हव्य कव्ये (दैवपित्र्ये कर्मणि)

पात्रं (स्रुवादिकम्) ।

ध्रुवोपभृज्जुह्वौ (नौ तु) स्रुवौ (भेदाः) स्रुचः (स्त्रियः) ॥२४॥

उपाकृतः (पशुरसौ योऽभिमन्त्रा क्रतौ हतः) ।

परम्परोक्षं श्रपणं प्रोक्षणं (च वधार्थकम्) ॥ २५ ॥

(वाच्यलिङ्गाः) प्रमीतोप सम्यक्प्रोक्षिता (हते) ।

साज्याय्यं हविः

(अग्नौ तु हुतं त्रिषु) वषट्कृतम् ॥ २६ ॥

(दीक्षान्तो) ऽवभृथो (यज्ञ)

(स्तत्कर्म्मार्हन्तु) यज्ञियम् ।

(त्रिष्व)

(ऽथ क्रतुकर्म) ष्टं

पूर्त्तं (खातादिकर्मणि) ॥ २७ ॥

अमृतं विघसो (यज्ञशेषभोजनशेषयोः) ।

त्यागो विहापितं दानमुत्सर्ज्जन विसर्जने ॥ २८ ॥

विश्राणनं वितरणं स्पर्शनं प्रतिपादनम् ।

प्रादेशनं निवेपणमपवर्ज्जनमंहतिः ॥ २९ ॥

(मृताह्नं तदहर्दानं त्रिषु स्यात्) और्द्ध्वदेहिकम् ।

पिण्डदानं निवापः (स्यात्)

श्राद्धं (तत्कर्म शास्त्रतः) ॥ ३० ॥

अन्वाहार्य्यं मासिके

(ऽग्नौ ऽष्टमी ऽङ्गः) कृतपो (ऽस्त्रियाम्) ।

पर्येषणा परीष्टि (श्चा) न्वेषणा (च) गवेषणा ॥ ३१ ॥

मनि (स्त्व) न्वेषणा

याञ्चा ऽभिप्रस्तिर्यांचना ऽर्थना ।

(षट् तु त्रिष्व)

ऽर्घ्यं (मर्घार्थं)

पाद्यं (पादाय वारिणि) ॥ २२ ॥

(क्रमात्) आतिथ्यातिथेये (आतिथ्यर्थं ऽत्र साधुनि)।

(स्यात्) आवेशिक आगन्तुरतिथि (र्ना गृहागते) ॥२३॥

पूजा नमस्या ऽपचितिः सपर्य्या ऽर्चा ऽर्हणाः (समाः)।

वरिवस्या (तु) शुश्रूषा परिचर्य्या-(र्य्यु) पासनम् ॥२४॥

व्रज्या ऽटाट्या पर्य्यटनं

चर्य्या (त्वीर्य्यापथस्थितिः)।

उपस्पर्शं (स्त्वा)-चमनम्

(ऽथ) मौनमभाषणम् ॥ २५ ॥

आनुपूर्वी (स्त्रियां) (वा) हृत् परिपाटी अनुक्रमः।

पर्य्याय (श्चा)

ऽतिपात (स्तु स्यात्) पर्य्यय उपात्ययः ॥ २६ ॥

नियमो व्रत-(मस्त्री तच्चोपवासादि) पुण्यकम्।

उपवस्तं (तू)-पवासो

विवेकः पृथगात्मता ॥ २७ ॥

(स्याद्) ब्रह्मवच्चसं वृत्ताध्ययनर्द्धिः

(अथाञ्जलिः।

पाठे) ब्रह्माञ्जलिः

(पाठे विप्रुषो) ब्रह्मविन्दवः ॥ २८ ॥

ध्यानयोगासने ब्रह्मासनं

कल्पे विधि क्रमौ।

मुख्यः (स्यात् प्रथमः कल्पो)-

ऽनुकल्प-(स्तु ततो ऽधमः) ॥२९॥

(संस्कारपूर्वं ग्रहणं स्याद्) उपाकरणं (श्रुतेः)।

(समे तु) पादग्रहणमभिवादन-(मित्युभे) ॥ ४० ॥

भिक्षुः परिव्राट् कर्मन्दो पाराशर्य्य-(पि) मस्करी ।
तपस्वी तापसः पारिकाङ्क्षी
वार्चयमो मुनिः ॥ ४१ ॥
तपः क्लेशसहो दान्तो
वर्णिनो ब्रह्मचारिणः ।
ऋषयः सत्यवचसः
स्नातक (स्त्वा) प्लवव्रतौ ॥ ४२ ॥
(ये) निर्जितेन्द्रियग्रामा यतिनो यतय (श्च ते) ।
(यः स्थण्डिले व्रतवशात् शेते) स्थण्डिलशाय्य-(सौ) ॥४३॥
स्थाण्डिल (श्चा)
(ऽथ) विरजस्तमसः (स्युः) द्वयातिगाः ।
पवित्रः प्रयतः पूतः
पाषण्डाः सर्वलिङ्गिनः ॥ ४४ ॥
(पालाशो दण्ड) आषाढ़ो (व्रती)
राम्भ (स्तु वैणवः) ।
(अस्त्री) कमण्डलुः कुण्डो
(व्रतिनामासनं) ह्युषी ॥ ४५ ॥
अजिनं चर्म क्षत्तिः (स्त्री)
भैक्षं (भिक्षाकदम्बकम्) ।
स्वाध्यायः (स्यात्) जपः
सूत्या ऽभिषवः सवनं (च सा) ॥ ४६ ॥
(सर्वेनसामपध्वंसि जप्यं त्रिष्व-) घमर्षणम् ।
दर्श (श्च) पौर्णमास-(श्च यागौ पक्षान्तयोः पृथक्) ॥ ४७ ॥
(शरीरसाधनापेक्षं नित्यं यत्कर्म तद्) यमः ।
नियम (स्तु स यत्कर्मानित्यमागन्तुसाधनम्) ॥ ४८ ॥
उपवीतं (यज्ञसूत्रं प्रोद्धृते दक्षिणे करे) ।

प्राचीनावीत (मन्यस्मिन्)

निवीतं (कण्ठलम्बितम्) ॥ ४८ ॥

(अङ्गुल्यग्रे तीर्थं) दैवं

(स्वल्पाङ्गुल्योर्मूले) कायम् ।

(मध्येऽङ्गुष्ठाङ्गुल्योः) पैत्रं

(मूले ह्यङ्गुष्ठस्य) ब्राह्मम् ॥ ५० ॥

(स्यात्) ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्य-(मित्यपि) ।

देवभूया-(दिकं तद्वत्)

कृच्छ्रं (सान्तपनादिकम्) ॥ ५१ ॥

(सन्यासवत्यनग्ने पुमान्) प्रायो-

(ऽथ) वीरहा ।

नष्टाग्निः

कुहना (लोभान्मिथ्येर्यापथकल्पना) ॥ ५२ ॥

व्रात्यः संस्कारहीनः (स्यात्)

आस्वाध्यायो निराकृतिः ।

धर्मध्वजी लिङ्गवृत्तिः

अवकीर्णी च्युतव्रतः ॥ ५३ ॥

(सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च ।

अंशुमान्) अभिनिर्मुक्ता ऽभ्युदितौ (तौ यथाक्रमम्) ॥ ५४ ॥

परिवेत्ता (ऽनुजो ऽनूढ़े ज्येष्ठे दारपरिग्रहात्) ।

परिवित्ति (स्तु तज्जायान्)

विवाहोपयमौ (समौ) ॥ ५५ ॥

(तथा) परिणयोद्वाहोपयमाः पाणिपीड़नम् ।

व्यवायो गम्यधर्म-(श्च) रतं निधुवनं (च सः) ॥ ५६ ॥

त्रिवर्गो (धर्मकामार्थैः)

चतुर्वर्गः (समोक्षकैः) ।

(सवलैस्तै-) श्वतुर्भद्रं

जन्याः (स्निग्धा वरस्य ये) ॥ ५७ ॥

इति ब्रह्मवर्गः ।

अथ क्षत्रवर्गः ।

मूर्द्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट् ।
राज्ञि राट् पार्थिव क्ष्माभृन्नृप भूप महीक्षितः ॥ १ ॥
(राजा तु प्रणताशेषसामन्तः स्यात्) अधीश्वरः ।
चक्रवर्त्ती सार्वभौमो

(नृपो ऽन्यो)-मण्डलेश्वरः ॥ २ ॥

(येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः ।
शास्ति यश्चाज्ञया राज्ञः स) सम्राट्-

(अथ) राजकम् ॥ ३ ॥

राजन्यकं (च नृपति क्षत्रियाणां गणे क्रमात्) ।
मन्त्री धीसचिवो ऽमात्यो-

(ऽन्ये) कर्म्मसचिवा (स्मृतः) ॥ ४ ॥

महामात्राः प्रधानानि

पुरोधा (स्तु) पुरोहितः ।
(द्रष्टरि व्यवहाराणां) प्राड्विवेकाऽक्षदर्शकौ ॥ ५ ॥
प्रतीहारि द्वारपाल द्वाःस्थ द्वाःस्थितदर्शकाः ।
रक्षिवर्ग-(स्त्व)-नीकस्थो-

(ऽथा) ऽध्यक्षा ऽधिकृतौ (समौ) ॥ ६ ॥

स्थायुको (ऽधिकृतो ग्रामे)

गोपो (ग्रामेषु भूरिषु) ।
शौल्किकः कनकाध्यक्षो-

कृप्याध्यक्ष-(स्तु) नैष्किकः ॥ ७ ॥
(अन्तःपुरे त्वधिकृतः स्यात्) अन्तर्वंशिको (जनः)।
सौविदल्लाः कञ्चुकिनः स्यात्पत्याः सौविदा-(श्च ते) ॥ ८ ॥
शण्ढो वर्षवर (स्तुल्यौ)
सेवकार्थ्यनुजीविनः।
(विषयानन्तरो राजा) शत्रुः
मित्र-(मतः परम्) ॥ ९ ॥
उदासीनः (परतरः)
पार्ष्णिग्राह (स्तु पृष्ठतः)।
रिपौ वैरि सपत्ना ऽरि द्विषद्द्वेषण दुर्हृदः ॥ १० ॥
द्विड् विपक्षा ऽहिता ऽमित्र दस्यु शातव शत्रवः।
अभिघातिपरा ऽरातिप्रत्यर्थिपरिपन्थिनः ॥ ११ ॥
वयस्यः स्निग्धः सवया:
(अथ) मित्रं सखा सुहृत्।
सख्यं सामपदीनं (स्यात्)
अनुराधा ऽनुवर्त्तनम् ॥ १२ ॥
यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः।
चार (श्च) गूढ़पुरुष-
(श्वा-) सः प्रत्ययित (स्त्रिषु) ॥ १३ ॥
साम्वत्सरो ज्यौतिषिको दैवज्ञ गणका-(वपि)।
(स्युः) मौहूर्त्तिक मौहूर्त्तं ज्ञानि कार्त्तान्तिका (अपि) ॥१४॥
तान्त्रिको ज्ञातसिद्धान्तः
सत्री गृहपतिः (समौ)।
लिपिकारो ऽक्षरचनो ऽक्षरचुञ्चु-(श्च) लेखके ॥ १५ ॥
लिखिता ऽक्षरसंस्थाने लिपिर्लिंवि-(रुभे स्त्रियौ)।
(स्यात्) सन्देशहरो दूतो

दूत्यं (तद्भावकर्मणि) ॥ १६ ॥
अध्वनीनो ऽध्वगो ऽध्वन्यः पान्थः पथिक-(इत्यपि)।
(स्वाम्यमात्यसुहृत्कोषराष्ट्रदुर्गबलानि च) ॥ १७ ॥
राज्याङ्गानि प्रकृतयः
(पौराणां श्रेणयो ऽपि च)।
(सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः) ॥ १८ ॥
(षट्-) गुणाः
शक्तय (स्तिस्रः प्रभावोत्साहमन्त्रजाः)।
(क्षयः स्थानं च वृद्धिश्च) त्रिवर्गो (नीतिवेदिनाम्) ॥ १९ ॥
(स) प्रतापः प्रभाव-(श्च यत्तेजः कोषदण्डजम्)।
(भेदो दण्डः साम दानमित्यु) पाय (चतुष्टयम्) ॥ २० ॥
साहसं (तु) दमो दण्डः
साम सान्त्वम्
(अथो समौ)।
भेदोपजापाव्
उपधा (धर्माद्यैर्यत् परीक्षणम्) ॥ २१ ॥
(पत्रं त्रिष्व)
ऽषडक्षीणो (यस्तृतीयाद्यगोचरः)।
विविक्त विजनच्छन्न निःशलाका (स्तथा) रहः ॥ २२ ॥
रह-(स्यो) पांशु (चालिङ्गे)
रहस्यं (तद्भवे त्रिषु)।
(समौ) विश्रम्भ विस्रम्भौ
श्रेषो (भ्रंशो यथोचितात्) ॥ २३ ॥
अश्रेष न्याय कल्पा-(स्तु) देशरूपं समञ्जसम्।
युक्तमौपयिकं लभ्यं भजमाना ऽभिनीत (वत्) ॥ २४ ॥
न्याय्यं (च त्रिषु षट्)

सम्प्रधारणा (तु) समर्थनम् ।
अववाद (स्तु) निर्देशो निदेशः शासनं (च सः) ॥ २५ ॥
शिष्टि (श्वा-) ज्ञा (च)
संस्था (तु) मर्य्यादा धारणा स्थितिः ।
आगो ऽपराधो मन्तु (श्व)
(समे तू-) ह्यानबन्धने ॥ २६ ॥
द्विपाद्यो (द्विगुणो दण्डो)
भागधेयः करो बलिः ।
(घट्टादिदेयं) शुल्को (ऽस्त्री)
प्राभृतं (तु) प्रदेशनम् ॥ २७ ॥
उपायनमुपग्राह्यमुपहार-(स्तथो)-पदा ।
(यौतकादि तु यद्देयं) स दायो हरणं (च तत्) ॥ २८ ॥
तत्काल (स्तु) तदात्वं (स्यात्)
(उत्तरः काल) आयतिः ।
सान्दृष्टिकं (फलं सद्यः)
उदर्कः (फलमुत्तरम्) ॥ २९ ॥
अदृष्टं (वह्नितोयादि)
दृष्टं (स्वपरचक्रजम्) ।
(महीभुजाम्) अह्निभयं (स्वपक्षप्रभवं भयम्) ॥ ३० ॥
प्रक्रिया (त्व)-धिकारः (स्याच्)
चामरं (तु) प्रकीर्णकम् ।
नृपासनं (यत्तद्) भद्रासनं
सिंहासनं (तु तत्) ॥ ३१ ॥
(हैमं)
छत्रं (त्वा)-तपत्रं
(राज्ञस्तु) नृपलक्ष्म (तत्) ।

भद्रकुम्भः पूर्णकुम्भो

भृङ्गारः कनकालुका ॥ ३२ ॥

निवेशः शिविरं (गण्डे)

सज्जनं (तू)-परिच्छदम् ।

(हस्त्यश्वरथपादातं) सेनाङ्गं (स्याच्चतुष्टयम्) ॥ ३३ ॥

दन्ती दन्तावलो हस्ती द्विरदो ऽनेकपो द्विपः ।

मतङ्गजो गजो नागः कुञ्जरो वारणः करी ॥ ३४ ॥

द्विभः स्तम्बेरमः पद्मी

यूथनाथ-(स्तु) यूथपः ।

मदोत्कटो मदकलः

कलभः करिशावकः ॥ ३५ ॥

प्रभिन्नो गर्जितो मत्तः

(समाव्) उद्धान्त निर्मदौ ।

हास्तिकं गजता (द्वन्द्वे)

करिणी धेनुका वशा ॥ ३६ ॥

गण्डः कटो

मदो दानं

वमथुः करशीकरः ।

कुम्भौ (तु पिण्डौ शिरसः)

(तयोर्मध्ये) विदुः (पुमान्) ॥३७॥

अवग्राहो ललाटं (स्यात्)

ईषिका (त्वक्षिकूटकम्) ।

(अपाङ्गदेशो) निर्याणं

(कर्णमूलं तु) चूलिका ॥ ३८ ॥

(अधः कुम्भस्य) वाहित्थं

प्रतिमान-(मधो ऽस्य यत्) ।

आसनं स्कन्धदेशः (स्यात्)

पद्मकं विन्दुजालकम् ॥ ३९ ॥

पक्षभागः पार्श्वभागो

दन्तभाग-(स्तु यो ऽयतः)।

(द्वौ पूर्वपश्चाज्जङ्घादिदेशौ) गात्रा ऽवरे (क्रमात्) ॥४०॥

तोत्रं वैणुकम्-

आलानं बन्धस्तम्भे

(ऽथ) शृङ्खले।

अन्दुको निगडो (ऽस्त्री स्यात्)

अङ्कुशो-(ऽस्त्री) हस्तिः (स्त्रियाम्) ॥४१॥

घृणाकल्या वरत्रा (स्यात्)

कल्पना मज्जना (समे)।

प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो-(द्वयोः) ॥ ४२ ॥

वीतं (त्वसारं हस्त्यश्वं)

वारौ (तु) गजबन्धनौ।

घोटके पौति तुरग तुरङ्गा ऽश्व तुरङ्गमाः ॥ ४३ ॥

वाजि वाहा ऽर्व गन्धर्व हय सैन्धव सप्तयः।

आजानेयाः कुलीनाः (स्युः)

विनीताः साधुवाहिनः ॥ ४४ ॥

वामायुजाः पारसीकाः काम्बोजा वाह्लिका (हयाः)।

ययुः (अश्वो) ऽश्वमेधीयो

जवन-(स्तु) जवाधिकः ॥ ४५ ॥

पृष्ठ्यः स्थौरी

(सितः) कर्की

रथ्यो (वोढ़ा रथस्य यः)।

बालः किशोरी

वाम्यश्वा वड़वा

वाड़वं (गणि) ॥ ४६ ॥

(त्रिष्वा)-श्वीनं (यदश्वेन दिनैनैकेन गम्यते)।

कश्यं (तु मध्यमश्वानां)

ह्रेषा क्रेषा (च निस्वनः) ॥ ४७ ॥

निगाल (स्तु) गलोद्देशो-

(द्वन्द्वे त्व)-ऽश्वीयमाश्व (वत्)।

आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम् ॥ ४८ ॥

(गतयो ऽमूः पञ्च) धारा

घोणा (तु) प्रोथ-(मश्वियाम्)।

कविका (तु) खलीनो-(ऽस्त्री)

शफं (क्लीवे) खुरः (पुमान्) ॥ ४९ ॥

पुच्छो-(ऽस्त्री) लूम लाङ्गूले बालहस्त (श्च) बालधिः।

(त्रिष्व)-पावृत्त लुठितौ (परावृत्ते मुहुर्भुवि) ॥ ५० ॥

(याने चक्रिणि युद्धार्थे) शताङ्गः स्यन्दनो रथः।

(ऽसौ) पुष्परथ-(श्चक्रयानं न समराय यत्) ॥ ५१ ॥

कर्णीरथः प्रवङ्गं हयनं (च समं त्रयम्)।

(क्लीवे) ऽनः शकटो-(ऽस्त्री स्याद्)

-(गन्त्री कम्बलिवाह्यकम्) ॥५२॥

शिविका याप्ययानं (स्याद्)

दोला प्रेङ्खा-(दिकाः स्त्रियाम्)।

(उभौ तु) द्वैप वैयाघ्रौ (द्वैपिचर्मावृते रथे) ॥ ५३ ॥

(पाण्डुकम्बलसंवीतः स्यन्दनः) पाण्डुकम्बली।

(रथे) काम्बल वास्त्रा-(द्याः कम्बलादिभिरावृते) ॥५४॥

(त्रिषु द्वैपादयो-)

रथ्या रथकट्या (रथव्रजे)।

धूः (स्त्री क्लीबे) यानमुखं
(स्यात्) रथाङ्गमपस्करः ॥ ५५ ॥
चक्रं रथाङ्गं
(तस्याऽन्ते) नेमिः (स्त्री स्यात्) प्रधिः (पुमान्) ।
पिण्डिका नाभिः
अक्षाग्रकीलके (तु द्वयोः) अणिः ॥ ५६ ॥
रथगुप्तिर्वरूथो (ना)
कूवर-(स्तु) युगन्धरः ।
अनुकर्षौ (दार्वधस्यं)
प्रासङ्गौ (ना युगाद्युगः) ॥ ५७ ॥
(सर्वं स्यात्) वाहनं यानं युग्यं पत्रं (च) धारणम् ।
(परम्परावाहनं यत्तट्) वैनीतकम्-(ऽस्त्रियाम्) ॥ ५८ ॥
आधोरणा हस्तिपका हस्त्यारोहा निषादिनः ।
नियन्ता प्राजिता यन्ता सूतः क्षत्ता (च) सारथिः ॥५९॥
मध्येष्टृ दक्षिणस्थौ (च संज्ञा रथकुटुम्बिनः) ।
रथिनः स्यन्दनारोहाः
अश्वारोहा-(स्तु) सादिनः ॥ ६० ॥
भटा योधा-(श्च) योद्धारः
सेनारक्षा-(स्तु) सैनिकाः ।
(सेनायां समवेता ये) सैन्या-(स्ते) सैनिका (श्च ते) ॥ ६१ ॥
(बलिनो ये सहस्रेण) साहस्रा-(स्ते) सहस्रिणः ।
परिधिस्थः परिचरः
सेनानीर्वाहिनीपतिः ॥ ६२ ॥
कञ्चुको वारवाणो-(ऽस्त्री)
(यत्तु मध्ये सकञ्चुकाः) ।
(वध्नन्ति तत्) सारसना ऽधिकाञ्ची

(ऽस्य) शोषैकम् ॥ ६३ ॥

शोषैण्य (स्त्र) शिरस्त्रे

(ऽस्य) तनुत्रं वर्म दंशनम् ।

उरश्छदः कङ्कटको जागरः कवचो (ऽस्त्रियाम्) ॥ ६४ ॥

आमुक्तः प्रतिमुक्त-(स्त्र) पिनद्ध-(स्त्रा) ऽपिनद्ध (वत्) ।

सन्नद्धो वर्मितः सज्जो दंशितो व्यूढकङ्कटः ॥ ६५ ॥

(विष्वामुक्तादयो-)

(वर्मभृतां) कावचिकं (गणे) ।

पदाति पत्तिपदग पादातिक पदातयः ॥ ६६ ॥

पद्म (स्त्र) पदिक (स्त्रा-)

(ऽस्य) पादातं पत्तिसंहतिः ।

शस्त्राजीवे काण्डस्पृष्टा ऽयुधीया ऽयुधिकाः (समाः) ॥६७॥

(कृतहस्तः सुप्रयोग विशिख: कृतपङ्क (वत्) ।

अपराद्धपृषत्को-(ऽसौ लक्ष्याद्यश्युतसायकः) ।

धन्वी धनुष्मान् धानुष्को निषङ्गी धनुर्द्धरः ।

(स्यात्) काण्डवां-(स्तु) काण्डारः

प्राकोकः प्रक्षिहेतिकः ॥ ६८ ॥

यष्टीक पारश्वधिकौ (यष्टिपरशुकान्वयौ) ।

नैस्त्रिंशिको ऽसिहेतिः (स्यात)

(समौ) प्रासिक कौन्तिकौ ॥ ७० ॥

चर्मी फलकपाणिः (स्यात्)

पताकी ध्वजिनीकः ।

अनुप्लवः सहाय-(स्त्रा)-ऽनुचरौ ऽभिसः (स्त्रा) ॥ ७१ ॥

पुरोगा ऽग्रेसरप्रष्ठा ऽग्रतःसर पुरःसराः ।

पुरोगमः पुरोगामी

मन्दगामी (न्) मन्थरः ॥ ७२ ॥

जङ्घालो ऽतिजवः

(तुल्यौ) जङ्घाकरिक जाङ्घिकौ ।

तरस्वी त्वरितो वेगी प्रजयी जवनो जवः ॥ ७३ ॥

जय्यो (यः शक्यते जेतुं)

जेयो (जेतव्यमात्रके) ।

जैत्र-(स्तु) जेता

(यो गच्छत्यलं विद्विषतः प्रति) ॥ ७४ ॥

(सो) ऽभ्यमित्रो ऽभ्यमित्रीयो (ऽप्य) ऽभ्यमित्रीण इत्यपि ।

ऊर्ज्जस्वलः (स्याद्) ऊर्ज्जस्वी (य ऊर्जोऽतिशयान्वितः) ॥७५॥

(स्याद्) उरस्वानुरसिलो

रथिको रथिरो रथी ।

कामगाम्यनुकामीनो (ह्य)

ऽत्यन्तीन (स्वथा भृशम्) ॥ ७६ ॥

शूरो वीर-(श्व) विक्रान्तो

जेता जिष्णु-(श्व) जित्वरः ।

सांयुगीनो (रणे साधुः)

(शस्त्राजीवादयस्त्रिषु) ॥ ७७ ॥

ध्वजिनी वाहिनी सेना पृतना ऽनीकिनी चमूः ।

वरूथिनी बलं सैन्यं चक्रं (चा) ऽनीक-(मस्त्रियाम्) ॥ ७८ ॥

व्यूह-(स्तु) बलविन्यासो

(भेदा दण्डादयो युधि) ।

प्रत्यासारो व्यूहपार्ष्णिः

(सैन्यपृष्ठे) प्रतिग्रहः ॥ ७९ ॥

(एकेभरथा त्वश्वा) पत्तिः (पञ्चपदातिका) ।

(पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम्) ॥ ८० ॥

सेनामुखं गुल्म गणौ वाहिनी पृतना चमूः ।

अनीकिनी

(दशानीकिन्य)-ऽक्षौहिण्य-

(ऽथ) सम्पदि ॥ ८१ ॥

सम्पत्तिः श्री-(श्च) लक्ष्मी-(श्च)

(विपत्त्यां विपदापदौ) ।

आयुधं (तु) प्रहरणं शस्त्रमस्त्रम्

(अथा ऽस्त्रियौ) ॥ ८२ ॥

धनुश्चापौ धन्व शरासन कोदण्ड कार्मुकम् ।

इष्वासो (ऽप्य)

(ऽथ कर्णस्य) कालपृष्ठं (शरासनम्) ॥ ८३ ॥

(कपिध्वजस्य) गाण्डीव गाण्डिवौ (पुंनपुंसकौ) ।

(कोटिरस्या)-ऽटनौ

गोधा तले (ज्याघातवारणे) ॥ ८४ ॥

लस्तक (स्तु) धनुर्मध्यं

मौर्वी ज्या शिञ्जिनी गुणः ।

(स्यात्) प्रत्यालीढ़मालीढ़-(मित्यादिस्थानपञ्चकम्) ॥८५॥

लक्ष्यं लक्षं शरव्यं (च)

शराभ्यासे उपासनम् ।

पृषत्क वाण विशिखा अजिह्मग खगाशुगाः ॥ ८६ ॥

कलम्ब मार्गण शराः पत्री रोप इषु (र्द्वयोः) ।

प्रक्ष्वेडना (स्तु) नाराचाः

पत्री वाजः

(त्रिषूत्तरे) ॥ ८७ ॥

निरस्तः (प्रहिते वाणे)

(विषाक्ते) दिग्ध लिप्तकौ ।

तूणोपासङ्ग तूणीर निषङ्गा इषुधि-(र्द्वयोः) ॥ ८८ ॥

तूणयां

खड्गे (तु) निस्त्रिंश चन्द्रहासा ऽसिरिष्टयः ।
कौक्षेयको मण्डलाग्रः करपालः कृपाण (वत्) ॥ ८९ ॥
त्सरुः (खड्गादिमुष्टौ स्यात्)
मेखला (तन्निबन्धनम्) ।
फलको (ऽस्त्री) फलं चर्म
संग्राहो (मुष्टिरस्य यः) ॥ ९० ॥
द्रुघणे मुद्गर घनौ
(स्याद्) ईली करपालिका ।
भिन्दिपालः सृग (स्त्रुल्यो)
परिवः परिघातनः ॥ ९१ ॥
(द्वयोः) कुठारः स्वधितिः परशु (श्च) परश्वधः ।
(स्यात्) शस्त्रौ (चा) ऽसिधेनवो (च) कुरिका (चा)
ऽसिधेनुका ॥ ९२ ॥
(वा पुंसि) शल्यं शङ्कु (र्नौ)
सर्वला तोमरो (ऽस्त्रियाम्) ।
प्रास-(स्तु) कुन्तः
कौण (स्त्रियः) पाल्यस्त्रि कोटयः ॥९३॥
सर्वाभिसारः सर्वौघः (सर्वसन्नह्यनार्थकः) ।
लोहाभिहारो (ऽस्त्रभृतां राज्ञां नीराजनाविधिः) ॥९४॥
(यत्सेनयाभिगमनमरौ तद्) अभिषेणनम् ।
याचा व्रज्या ऽभिनिर्याणं प्रस्थानं गमनं गमः ॥ ९५ ॥
(स्याद्) असारः प्रसरणं
प्रचक्रं (चलितार्थकम्) ।
(अहितान् प्रत्यभीतस्य रणे यानम्) अतिक्रमः ॥ ९६ ॥

चक्रिका (घाण्टिकार्थकाः) ।
(स्तुः) मागधा-(स्तु) मगधा
वन्दिनः स्तुतिपाठकाः ॥ ९७ ॥
संशप्तका-(स्तु समयात् संग्रामादनिवर्त्तिनः) ।
रेणु-(द्वयोः स्त्रियां) धूलिः पांशु-(र्नो न द्वयो) रजः ॥९८॥
चूर्णे चोदः
समुत्पिञ्ज पिञ्जलौ (भृशमाकुले) ।
पताका वैजयन्तौ (स्यात्) केतनं ध्वज-(मस्त्रियाम्) ॥९९॥
(सा) वीराशंसनं (युद्धभूमिर्यातिभयप्रदा) ।
(अहं पूर्वमहं पूर्वमित्य)-ऽहं पूर्विका (स्त्रियाम्) ॥ १०० ॥
आहोपुरुषिका (दर्पाद् या स्यात् सम्भावनात्मनि) ।
अहमहमिका (तु सा स्यात् परस्परं यो भवत्यहङ्कारः) ।
द्रविणं तरः सहो बल शौर्य्याणि स्थाम शुष्म (च) ॥१०१॥
शक्तिः पराक्रम प्राणौ
विक्रम-(स्त्व)-ऽतिशक्तिता ।
वीरपाणं (तु यत्पानं हत्ते भाविनि वा रणे) ॥ १०२ ॥
युद्धमायोधनं जन्यं प्रधनं प्रविदारणम् ।
मृधमास्कन्दनं सङ्ख्यं समौकं साम्परायिकम् ॥ १०३ ॥
(अस्त्रियां) समरा ऽनीक रणाः कलह विग्रहौ ।
सम्प्रहारा ऽभिसम्पात कलि संस्फोट संयुगाः ॥ १०४ ॥
अभ्यामर्दः समाघात कलि संग्रामा ऽभ्यागमाहवाः ।
समुदायः (स्त्रियः) संयत् समित्याजि समद्युधः ॥ १०५ ॥
नियुद्धं बाहुयुद्धे-
(ऽथ) तुमुलं रणसङ्कुले ।
क्ष्वेड़ा (तु) सिंहनादः (स्यात्)
(करिणां) घटना घटा ॥१०६॥

क्रन्दनं योधसंरावो
ह्रंहितं करिगर्जितम् ।
विस्फारो (धनुषः स्वानः)
पटहाड़म्बरौ (समौ) ॥ १०७ ॥
प्रसभं (तु) बलात्कारो हठो-
(ऽथ) स्खलितं स्खलम् ।
अजन्यं (क्लीवम्) उत्पात उपसर्गः (समं त्रयम्) ॥१०८॥
मूर्च्छा (तु) कश्मलं मोहो (ऽप्य)-
ऽवमर्दः (स्तु) पीड़नम् ।
अभ्यवस्कन्दनं (त्व) ऽभ्यासादनं
विजयो जयः ॥ १०९ ॥
वैरशुद्धिः प्रतीकारो वैरनिर्यातनं (च सा) ।
प्रद्रावोद्द्रावसन्द्रावसंदावा विद्रवोद्रवः ॥ ११० ॥
अपक्रमो ऽपयानं (च)
(रणे भङ्गः) पराजयः ।
पराजित पराभूतौ (त्रिषु)
नष्टतिरोहितौ ॥ १११ ॥
प्रमापणं निवर्हणं निष्कारणं निष्पारणम् ।
प्रवासनं परासनं निषूदनं निर्हिंसनम् ॥ ११२ ॥
निर्वासनं संज्ञपनं निर्ग्रन्थनमपासनम् ।
निस्तर्हणं निहननं क्षपणं परिवर्जनम् ॥ ११३ ॥
निर्वापणं विघसनं मारणं प्रतिघातनम् ।
उद्वासन प्रमथन क्रथनोज्जासनानि (च) ॥ ११४ ॥
आलम्भ पिञ्ज विशर घातोन्मथ्य वधा (अपि) ।
(स्यात्) पञ्चता कालधर्मोदिष्टान्तः प्रलयो ऽत्ययः ॥११५॥
अन्तो नाशो (द्वयोः) मृत्युर्मरणं निधनो (ऽस्त्रियाम्) ।

परासु प्राप्तपञ्चत्व परेत प्रेत संस्थिताः ॥ ११६ ॥
मृत प्रमीतौ (चिष्वेते)
चिता चित्या चितिः (स्त्रियाम्) ।
कबन्धो (ऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरम्) ॥ ११७ ॥
श्मशानं (स्यात्) पिटवनं
कुणपः शवम् (अस्त्रियाम्) ।
प्रग्रहोपग्रहौ वन्द्यां
कारा (स्याद्) बन्धनालये ॥ ११८ ॥
(पुंसि भूम्नः) ऽसवः प्राणा (श्चैवं)
जीवो ऽसुधारणम् ।
आयुर्जीवितकालो (ना)
जीवातुर्जीवनौषधम् ॥ ११९ ॥
इति क्षत्रवर्गः ।

अथ वैश्यवर्गः

उरव्या उरुजा अर्य्या वैश्या भूमिस्पृशो विशः ।
आजीवो जीविका वार्त्ता वृत्तिर्वर्त्तन जीवनं ॥ १ ॥
(स्त्रियां) कृषिः पाशुपाल्यं वाणिज्यं (चेति वृत्तयः) ।
सेवा श्ववृत्तिः
अनृतं कृषिः
उञ्छशिलं (वृ)-तम् ॥ २ ॥
(द्वे याचितायाचितयोर्यथासंख्यं) मृता ऽमृते ।
सत्यानृतं वणिग्भावः
(स्याद्) ऋणं पर्य्युदञ्चनम् ॥ ३ ॥
उद्धारो

ऽर्थंप्रयोग-(स्तु) कुसीदं हृद्विजीविका ।
(याच्ञाप्राप्तं) याचितकं
(नियमाद्) आपमित्यकम् ॥ ४ ॥
उत्तमर्णो ऽधमर्णौ (द्वौ प्रयोक्तृग्राहकौ क्रमात्) ।
कुसीदिको वार्द्धुषिको हृद्यराजीव-(स्य) वार्द्धुषिः ॥ ५ ॥
क्षेत्राजीवः कर्षक-(स्य) कृषिक (स्य) कृषीवलः ।
(क्षेत्रं) व्रैहेयशालेयं (व्रीहिशाल्युद्भवोचितम्) ॥ ६ ॥
यव्यं यवक्यं यष्टिक्यं (यवादिभवनं हि यत्) ।
तिलं तैलीन (वन्माषोमाणुभङ्गाद्विरूपता) ॥ ७ ॥
मौद्गीनं कौद्रवीणा (दिशेषधान्योद्भवोचितम्) ।
बीजाकृतं (तू) सकृष्टं
सौत्यं कृष्टं (च) हल्य (वत्) ॥ ८ ॥
त्रिगुणाकृतं तृतीयाकृतं त्रिहल्यं त्रिसौत्य (मपि तस्मिन्) ।
द्विगुणाकृते (तु सर्वं पूर्वं) सम्बाकृत (मपौह) ॥ ९ ॥
(द्रोणाढ़कादिवापादौ) द्रौणिकाढ़किका-(दयः) ।
(खारीम्बापस्तु) खारीक
(उत्तमर्णादयस्त्रिषु) ॥ १० ॥
(पुंनपुंसकयोः) वप्रः केदारः क्षेत्रम्
(अस्य तु) ।
कैदारकं (स्यात्) कैदार्यं क्षेत्रं कैदारिकं (गणे) ॥११॥
लोष्टानि लेष्टवः (पुंसि)
कोटिल्यो लोष्टभेदनः ।
प्राजनं तोदनं तोत्रं
खनित्रमवदारणम् ॥ १२ ॥
दात्रं लवित्रम्
आवन्त्यो योत्रं योक्त्रम्

(अथो) फलम् ।

निरीषं कूटकं

फालः कृषिको

लाङ्गलं हलम् ॥ १३ ॥

गोदारणं (च) सीरो-

(ऽथ) शम्या (स्त्री) युगकीलकः ।

ईषा लाङ्गलदण्डः (स्यात्)

सीता लाङ्गलपद्धतिः ॥ १४ ॥

(पुंसि) मेधिः (खले दारु न्यस्तं यत् पशुबन्धने) ।

आशु व्रीहिः पाटलः (स्यात)

सितशूक यवौ (समौ) ॥१५॥

तोक्म (न्तु तत्र हरिते)

कणाय (न्तु) सतीलकः ।

हरेणु खण्डिकौ (चास्त्रिन्)

कोरदूष-(न्तु) कोद्रवः ॥ १६ ॥

मङ्गल्यको मसूरो-

(ऽथ) मयुष्टक मपुष्टकौ ।

वनमुद्गः

सर्षपे (तु द्वौ) तन्तुभ कदम्बकौ ॥ १७ ॥

सिद्धार्थ (स्त्वेष धवलो)-

गोधूमः सुमनः (समौ) ।

(स्याद्) यावक-(स्तु) कल्माष-

शणको हरिमन्थकः ॥ १८ ॥

(द्वौ तिले) तिलपेज-(श्व) तिलपिञ्ज-(श्व निष्फले) ।

क्षवः क्षुधाभिजननो राजिका क्षणिकासुरी ॥ १९ ॥

(स्त्रियौ) कङ्गु प्रियङ्गू (द्वे)

अतसी (स्याद्) उमा क्षुमा ।

मातुलानी (तु भङ्गायां)

व्रीहिभेद-(स्त्र) ऽणुः (पुमान्) ॥२०॥

किंशारुः शस्यशूकं (स्यात्)

कणिशं शस्यमञ्जरी ।

धान्यं व्रीहिः स्तम्बकरिः

स्तम्बो गुच्छ-(स्तृणादिनः) ॥ २१ ॥

नाडी नालं (च) काण्डो-(ऽस्य)

पलालो (ऽस्त्री स निष्फलः) ।

कडङ्गरो बुसं (क्लीवे)

(धान्यत्वचि पुमां)-स्तुषः ॥ २२ ॥

शूको (ऽस्त्री श्लक्ष्ण तीक्ष्णाग्रे)

शमी सिम्बा

(त्रिषूत्तरे) ।

झटजमावसितं (धान्यं)

पूतं (तु) बहुलीकृतम् ॥ २३ ॥

(माषादयः) शमीधान्ये

शूकधान्य (यवादयः) ।

शाल्यः (कलमाद्या श्च षष्ठिकाद्या श्च पुंस्यमी) ॥ २४ ॥

तृणधान्यानि नीवाराः

(स्त्री) गवेडुर्गवेधुका ।

अयोग्रं मुसली (ऽस्त्री स्याद्)

उदूखलमुलूखलम् ॥ २५ ॥

प्रस्फोटनं शूर्प-(मस्त्री)

चालनी ततउः (पुमान्) ।

स्यत प्रसेवौ

काण्डालपिटौ

कठ किलिञ्जकौ ॥ २६

(समानौ)

रसवत्यान्तु पाकस्थान महानसे ।

यौरोगव-(स्तदध्यक्षः)

सूपकारा-(स्तु) बल्लवाः ॥ २७ ॥

आरालिका आन्धसिकाः सूदा औदनिका गुणाः ।

आपूपिकः कान्दविको भक्ष्यकार (इमे त्रिषु) ॥ २८ ॥

अश्मन्तमुद्वानमधिश्रयणी चुल्लिरन्तिका ।

अङ्गारधानिका ऽङ्गारशकट्य-(पि) हसन्त्य-(पि) ॥ २९ ॥

हसन्य-(प्य)

(ऽथ न स्त्री स्याद्) अङ्गारो ऽलातमुल्मुकम् ।

(क्लीवे) ऽम्बरीषं भ्राष्ट्रो (ना)

कन्दू (र्वा) स्वेदनी (स्त्रियाम्) ॥ ३० ॥

अलिञ्जरः (स्यात्) मणिकं

ककय्यालुगलान्तका ।

पिठरः स्थाल्युखा कुण्डं

कलश-(स्तु त्रिषु द्वयोः) ॥ ३१ ॥

घटः कुट निपाव्

(अस्त्री) सरावो वर्द्धमानकः ।

ऋजीषं पिष्टपचनं

कंसो-(ऽस्त्री) पानभाजनम् ॥ ३२ ॥

कुतूः (कुत्तेः स्नेहपात्रं)

(सैवाल्पा) कुतुपः (पुमान्) ।

(सर्वम्) आवपनं भाण्डं पात्रमात्रे (च) भाजनम् ॥३३॥

दर्विः कम्बिः खजाका (च स्यात्)

तद्दूर्वारुहस्तकः ।

(अस्त्री) शाकं हरितकं शिग्रुः

(अस्य तु नाड़िका) ॥ २४ ॥

कड़म्ब-(श्च) कलम्ब (श्च)

वेसवार उपस्करः ।

तिन्तिड़ीक-(श्च) चुक्र-(श्च) वृक्षाम्लम्

(अथ) बेल्लजम् ॥ २५ ॥

मरीचं कोलकं कृष्णमूषणं धर्म्मपत्तनम् ।

जीरकौ जरणौ अजाजी कणाः

(कृष्णे तु जीरके) ॥ २६ ॥

सुषवी कारवी पृथ्वी पृथुः कालोपकुञ्चिका ।

आर्द्रकं शृङ्गवेरं (स्याद्)

(अथ) छत्रा वितुन्नकम् ॥ २७ ॥

कुस्तुम्बुरु (च) धन्याकम्

(ऽथ) शुण्ठी महौषधम् ।

(स्त्रीनपुंसकयोः) विश्वं नागरं विश्वभेषजम् ॥ २८ ॥

आरनालक सौवीर कुल्माषा ऽभिषुतानि (च) ।

अवन्तिसोम धन्याम्ल कुक्कुलानि (च) काञ्जिके ॥ २९ ॥

सहस्रवेधि जतुकं वाल्हिकं हिङ्गु रामठम् ।

तत्पत्री कारवी पृथ्वी वाष्पिका कवरी पृथुः ॥ ४० ॥

निशाह्वा काञ्चनी पीता हरिद्रा वरवर्णिनी ।

सामुद्रं (यत्तु) लवणमत्तोयं वमिर-(श्च तत्) ॥ ४१ ॥

सैन्धवो (ऽस्त्री) शितशिवं मारिणमन्य (श्च) सिन्धुजे ।

रौमकं वसुकं

पाक्यं विड़-(श्च) कृत्रिमे (द्वयम्) ॥ ४२ ॥

सौवर्चले ऽम्लरुचके

तिलकं (तत्र मेचके)।
मत्स्यण्डो फाणितं (खण्डविकारौ)
शर्करा सिता ॥ ४३ ॥
कूर्चिका क्षीरविकृतिः (स्याद्)
(रसाला तु) मार्जिता ।
(स्यात्) तैमनं (तु) निष्ठानं
(त्रिलिङ्गा वासितावधेः) ॥ ४४ ॥
शूलाकृतं भटित्रं (स्याच्) कृल्यम्
ऊख्यं (तु) पैठरम् ।
प्रणीतमुपसम्पन्नं
प्रयस्तं (स्यात्) सुसंस्कृतम् ॥ ४५ ॥
(स्यात्) पिच्छिलं (तु) विजिलं
संसृष्टं शोधितं (समे) ।
चिक्कणं मसृणं स्निग्धं
(तुल्ये) भावित वासिते ॥ ४६ ॥
आपक्वं पौलिरभ्यूषो
लाजा (पुंभूम्नि चा) ऽक्षतम् ।
पृथकः (स्यात्) चिपिटको
धाना (भृष्टयवे स्त्रियाम्) ॥ ४७ ॥
घूपो ऽपूपः पिष्टकः (स्यात्)
करम्भो दधिसक्तवः ।
भिस्सा (स्त्री) भक्तमन्धो ऽन्नमोदनो (ऽस्त्री स) दीदिविः ॥ ४८ ॥
भिस्साटा दग्धिका
(सवरसाग्रे) मण्ड-(मस्त्रियाम्)।
मासराचाम निस्रावा (मण्डे भक्तसमुद्भवे) ॥ ४९ ॥
यवागूरुष्णिका स्राणा विलेपी तरला (च सा)।

गव्यं (त्रिषु गवां सर्वं)

गोविड्गोमय (मस्त्रियाम्) ॥ ५० ॥

(तत्तु शुष्कं) करीषो (ऽस्त्री)

दुग्धं क्षीरं पयः (समम्) ।

पयस्य (माज्यदध्यादि)

क्षय्यं (दधि घनेतरम्) ॥ ५१ ॥

घृतमाज्यं हविः सर्पिः

नवनीतं नवोद्धृतम् ।

(तत्तु) हैयङ्गवीनं (यत्) ह्योगोदोहोद्भवं घृतम् ॥ ५२ ॥

दण्डाहतं कालशेय मरिष्ट (मपि) गोरसः ।

तक्रं (द्यु) दध्निमथितं (पादाम्बुर्द्वाम्बुनिर्जलम्) ॥ ५३ ॥

(मण्डं दधिभवं) मस्तु

पौयूषो (ऽभिनवं पयः) ।

अशनाया बुभुक्षा क्षुद्

ग्रास-(स्तु) कवला (ऽर्थकः) ॥ ५४ ॥

सपौतिः (स्त्री) तुल्यपानं

सग्धिः (स्त्री) सहभोजनम् ।

उदन्या (तु) पिपासा तृट् तृषो

जग्धि-(स्तु) भोजनम् ॥ ५५ ॥

जेमनं लेप आहारो निघसो न्याद (इत्यपि) ।

सौहित्य तर्पणं तृप्तिः

फेलाभुक्तसमुज्झितम् ॥ ५६ ॥

कामं प्रकामं पर्य्याप्तं निकामेष्टं यथेप्सितम् ।

गोपे गोपाल गोसंख्य गोधुगाभीर वल्लवाः ॥ ५७ ॥

(गोमहिष्यादिकं) पादबन्धनं

(द्वौ) गवीश्वरे ।

गोमान् गोमी
गोकुल-(न्तु) गोधनं (स्याद्) गवां व्रजः ॥ ५८ ॥
(त्विष्वा) शितं गवीनं (तन्नावो यत्राशिताः पुरा) ।
उक्षाभद्रो बलीवर्द ऋषभो वृषभो वृषः ॥ ५९ ॥
अनड्वान् सौरभेयो गौः
(उक्षणां संहतिः) औक्षकम् ।
गव्या गोत्वा (गवां)
(वत्सधेन्वोः) वात्सक धैनुके ॥ ६० ॥
(वृषो महान्) महोक्षः (स्याद्)
वृद्धोक्ष-(स्तु) जरद्गवः ।
(उत्पन्न उक्षा) जातोक्षः
(सद्योजातस्तु) तर्णकः ॥ ६१ ॥
शकृत्करि-(स्तु) वत्सः (स्याद्)
दम्य वत्सतरौ (समौ) ।
आर्षभ्यः (षण्डतायोग्यः)
षण्डो गोपति रिट्चरः ॥ ६२ ॥
(स्कन्धप्रदेशस्तु) वहः
सास्ना (तु) गलकम्बलः ।
(स्यात्) नस्तित-(स्तु) नस्योतः
प्रष्ठवाड् युगपार्श्वगः ॥ ६३ ॥
(युगादीनाञ्च वोढ़ारो) युग्य प्रासङ्ग शाकटाः ।
(खनतितेन तद्वोढ़ा ऽस्येदं) हालिक सैरिकौ ॥ ६४ ॥
धुर्वहे धुर्य्य धौरेह धुरीणः (स) धुरन्धरः ।
(उभौ) एकधुरीणैकधुरानेकधुरावहे ॥ ६५ ॥
(सतु) सर्वधुरीणः (स्याद्योवै) सर्वधुरावहः ।
माहेयो सौरभेयो गौरुस्रा माता (च) मातृष्वसृणी ॥ ६६ ॥

अर्जुन्यघ्न्या रोहिणी (स्याद्)

(उत्तमा गोषु नैच्चिकी)।

(वर्णादिभेदात् संज्ञाः स्युः) शबली धवला (दयः) ॥ ६७ ॥

द्विहायनी द्विवर्षा (गौः)

एकाब्दा (त्वे) काहायनी ।

चतुरब्दा चतुर्हायणी

(एवं) त्र्यब्दा त्रिहायणी ॥ ६८ ॥

वशा वन्ध्या

ऽवतोका (तु) सवत्सभर्भा

(ऽथ) सन्धिनी ।

(आक्रान्ता वृषभेण)

(ऽप्य) वहिन्नभोपघातिनी ॥ ६९ ॥

काल्यापसर्य्या (प्रजने)

प्रष्ठौही बालगर्भिणी ।

(स्याद्) अचण्डी (तु) सुकरा

बहुसूतिः परिष्टुका ॥ ७० ॥

चिरशूता वष्कयणी

धेनुः (स्यात्) नवसूतिका ।

सुव्रता सुखसन्दोह्या

पीनोध्नी पीवरस्तनी ॥ ७१ ॥

द्रोणक्षीरा द्रोणदुग्धा

धेनुष्या (बन्धके स्थिता)।

समांसमीना (सा यैव प्रतिवर्षं प्रसूतये) ॥ ७२ ॥

ऊध-(स्तु क्लीवम्) आपीनं

(समौ) शिवक कौलकौ ।

(नपुंसि) दाम सन्दानं

पशुरज्जु-(स्तु) दामनी ॥ ७३ ॥
वैशाख मन्थ मन्थान मन्थानो मन्थदण्डके ।
कुठरो दण्डविष्कम्भे
मन्थनी गर्गरी (समे) ॥ ७४ ॥
उष्ट्रे क्रमेलक मय महाङ्गाः
करभः शिशुः ।
(करभाः स्युः) शृङ्खलका (दारवैः पादबन्धनैः) ॥ ७५ ॥
अजा छागी
स्तुभः च्छाग वस्त च्छगलका अजे ।
मिङ्गोरभ्रोरणोर्णायुर्मेष वृषाय एडकाः ॥ ७६ ॥
(उष्ट्रोरभ्राजवृन्द स्याद्) औष्ट्रकौरभ्रकाजकम् ।
चक्रीवन्त-(स्तु) बालेया रासभा गर्दभाः खराः ॥ ७७ ॥
वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक् ।
पण्याजीवो (ह्या) पणिकः क्रयविक्रयिक-(श्च सः) ॥७८॥
विक्रेता (स्याद्) विक्रयिकः
क्रायक क्रयकौ (समौ) ।
वाणिज्यं (तु) वणिज्या (स्यात्)
मूल्यं वस्नो-(ऽप्य) वक्रयः ॥ ७९ ॥
नीवी परिपणं मूलधनं
लाभो (ऽधिकं) फलम् ।
परिदानं परीवर्त्तो नैमेय निमया-(वपि) ॥ ८० ॥
(पुमान्) उपनिधि न्यासः
प्रतिदानं (तदर्पणम्) ।
(क्रये प्रसारितं) क्रय्यं
क्रेयं क्रेतव्य (मात्रके) ॥ ८१ ॥
विक्रेयं पणितव्यं (च) पण्यं (क्रय्यादयस्त्रिषु) ।

(क्लीवे) सत्यापनं सत्यङ्कारः सत्याकृतिः (स्त्रियाम्) ॥८२॥
विपणो विक्रयः
(संख्याः सङ्ख्येये स्युरादश्च त्रिषु ।
विंशत्याद्याः सदैकत्वे सर्वाः सङ्ख्ययसङ्ख्ययोः ॥ ८३ ॥
सङ्ख्यार्थे द्विबहुत्वे स्तः तासु चानवतेः स्त्रियः ।
षड्क्तेः शतसहस्रादिक्रमाद्दशगुणोत्तरम्) ॥ ८४ ॥
यौतवं द्रुवयं पाय्य-(मिति मानार्थकं त्रयम्) ।
(मानं) तुला ऽञ्जलिप्रस्थैः
(गुञ्जाः पञ्च) -द्यमाषकः ॥ ८५ ॥
(ते षोड़श) ऽक्ष कर्षौ (ऽस्त्री)
पलं (कर्षचतुष्टयम्) ।
सुवर्ण विस्तौ (हेम्नो ऽक्षे)
कुरुविस्त-(स्तु तत्पले) ॥ ८६ ॥
तुला (स्त्रियां पलशतं)
भारः (स्याद्विंशतिस्तुला) ।
आचितं दशभाराः स्युः)
(शाकटो भार) आचितः ॥ ८७ ॥
कार्षापणः कार्षिकः (स्यात्)
(कार्षिके ताम्रिके) पणः ।
(अस्त्रियाम्) आढ़क द्रोणौ खारो वाहो निकुञ्चकः ॥८८॥
कुडवः प्रस्थ (इत्याद्याः परिमाणार्थकाः पृथक्) ।
पाद-(स्तुरीयो भागः स्याद्)
अंश भागौ(तु) वण्टकः ॥ ८९ ॥
द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु ।
हिरण्यं द्रविणं द्युम्न मर्थरै विभवा (अपि) ॥ ९० ॥
(स्यात) कीश-(श्च) हिरण्यं (च हेमरूप्ये ज्ञताज्ञते) ।

(ताभ्यां यदन्यत्तत्) कुप्यं
(रूप्यं तदूढ्यमाहृतम्) ॥ ९१ ॥
गारुत्मतं मरकतमश्मगर्भं हरिन्मणिः ।
शोणरत्नं लोहितकः पद्मरागो
(ऽथ) मौक्तिकम् ॥ ९२ ॥
मुक्ता
(ऽथ) विद्रुमः (पुंसि) प्रवालं (पुंनपुंसकम्) ।
रत्नं मणि-(र्द्वयोरश्मजातौ मुक्तादिके ऽपि च) ॥ ९३ ॥
स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् ।
तपनीयं शातकुम्भं गाङ्गेयं भर्म कर्बुरम् ॥ ९४ ॥
चामीकरं जातरूपं महारजत काञ्चने ।
रूक्यं कार्त्तस्वरं जाम्बूनदमष्टापदौ (ऽस्त्रियाम्) ॥ ९५ ॥
(अलङ्कार सुवर्णं यत्) शृङ्गीकनक-(मित्यदः) ।
दुर्वर्णं रजतं रूप्यं खर्ज्जूरं श्वेत-(मित्यपि) ॥ ९६ ॥
रीतिः (स्त्रियाम्) आरकूटो (न स्त्रियाम्)
(अथ) ताम्रकम् ।
शुल्वं म्लेच्छमुखं दृष्टं वरिष्ठोदुम्बराणि (च) ॥ ९७ ॥
लोहो (ऽस्त्री) शस्त्रकं तीक्ष्णं पिण्डं कालायसा ऽयसी ।
अश्मसारो
(ऽथ) मण्डूरं सिंहान-मपि तन्मले) ॥ ९८ ॥
सर्वं स्यात्तैजसं) लौहं
(विकारस्त्वयसः) कुष्टी ।
क्षारः काचो
(ऽथ) चपलो रसः सूत-(श्च) पारदे ॥ ९९ ॥
गवलं (माहिषं शृङ्गम्)
अभ्रकं गिरिजा ऽमले ।

स्रोतोञ्जन-(न्तु) सौवीरं कापोताञ्जनयामुने ॥ १०० ॥
तुत्थाञ्जनं शिखिग्रीवं वितुन्नक मयूरके ।
कपोतो दार्विका (काथोद्भवं) तुत्थं
रसाञ्जनम् ॥ १०१ ॥
रसगर्भं तार्क्ष्यशैलं
गन्धाश्मनि (तु) गन्धकः ।
सौगन्धिक-(स्व)
चक्षुष्य कुलाल्यौ (तु) कुलत्थिका ॥ १०२
रीतिपुष्पं पुष्पकेतु पौष्पकं कुसुमाञ्जनम् ।
पिञ्जरं पीतकं तालमालं (च) हरितालके ॥ १०३ ॥
गैरेयमघ्यं गिरिजमश्मज-(श्च) शिलाजतु ।
वोल गन्धरस प्राण पिण्ड गोप रसाः (समाः) ॥ १०४ ॥
हिण्डीरो ऽब्धिकफः फेनः
सिन्दूरं नागसम्भवम् ।
नाग सीसक योगेष्ट वप्राणि
चपु पिच्चटम् ॥ १०५ ॥
रङ्ग वङ्गे
(ऽथ) पिचुस्तूलो
(ऽथ) कमलोत्तरम् ।
(स्यात्) कुसुम्भं वह्निशिखं महारजन-(मित्यपि) ॥१०६॥
मेषकम्बल ऊर्णायुः
श्मश्रोर्णं श्मश्रलोमनि ।
मधु क्षौद्रं माक्षिका (दि)
मधूच्छिष्टं (तु) मिक्षकम् ॥१०७॥
मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका ।
नैपाली कुनटीगोला

यवक्षारो यवाग्रजः ॥ १०८ ॥

पाक्यो

(ऽथ) सर्जिकाक्षारः कापोतः सुखवर्चकः ।

सौवर्चलं (स्याद्) रुचकं

त्वक्क्षीरी वंशरोचना ॥ १०९ ॥

शिग्रुजं श्वेतमरिचं

मोरटं (मूलमैक्षवम्) ।

ग्रन्थिकं पिप्पलीमूलं चटिकाशिर (इत्यपि) ॥ ११० ॥

गोलोमी भूतकेशी (ना)

पत्राङ्गं रक्तचन्दनम् ।

त्रिकटुत्रूषणं व्योषं

त्रिफला (तु) फलत्रिकम् ॥ १११ ॥

इति वैश्यवर्गः ।

अथ शूद्रवर्गः ।

शूद्रा (श्वा) ऽवरवर्णा-(श्च) ढपला (श्च) जघन्यजाः ।

आचण्डालात्तु) सङ्कीर्णा (अम्बष्ठ करणादयः) ॥ १ ॥

(शूद्राविप्रो स्तु) करणो

ऽम्बष्ठो (वैश्याद्विजन्मनोः) ।

(शूद्रा क्षत्रिययोः) उग्रो

मागधः (क्षत्रियाविप्रोः) ॥ २ ॥

माहिष्यो (ऽर्य्याक्षत्रिययोः

क्षत्ता-(र्य्याशूद्रयोः सुतः) ।

(ब्राह्मण्यां क्षत्रियात्) सूतः

(तस्यां) वैदेहको (विशः) ॥ ३ ॥

रथकार·(स्तु माहिष्यात् करण्यां यस्य सम्भवः ।
(स्यात्) चाण्डाल·(स्तु जनितो ब्राह्मण्यां वृषलेन यः) ॥४॥
कारुः शिल्पी
(संहतैस्तैर्हयोः) श्रेणिः (सजातिभिः) ।
कुलकः (स्यात्) कुलश्रेष्ठी
मालाकार (स्तु) मालिकः ॥ ५ ॥
कुम्भकारः कुलालः (स्यात्)
पलगण्ड (स्तु) लेपकः ।
तन्तुवायः कुविन्दः (स्यात्)
तुन्नवाय·(स्तु) सौचिकः ॥ ६ ॥
रङ्गाजीव श्चित्रकरः
शस्त्रमार्जो सिधावकः ।
पादुकाचर्मकारः (स्याद्)
व्योकारो लोहकारकः ॥ ७ ॥
नाड़ीन्धमः स्वर्णकारः कलादो रूपकारके ।
(स्यात्) शाङ्खिकः काम्बविकः
शौल्विक स्ताम्रकुट्टकः ॥ ८ ॥
तक्षा (तु) वर्द्धकिस्त्वष्टा रथकार·(श्च) काष्ठतट् ।
(ग्रामाधीनो) ग्रामतक्षः
कौटतक्षो (ऽनधीनकः) ॥ ९ ॥
क्षुरि मुण्ड दिवाकीर्त्ति नापिता ऽन्तावसायिनः ।
निर्णेजकः (स्याद्) रजकः
शौण्डिको मण्डहारकः ॥ १० ॥
जाबालः (स्याद्) अजाजीवो
देवाजीवी (तु) देवलः ।
(स्यात्) माया शाम्बरी

मायाकार-(स्तु) प्रातिहारिकः ॥ ११ ॥

शैलालिन-(स्तु) शैलूषा जायाजीवाः कथाखिनः ।

भरता (इत्यपि) नटा-

स्वारणा (स्तु) कुशीलवाः ॥ १२ ॥

मार्दङ्गिका मौरजिकाः

पाणिवादा (स्तु) पाणिघा ।

वेणुधाः (स्युः) वैणविका

वीणावादा-(स्तु) वैणिकाः ॥ १३ ॥

जीवान्तकः शाकुनिको

(द्वौ) वागुरिक जालिकौ ।

वैतंसिकः कौटिक-(श्च) मांसिक (श्च समं त्रयम्) ॥ १४ ॥

भृतको भृतिभुक्कर्मकरो वैतनिको (ऽपि सः) ।

वार्त्तावहो वैवधिको

भारवाह-(स्तु) भारिकः ॥ १५ ॥

विवर्णः पामरो नीचः प्राकृत-(श्च) पृथग्जनः ।

निहीनो ऽपसदो जाल्मः क्षुल्लक-(श्चे)-तर (श्च सः) ॥ १६ ॥

भृत्ये दासेर दासेय दास गोप्यक चेटकाः ।

नियोज्य किङ्कर प्रैष्य भुजिष्य परिचारकाः ॥ १७ ॥

पराचित परिस्कन्द परजात परैधिताः ॥ १८ ॥

मन्दस्तुन्दपरिमृज आलस्यः शीतको ऽलसो ऽनुष्णः ।

दक्षे (तु) चतुर पेशल पटवः सूत्थान उष्ण-(श्च) ॥ १९ ॥

चण्डाल प्लव मातङ्ग दिवाकीर्त्ति जनङ्गमाः ।

निषाद श्वपचावन्तेवासि चाण्डाल पुक्कसाः ॥ २० ॥

(भेदाः किरातशवरपुलिन्दा) म्लेच्छ (जातयः) ।

व्याधो मृगवधाजीवो मृगयुर्लुब्धको (ऽसि सः) ॥ २१ ॥

कौलेयकः सारमेयः कुक्कुरो मृगदंशकः ।

शुनकी भषकः श्वा (स्याद्)
अलर्क-(स्तु स योषितः) ॥ २२ ॥
(श्वा) विश्वकद्रु-(स्तेमयाकुशलः)
सरमा शुनी ।

विट्चरः शूकरो ग्राम्यो
वर्कर-(स्तरुणः पशुः) ॥ २३ ॥
श्वाचोदनं मृगव्यं (स्याद्) आखटो मृगया (स्त्रियाम्) ।
(दक्षिणाकर्लंध्ययोगाद्) दक्षिणेर्मा (कुरङ्गकः) ॥ २४ ॥
चौरैकागारिक स्तेन दस्यु तस्कर मोषकाः ।
प्रतिरोधि परास्कन्दि पाटच्चर मलिम्लुचाः ॥ २५ ॥
चौरिका स्तैन्य चौर्यं (च) यंस्त
लोम्नं (तु तद्धनम्) ।
वीतंस-(स्तूपकरणं बन्धने मृगपक्षिणाम्) ॥ २६ ॥
उन्माथः कूटयन्त्रं (स्याद्)
वागुरा मृगबन्धिनी ।
शुल्वं वराटकः (स्त्री तु) रज्जु (स्त्रिषु) वटी गुणः ॥२७॥
उद्घाटनं घटौयन्त्रं (सलिलोद्वाहनं प्रहैः) ।
(पुंसि) वेमा वायदण्डः
सूत्राणि (नरि) तन्तवः ॥ २८ ॥
वाणि व्यूतिः (स्त्रियौ तुल्ये)
पुस्तं (लेप्याऽदिकर्मणि) ।
पाञ्चालिका पुत्रिका (स्याद्दन्तादिभिः कृता) ॥२९॥
पिटकः पेटकः पेटा मञ्जूषा
(ऽथ) विहङ्गिका ।
भारयष्टि-
(स्तदालम्बि) शिक्यं काचौ

(ऽस्य) पादुका ॥ ३० ॥

पादूरुपानत् (स्त्री)

(सैवा) ऽनुपदीना (पदायता) ।

नर्द्री वर्द्री वरत्रा (स्याद्)

(अश्वादेस्ताड़नी) कशा ॥ ३१ ॥

चाण्डालिका (तु) कण्डोलवीणा चण्डालवल्लकी ।

नाराची (स्याद्) एषणिका

शाण-(स्तु) निकषः कषः ॥ ३२ ॥

त्रश्चनः पत्रपरशुः

ईषिका तूलिका (समे) ।

तैजसावर्त्तनी मूषा

भस्त्रा चर्मप्रसेविका ॥ ३३ ॥

आस्फोटनी वैधनिका

कृपाणी कर्त्तरी (समे) ।

दृत्तादनी दृत्तभेदी

टङ्कः पाषाणदारणः ॥ ३४ ॥

क्रकचो (ऽस्त्री) करपत्रं

(स्याद्) आरा चर्मप्रभेदिका ।

स्थूर्मी स्थूणा लोहप्रतिमा

शिल्पं (कर्म कलादिकम्) ॥ ३५ ॥

प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया ।

प्रतिकृतिरर्चा (पुंसि) प्रतिनिधिः

उपमोपमानं (स्यात्) ॥ ३६ ॥

(वाच्यलिङ्गाः) समस्तुल्यः सदृक्षः सदृशः सदृक् ।

साधारणः समान-(स्व)

(स्युरुत्तरपदे त्वमी) ॥ ३७ ॥

निभ सङ्काश नीकाश प्रतीकाशोपमा (दयः)।
कर्मण्या (तु) विधा भृत्या भूतयो भर्मवेतनम् ॥ ३८ ॥
भरण्यं भरणं मूल्यं निर्वेशः पण (इत्यपि)।
सुरा हलिप्रिया हाला परिस्रुदरुणात्मजा ॥ ३९ ॥
गन्धोत्तमा प्रसन्नेरा काम्बर्य्य स्व परिस्रुता।
मदिरा कश्य मद्ये (चाप्य)
ऽवदंश-(स्तु भक्षणम्) ॥ ४० ॥
शुण्डापानं मदस्थानं
मधुवारा मधुक्रमाः।
मध्वासवो माधवको मधु माध्विक (मद्ययोः) ॥ ४१ ॥
मैरेयमासवः शौण्डः
मेदको जगलः (समौ)।
सन्धानं (स्याद्) अभिषवः
किण्वं (पुंसि तु) नग्नहूः ॥४२॥
कारोत्तरः सुरामण्ड
आपानं पानगोष्ठिका।
चषको (ऽस्त्री) पानपात्रं सरको-(प्य)-नुतर्षणम् ॥४३॥
धूर्त्तो ऽक्षदेवी कितवो ऽक्षधूर्त्तो द्यूतकृत् (समाः)।
(स्युः) लग्नकाः प्रतिभुवः
सभिका द्यूतकारकाः ॥ ४४ ॥
द्यूतो (ऽस्त्रियाम्) अक्षवती कैतवं पण (इत्यपि)।
पणौ (ऽक्षेषु) ग्लहौ
ऽक्षा (स्तु) देवनाः पाशका (श्च ते) ॥ ४५ ।
परिणाय (स्तु शारीणां समन्तात्क्रयणे)
(ऽक्षियौ)।
अष्टापदं शारिफलं

प्राणिद्यूतं समाह्वयः ॥ ४६ ॥
(उक्ताभूरिप्रयोगत्वादेकस्मिन् ये ऽत्र यौगिकाः ।
ताद्धर्म्यादन्यतो वृत्तावह्वा लिङ्गान्तरे ऽपि ते) ॥ ४७ ॥

इति शूद्रवर्गः ।

अथ विशेष्यनिघ्नवर्गः ।

विशेष्यनिघ्नैः सङ्कीर्णैर्नानार्थैरव्ययैरपि ।
लिङ्गादिसंग्रहैर्वर्गाः सामान्ये वर्गसंश्रयाः ॥ १ ॥
स्त्रीदाराद्यै र्यदिशेष्यं याद्दशैः प्रस्तुतं पदैः ।
गुणद्रव्यक्रियाशब्दास्तथा स्युस्तस्य भेदकाः ॥ २ ॥
सुकृती पुण्यवान् धन्यो
महेच्छ-(स्तु) महाशयः ।
हृदयालुः सुहृदयो
महोत्साहो महोद्यमः ॥ ३ ॥
प्रवीणे निपुणा ऽभिज्ञ विज्ञनिष्णातशिक्षिताः ।
वैज्ञानिकः कृतमुखः कृतो कुशल (इत्यपि) ॥ ४ ॥
पूज्यः प्रतीच्यः
सांशयिकः संशयापन्नमानसः ।
दक्षिणीयो दक्षिणार्ह-(स्तत्र) दाक्षिण्य (इत्यपि) ॥ ५ ॥
(स्युः) वदान्य स्थूललक्ष्य दानशौण्डा बहुप्रदे ।
जैवातृकः (स्याद्) आयुष्मान्
अन्तर्वाणि-(स्तु) शास्त्रवित् ॥ ६ ॥
परोक्षकः कारणिको
वरद (स्तु) सवर्द्धकः ।
हर्षमाणो विकुर्वाणः प्रमना हृष्टमानसः ॥ ७ ॥

दुर्मना विमना अन्यमनाः (स्याद्)
उत्क उन्मनाः ।
दक्षिणे सरलोदारौ
सुकलो (दाक्षभोक्तरि) ॥ ८ ॥
(तत्परे) प्रसितासक्तावृ
इष्टार्थोद्युक्त उत्सुकः ।
प्रतीते प्रथित ख्यात वित्त विज्ञात विश्रुताः ॥ ९ ॥
(गुणैः प्रतीते तु) कृतलक्षणा हृतलक्षणौ ।
इभ्य आढ्यो धनी
स्वामी (त्वी) श्वरः पतिरीशिता ॥ १० ॥
अधिभूर्नायको नेता प्रभुः परिवृढ़ोऽधिपः ।
अधिकर्त्ताः समृद्धः (स्याद्)
कुटुम्बव्याप्त-(स्तु यः) ॥ ११ ॥
(स्याद्) अभ्यागारिक-(स्तस्मिन्) उपाधि-(र्हि पुमानयम्) ।
(वराङ्गरूपोपेतो यः सिंहसंहननो (हि सः) ॥ १२ ॥
निर्वार्य्यः (कार्य्यकर्त्ता यः सम्यक्ः सत्वसम्पदा) ।
अवाचि मूको
(ऽथ) मनोजवः (स) पित्तसन्निभः ॥ १३ ॥
(सत्कृत्यालङ्कृतां कन्यां यो ददाति स) कूकुदः ।
लक्ष्मीवान् लक्ष्मणः श्रीलः श्रीमान्
स्निग्ध-(स्तु) वत्सलः ॥ १४ ॥
(स्याद्) दयालुः कारुणिकः कृपालुः सूरतः (समः) ।
स्वतन्त्रो ऽपाहृतः स्वैरी स्वच्छन्दो निरवग्रहः ॥ १५ ॥
परतन्त्रः पराधीनः परवान्नाथवान् (अपि) ।
अधीनो निघ्न आयत्तो ऽस्वच्छन्दो गृह्यको (ऽप्यमी) ॥१६॥
खलपूः (स्याद्) बहुकरो

दीर्घसूत्रश्चिरक्रियः ।
आत्मो ऽसमीक्ष्यकारी (स्यात्)
कुण्ठो (मन्दः क्रियासु यः) ॥ १७ ॥
कर्मठश्चमो ऽलङ्कर्मीणः
क्रियावान् कर्मसूद्यतः ।
(स) कार्मः कर्मशीलो (यः)
कर्मशूर (स्तु) कर्मठः ॥ १८ ॥
भरण्यभुक्कर्मकरः
कर्मकार-(स्तु) तत्क्रियः ।
अपस्नातो मृतस्नात
आमिषाशी (तु) शौष्कलः ॥ १९ ॥
बुभुक्षितः (स्यात्) क्षुधितो जिघत्सुरशनायितः ।
परान्नः परपिण्डादी
भक्तको घस्मरो ऽग्नरः ॥ २० ॥
आद्यूनः (स्याद्) औदरिको (विजिगीषाविवर्जिते) ।
(उभाव्) आत्मम्भरिः कुक्षिम्भरि (स्तोदरपूरके) ॥ २१ ॥
सर्वान्नीन-(स्तु) सर्वान्नभोजी
गटभु (स्तु) वर्द्धनः ।
लुब्धो ऽभिलाषुक स्तृष्णक्
(समौ) लोलुप लोलुभौ ॥ २२ ॥
उन्मद-(स्तू)-न्मदिष्णुः (स्यात्)
अविनीतः समुद्धतः ।
मत्ते शौण्डोत्कट क्षीवाः
कामुके कामिता ऽनुकः ॥ २३ ॥
कम्रः कामयिता ऽभीकः कमनः कामनो ऽभिकः ।
विधेयो विनयग्राह्यो वचने स्थित आस्रवः ॥ २४ ॥

वश्यः प्रणेयो
निभृत विनीत प्रश्रिताः (समाः) ।
धृष्टे धृष्णग्वियात-(स्व)
प्रगल्भः प्रतिभान्वितः ॥ २५ ॥
(स्याद्) अधृष्टे (तु शालीनो
विलज्जो विस्मयान्विते) ।
अधीरे कातर-
स्त्रस्तौ भीरु भीरुक भीलुकाः ॥ २६ ॥
आशंसुराशंसितरि
ग्रहयालुर्गृहीतरि ।
श्रद्धालुः (श्रद्धया युक्ते)
पतयालु-(स्तु) पातुकः ॥ २७ ॥
(लज्जाशीले) ऽपत्रपिष्णुः
वन्दारुरभिवादके ।
परार्घ्यतुको हिंस्रः
(स्याद्) वर्द्धिष्णु-(स्तु) वर्द्धनः ॥ २८ ॥
उत्पतिष्णु-(स्तु)-त्पतिता
ऽलङ्करिष्णु-(स्तु) मण्डनः ।
भूष्णुर्भविष्णुर्भविता
वर्त्तिष्णुर्वर्त्तनः (समौ) ॥ २९ ॥
निराकरिष्णुः क्षिप्नुः (स्यात्)
सान्द्रस्निग्ध-(स्तु) मेदुरः ।
ज्ञाता (तु) विदुरो विन्दुः
विकासी (तु) विकस्वरः ॥ ३० ॥
विस्रम्भी विस्मरः प्रसारी (च) विसारणिः ।
सहिष्णुः सहनः क्षन्ता तितिक्षुः क्षमिता क्षमी ॥ ३१ ॥

क्रोधनो ऽमर्षणः कोपी
चण्ड-(स्त्र) ऽत्यन्तकोपनः ।
जागरूको जागरिता
घूर्णितः प्रचलायितः ॥ ३२ ॥
स्वप्नक् शयालुर्निद्रालुः
निद्राण शयितौ (समौ)।
पराङ्मुखः पराचीनः
(स्याद्) अवाङ् (ऽप्य) ऽधोमुखः ॥ ३३ ॥
(देवानञ्चति) देवद्र्यङ्
विष्वद्र्यङ् (विष्वगञ्चति)।
(यः सहाञ्चति) सध्र्यङ् (स)
(स) तिर्य्यङ् (यस्तिरो ऽञ्चति) ॥ ३४ ॥
वदो वदावदो वक्ता
वागीशो वाक्पतिः (समौ)।
वचोयुक्तिपटुर्वाग्मी वावदूक-(र्यं) वक्तरि ॥ ३५ ॥
(स्यात्) जल्पाक (स्तु) वाचालो वाचाटो बहुगर्ह्यवाक् ।
दुर्मुखे मुखरा ऽवद्यमुखो
शक्तुः प्रियंवदे ॥ ३६ ॥
लोहलः (स्याद्) अस्फुटवाग्
गर्ह्यवादी (तु) कदृदः ।
(समौ) कुवाद कुचरौ
(स्याद्) असौम्यस्वरो ऽस्वरः ॥३७॥
रवणः शब्दनो
नान्दी वादी नान्दीकरः (समौ)।
जड़ो ऽज्ञ
एड़मूक-(स्तु) वक्तुं श्रोतुमप्यिच्छिते ॥ ३८ ॥

तुष्णींशील (स्तु) तुष्णीको
नग्नो ऽवासा दिगम्बरे ।
निःकासितो ऽवकृष्टः (स्याद्)
अपध्वस्त-(स्तु) धिक्कृतः ॥३८॥
आत्तगर्वो ऽभिभूतः (स्याद्)
दापितः साधितः (समौ) ।
प्रत्यादिष्टो निरस्तः (स्यात्) प्रत्याख्यातो निराकृतः ॥४०॥
निकृतः (स्याद्) विप्रकृतो
विप्रलब्ध-(स्तु) वञ्चितः ।
मनोहृतः प्रतिहृतः प्रतिबद्धो हृत-(श्च सः) ॥ ४१ ॥
अधिक्षिप्तः प्रतिक्षिप्तो
बद्धे कीलित संयतौ ।
आपन्न आपत्प्राप्तः (स्यात्)
कान्दिशीको भयद्रुतः ॥ ४२ ॥
आचारितः क्षारितो ऽभिशस्ते
सङ्कसुको ऽस्थिरे ।
व्यसनार्त्तोपरक्तौ (द्वौ)
विहस्त व्याकुलौ (समौ) ॥ ४३ ॥
विक्लवो विह्वलः
(स्यात्तु) विवशो ऽरिष्टदुष्टधीः ।
कश्यः कशार्हे
सन्नद्ध (त्वा)-ततायी वधोद्यते ॥ ४४ ॥
हेष्ये (त्व) ऽभिगतो
वध्यः शीर्षच्छेद्य (द्यौ समौ) ।
विष्यो (विषेण्यो वध्यो)
मुसल्यो (मुसलेन यः) ॥ ४५ ॥

शिश्निदानो ऽक्षण्वकर्मा
चपल शिक्कुरः (समौ)।
दोषैकदृक् पुरोभागी
निह्नुत-(स्तु) ऽनृजुः शठः ॥ ४६ ॥
कर्णेजपः सूचकः (स्यात्) पिशुनो
दुर्जनः खलः ।
नृशंसो घातुकः क्रूरः पापो
धूर्त्त-(स्तु) वञ्चकः ॥ ४७ ॥
अत्र मूढ़ यथाजात मूर्ख वैधेय वालिशाः ।
कदर्य्य कृपणं क्षुद्र किम्पचान मितम्पचाः ॥ ४८ ॥
निःस्व-(स्तु) दुर्विधो दीनो दरिद्रो दुर्गतो (ऽपि सः)।
वनीयको याचनको मार्गणो याचका ऽर्थिनौ ॥ ४९ ॥
अहङ्कारवानहंयुः (स्यात्)
शुभंयु-(स्तु) शुभान्वितः ।
दिव्योपपादुका (देवाः)
(नृगवाद्या) जरायुजाः ॥ ५० ॥
स्वेदजाः (कृमिदंशाद्याः)
(पक्षिसर्पादयो) ऽण्डजाः ॥ ५१ ॥
इति विशेष्यनिघ्नवर्गः ।

अथ सङ्कीर्णवर्गः ।

उद्भिद (स्तरुगुल्माद्या)
उद्भिदुद्भिज्ज मुद्भिदम् ।
सुन्दरं रुचिरं चारु सुषमं साधु शोभनम् ॥ १ ॥
कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम् ।

(तद) ऽसेचनकं (दृशेर्नास्त्यन्तो यस्य दर्शनात्) ॥ २ ॥
अभीष्टे ऽभीप्सितं हृद्यं दयितं वल्लभं प्रियम् ।
निकृष्ट प्रतिकृष्टाऽर्व रेफ याप्या ऽवमा ऽधमाः ॥ ३ ॥
कुपूय कुत्सिता ऽवद्य खेट गर्ह्या ऽणकाः (समाः) ।
मलीमसं (तु) मलिनं कच्चरं मलदूषितम् ॥ ४ ॥
पूतं पवित्रं मेध्यं (च)
तीर्थं (तु) विमला (त्मकम्) ।
निर्णिक्तं शोधितं सृष्टं निःशोध्यमनवस्करम् ॥ ५ ॥
असारं फल्गु
शून्य-(न्तु) वशिकं तुच्छ रिक्तके ।
(क्लीवे) प्रधानं प्रमुख प्रवेका ऽनुत्तमोत्तमाः ॥ ६ ॥
मुख्य वर्य्य वरेण्या-(श्च) प्रवर्हो ऽनवरार्ध्य (वत्) ।
परार्ध्या ऽग्र प्रग्रहर प्रग्र्या ऽग्र्या ऽग्रीयमग्रियम् ॥ ७ ॥
श्रेयान् श्रेष्ठः पुष्कलः (स्यात्) सत्तम (श्वा) ऽतिशोभने ।
(स्युरुत्तरपदे) व्याघ्र पुङ्गवर्षभ कुञ्जराः ॥ ८ ॥
सिंह शार्दूल नागा-(द्याः पुंसि श्रेष्ठार्थगोचराः) ।
अप्राग्र्य (त्रयहीने हे) अप्रधानोपसर्जने ॥ ९ ॥
विशङ्कटं पृथु बृहद्विशालं पृथुलं महत् ।
बड्बोरु विपुलं
पीन पीवो (तु) स्थूलपीवरे ॥ १० ॥
स्तोका ऽल्प क्षुल्लकाः सूक्ष्मं श्लक्ष्णं दभ्रं कृशं तनु ।
(स्त्रियां) मात्रा त्रुटी (पुंसि) लव लेश कणा ऽणवः ॥ ११ ॥
अत्यल्पे ऽल्पिष्ठमल्पीयः कणीयो ऽणीय) (इत्यपि) ।
प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु ॥ १२ ॥
पुरुहं पुरु भूयिष्ठं स्फिरं भूय-(स्त्र) भूरि (च) ।
परःशता (द्यास्ते येषां परा संख्या शतादिकात्) ॥ १३ ॥

गणनीये (तु) गाणेयं
संख्याते गणितम्
(अथ) समं सर्वम् ।
विश्वमशेषं कृत्स्न समस्त निखिला ऽखिलानि निःशेषम् ॥ १४ ॥
समग्रं सकलं पूर्णमखण्डं (स्याद्) अनूनके ।
घनं निरन्तरं सान्द्रं
पेलवं विरलं तनु ॥ १५ ॥
समीपे निकटासन्न सन्निकृष्ट सनीड़ (वत्) ।
सदेशो ऽभ्याश सविधः समर्यादं सवेश (वत्) ॥ १६ ॥
उपकण्ठा ऽन्तिका ऽभ्यर्णं ऽभ्यग्रा (अप्य) ऽभितो
(ऽव्ययम्) ।
संसक्ते (त्व) ऽव्यवहितमपठान्तर-(मित्यपि) ॥ १७ ॥
नेदिष्ठमन्तिकतमं
(स्याद्) दूरं विप्रकृष्टकम् ।
दवीय-(स्त्व) दविष्ठं (च) सुदूरं
दीर्घमायतम् ॥ १८ ॥
वर्तुलं निस्तलं वृत्तं
बभ्रुरं (तू)-न्नतानतम् ।
उच्च प्रांशून्नतोदग्रोच्छ्रितास्तुङ्गे
(ऽथ) वामनि ॥ १९ ॥
न्यङ् नीच खर्व ह्रस्वाः (स्युः)
अवाग्रे ऽवनतानतम् ।
अरालं हृजिनं जिह्ममूर्मिमत्कुञ्चितं नतम् ॥ २० ॥
आविद्धं कुटिलं भुग्नं वेल्लितं वक्र-(मित्यपि) ।
ऋजावजिह्म प्रगुणौ
व्यस्ते (त्व) प्रगुणाकुलौ ॥ २१ ॥

शाश्वत-(स्तु) ध्रुवो नित्य सदातन सनातनाः ।
स्थास्नुः स्थिरतरः स्थेयान्
(एकरूपतया तु यः) ॥ २२ ॥
(कालव्यापी स) कूटस्थः
स्थावरो (जङ्गमेतरः) ।
चरिष्णुर्जङ्गम चर त्रस भिङ्ग चराचरम् ॥ २३ ॥
चलनं कम्पनं कम्पं चल लोलं चलाचलम् ।
चञ्चलं तरलं (चैव) पारिप्लव परिप्लवे ॥ २४ ॥
अतिरिक्तः समधिको
दृढ़सन्धि-(स्तु) संहतः ।
कक्खटं कठिनं क्रूरं कठोरं निष्ठुरं दृढ़म् ॥ २५ ॥
जठरं
मूर्त्तिमन्मूर्त्तं
प्रगल्भं प्रौढ़मेधितम् ।
पुराणे प्रतनं प्रत्न पुरातन चिरन्तनाः ॥ २६ ॥
प्रत्यग्रो ऽभिनवो नव्यो नवीनो नूतनो नवः ।
नूत्न-(श्च)
सुकुमारं (तु) कोमलं मृदुलं मृदु ॥ २७ ॥
अन्वगन्वक्षमनुगे ऽनुपदं (क्षौमव्ययम्) ।
प्रत्यक्षं (स्याद्) ऐन्द्रियकम्
अप्रत्यक्षमतीन्द्रियम् ॥ २८ ॥
एकतानो ऽनन्यवृत्तिरेकाग्रैकायना-(वपि) ।
(अप्ये)-कसर्ग एकाग्रो (ऽप्ये)-कायनगतो (ऽपि च) ॥२९॥
पुंस्यादिः पूर्वं पौरस्त्य प्रथमाद्या
(अथास्त्रियाम्) ।
अन्तो जघन्यं चरममन्त्य पाश्चात्य पश्चिमाः ॥ ३० ॥

मोघं निरर्थकं

स्पष्टं स्फुटं प्रव्यक्तमुल्बणम् ।

साधारणं (तु) सामान्यम्

एकाकी (त्वे)-क एकक: ॥ ३१ ॥

भिक्षा-(र्थकाः) अन्यतर एकस्त्वो ऽन्येतरा-(वपि) ।

उच्चावचं नैकभेदम्

उच्चण्डमविलम्बितम् ॥ ३२ ॥

अरुन्तुद-(स्तु) मर्मंस्पृग्-

अबाधं (तु) निरर्गलम् ।

प्रमव्यं प्रतिकूलं (स्यात्) अपसव्यमपष्ठु (च) ॥ ३३ ॥

वामं (शरीरं) सव्यं (स्यात्)

अपसव्यं (तु) दक्षिणम् ।

सङ्कटं (ना तु) सम्बाधः

कलिलं गहनं (समे) ॥ ३४ ॥

सङ्कीर्णं सङ्कुलाकीर्णं

मुण्डितं परिवापितम् ।

ग्रन्थितं सन्दितं दृब्धं

विस्मृतं विस्रुतं ततम् ॥ ३५ ॥

अन्तर्गतं विस्मृतं (स्यात्)

प्राप्तप्रणिहिते (समे) ।

वेल्लितं प्रेङ्खिताधूत चलिताकम्पिताधुते ॥ ३६ ॥

नुत्तनुन्ना ऽस्तनिष्ठ्यताविद्धक्षिप्तेरिताः (समाः) ।

परिक्षिप्तं (तु) निहतं

मूषितं मुषिता-(र्थकम्) ॥ ३७ ॥

प्रहृष्टे प्रहृतते

न्यस्तं निसृष्टे

शुषिताङ्गते ।

निदिग्धोपचिते

गूढगुप्ते

गुण्ठित कुण्ठिते ॥ ३८ ॥

हृता ऽवदीर्णे

उद्गूर्णोद्यते

काचित शिक्षिते ।

घ्राण घ्राते

दिग्ध लिप्ते

समुदक्रोद्धृते (समे) ॥ ३९ ॥

वेष्टितं (स्यात्) बलयितं संवीतं रुद्धमाहतम् ।

रुग्न भुग्ने-

(ऽथ) निशितक्षुत शातानि तेजिते ॥ ४० ॥

(स्यात्) विनाशोन्मुखं पक्वं

क्षीण क्षीतौ (तु) लज्जिते ।

हते (तु) हत्तवाहत्तौ

संयोजित उपाचितः ॥ ४१ ॥

प्राप्यं गम्यं समासाद्यं

स्यन्नं रीणं द्रुतं स्रुतम् ।

सङ्गूढः (स्यात्) सङ्गलितो-

ऽवगीतः ख्यातगर्हणः ॥ ४२ ॥

विविधः (स्यात्) बहुविधो नानारूपः पृथग्विधः ।

अवरीणो धिक्कृत-(शप्त)

ऽवध्वस्तो ऽवचूर्णितः ॥ ४३ ॥

अनायासकृतं क्लाघ्यं

स्वनितं ध्वनितं (समे) ।

वेडे संग्रहानितं मूतमुदितं सन्दितं सितम् ॥ ४४ ॥
निष्पक्के कथितं
(पाके क्षीराज्यपयसां) सृतम् ।
निर्वाणी (मुनिवञ्चकादौ)
निर्वात-(स्तु गते ऽनिले) ॥ ४५ ॥
पक्वं परिणते
गूनं हते
मोढ़-(न्तु) मूत्रिते ।
पुष्टे (तु) पुषितं
सोढ़े क्षान्तम्
उद्दान्तमुद्गते ॥ ४६ ॥
दान्त-(स्तु) दमिते
शान्तः शमिते
प्रार्थिते ऽर्हितः ।
अस्त-(स्तु) क्षपिते
कृतस्कन्दादिते
पूजितेऽर्चितः ॥ ४७ ॥
पूर्ण-(स्तु) पूरिते
क्लिष्टः क्लिशिते
ऽवसिते सितः ।
प्रुष्ट प्रुष्टोषिता दग्धे
तप्त त्वष्टौ तनूकृते ॥ ४८ ॥
वेधितश्चिन्तितौ वित्तं
विद्म वित्तौ विचारिते ।
निःप्रभे विगता ऽलोकौ
विलोने विद्रुत द्रुतौ ॥ ४९ ॥

सिद्धे निर्वृत्त निष्पन्नौ
दारिते भिन्न भेदितौ ।
ऊतं स्यूतमुतं (चेति त्रितयं तन्तुसन्ततेः) ॥ ५० ॥
(स्यात्) अर्हिते नमस्यितं नमस्तितमपचायिता ऽर्चिता ऽपचितम् ।
वरिवसिते वरिवस्यितमुपासित-(श्चो)-पचरितं (च) ॥५१॥
सन्तापित सन्तप्तौ धूपित धूपायितौ (च) दून-(व) ।
हृष्टे मत्तस्तृप्तः प्रह्लन्नः प्रमुदितः प्रीतः ॥ ५२ ॥
छिन्नं छातं लूनं कृत्तं दातं दितं छितं हृक्णम् ।
स्रस्तं ध्वस्तं भ्रष्टं स्कन्नं पन्नं च्युतं गलितम् ॥ ५३ ॥
लब्धं प्राप्तं विन्नं भावितमासादितं (च) भूतं (च) ।
अन्वेषितं गवेषितमन्विष्टं मार्गितं मृगितम् ॥ ५४ ॥
आर्द्रं साद्रं क्लिन्नं तिमितं स्तिमितं समुन्नमुत्तं (च) ।
त्रातं त्राणं रक्षितमवितं गोपायितं (च) गुप्त-(त्र) ॥५५॥
अवगणितमवमता ऽवज्ञातं ऽवमानितं (च) परिभूते ।
त्यक्तं हीनं विधुतं समुज्झितं धूतमुत्सृष्टम् ॥ ५६ ॥
उक्तं भाषितमुदितं जल्पितमाख्यातमभिहितं लपितम् ।
बुद्धं बुधितं मनितं विदितं प्रतिपन्नमवसिता ऽवगते ॥५७॥
अरीक्षतमुररीक्षतमङ्गीक्षतमाश्रुतं प्रतिज्ञातम् ।
सङ्कीर्णं संविदितं संश्रुतं समाहितोपश्रुतोपगतम् ॥ ५८ ॥
ईलित शस्त पणायित पनायित प्रणुत पणित पनितानि ।
अपिगीर्णं वर्णिता ऽभिष्टुतेडितानि स्तुता-(र्थानि) ॥५९॥
भक्षित चर्वित लिप्त प्रत्यवसित गिलित खादित ग्लातम् ।
अभ्यवहृता ऽन्न जग्ध ग्रस्त ग्लस्ता ऽशितं भुक्तम् ॥ ६० ॥
क्षेपिष्ठ क्षोदिष्ठ प्रेष्ठ वरिष्ठ स्थविष्ठ वंहिष्ठाः ।
(क्षिप्र क्षुद्रा भीष्मित पृथु पीन बहुल प्रवर्षार्थाः) ॥६१॥

साधिष्ठ द्राघिष्ठ स्नेष्ठ गरिष्ठ क्रसिष्ठ ह्रन्दिष्ठाः ।
(वाढ़ व्यायत बहु गुरु वामन ह्रन्दारकातिशये) ॥ ६२ ॥

इति विशेष्यनिघ्नवर्गः ।

अथ सङ्कीर्णवर्गः ।

(प्रकृतिप्रत्ययाद्यर्थैः सङ्कीर्णं लिङ्गमुच्यते) ।

कर्म्म क्रिया

(तत्सातत्ये गम्ये स्युः) अपरम्पराः ॥ १ ॥

(साकल्यासङ्गवचने) पारायण

परायणे ।

यदृच्छा स्वरिता

(हेतु शून्या त्वास्था) विलक्षणम् ॥ २ ॥

शमथ-(स्तु) शमः शान्तिः

दान्ति-(स्तु) दमथो दमः ।

अवदानं (कर्म्मवृत्तं)

काम्यदानं प्रवारणम् ॥ ३ ॥

वपाक्रिया संवदनं

मूलकर्म्म (तु) कार्म्मणम् ।

विधूनमं विधुवनं

तर्पणं प्रीणना ऽवनम् ॥ ४ ॥

पर्य्यासिः (स्यात्) परिवाणं हस्तवारण-(मित्यपि) ।

सेवनं सीवनं स्यूतिः

विदरः स्फुटनं भिदा ॥ ५ ॥

आक्रोशनमभीषङ्गः

संवेदो वेदना (न ना) ।

सम्मूर्च्छनमभिव्याप्तिः

याञ्चा भिक्षा ऽर्थना ऽर्हणा ॥ ६ ॥

वर्हणं छेदने

(ऽथ हे) आनन्दन सभाजने ।

आप्रच्छनम्

(अथा) म्नायः सम्प्रदायः

क्षये क्षिया ॥ ७ ॥

ग्रहे ग्राहो

वशः कान्तौ

रज्ञास्त्राणि

रणः क्षणे ।

व्यधो वेधे

पचा पाके

हुतो हुतौ

वरो हुतौ ॥ ८ ॥

ओषः म्लोषे

नयो नाये

ज्यानिर्जीर्णौ

भ्रमो भ्रमौ ।

स्फातिर्वृद्धौ

प्रथा ख्यातौ

सृष्टिः सृष्टौ

स्रवः स्रवे ॥ ९ ॥

एधा समृद्धौ

स्फुरणं स्फुरणे

प्रमितौ प्रमा ।

प्रसूतिः प्रसवे

स्रवोत्ते प्राग्भारः

क्रमथः क्रमे ॥ १० ॥

उत्कर्षोऽतिशये

सन्धिः श्लेषे

विषय आशये ।

क्षिपायां क्षेपणं

गीर्णि गिरौ

गुरणमुद्यमे ॥ ११ ॥

उन्नाय उन्नये

आयः अयणे

जयने जयः ।

निगादो निगदे

मादो मदः

उद्वेग उद्यमे ॥ १२ ॥

विमर्दनं परिमले

ऽभ्युपपत्तिरनुग्रहः ।

निग्रह-(स्तद्विरुद्धः स्यात्)

अभियोग-(स्त्व)-भिग्रहः ॥ १३ ॥

मुष्टिबन्ध-(स्तु) संग्राहो

डिम्बे डमर विप्लवौ ।

बन्धनं प्रसितिस्वारः

अर्थः अष्टोपतप्तरि ॥ १४ ॥

निकारो विप्रकारः (स्याद्)

आकारस्त्विङ्ग इङ्गितः ।

परिणामो विकारो (डे समे) विकृति विक्रिये ॥ १५ ॥

अपहार-(स्तु) पचयः
समाहारः समुच्चयः ।
प्रत्याहारे उपादानं
विहार-(स्तु) परिक्रमः ॥ १६ ॥
अभिहारो ऽभिग्रहणं
निर्हारो ऽभ्यवकर्षणम् ।
अनुहारो ऽनुकारः (स्यात्)
(अर्थस्यापगमे) व्ययः ॥ १७ ॥
प्रवाह-(स्तु) प्रवृत्तिः (स्यात्)
प्रवहो (गमनं वहिः) ।
वियामो वियमो यामो यमः संयाम संयमौ ॥ १८ ॥
हिंसाकर्मा ऽभिचारः (स्यात्)
जागर्य्या जागरा (ह्योः) ।
विघ्नो ऽन्तरायः प्रत्यूहः
(स्यात्) उपघ्नो ऽन्तिकाश्रये ॥ १९ ॥
निर्वेश उपभोगः (स्यात्)
परिसर्पः परिक्रिया ।
विधुर-(न्तु) प्रविश्लेषो-
ऽभिप्रायश्छन्द आशयः ॥ २० ॥
संक्षेपणं समसनं
पर्य्यवस्था विरोधनम् ।
परिसर्य्या परीसारः
(स्यात्) यात्रा (त्रा) सना स्थितिः ॥२१॥
विस्तारो विग्रहो व्यासः
(स च शब्दस्य) विस्तरः ।
(स्यात) मर्दनं संवाहनं

विनाशः (स्याद्) अदर्शनम् ॥२२॥

संस्तवः (स्यात्) परिचयः

प्रसर-(स्तु) विसर्पणम् ।

नीवाक-(स्तु) प्रयामः (स्यात्)

सन्निधिः सन्निकर्षणम् ॥ २३ ॥

लवो ऽभिलाषो लवने

निष्पावः पवने पवः ।

प्रस्ताव (स्यात्) अवसरः

व्यसरः सूत्रवेष्टनम् ॥ २४ ॥

प्रजनः (स्यात्) उपसरः

प्रश्रय प्रणयौ (समौ) ।

धौरुन्निर्निष्क्रमो

(ऽस्त्री तु) संक्रामो दुर्गसञ्चरः ॥ २५ ॥

प्रत्युत्क्रमः प्रयोगार्थः

प्रक्रमः (स्यात्) उपक्रमः ।

(स्यात्) अभ्यादानमुद्घात आरम्भः

सम्भ्रमस्त्वरा ॥ २६ ॥

प्रतिबन्धः प्रतिष्टम्भो

ऽवनाय-(स्तु) निपातनम् ।

उपलम्भ-(स्त्व) ऽनुभवः

समालम्भो विलेपनम् ॥ २७ ॥

विप्रलम्भो विप्रयोगो

विलम्भ (स्त्व)-तिसर्ज्जनम् ।

विस्राव-(स्तु) प्रविख्यातिः

अवेक्षा प्रतिजागरः ॥ २८ ॥

निपाठ निपठो पाठे

तेमस्तेमौ समुद्गने ।

आदीनवासंवौ क्लेशे

मेलके सङ्ग सङ्गमौ ॥ २८ ॥

संवीक्षणं विचयनं मार्गणं मृगणा मृगः ।

परिरम्भः परिष्वङ्गः संश्लेष उपगूहनम् ॥ २० ॥

निर्वर्णनं (तु) निध्यानं दर्शनालोकनेक्षणम् ।

प्रत्याख्यानं निरसनं प्रत्यादेशो निराकृतिः ॥ २१ ॥

उपधायो विधाय-(च पर्य्यायशयनार्थकौ) ।

अर्त्तनं (च) ऋतौया (च) ऋणौया (च) तृषा-(यंके) ॥२२॥

(स्यात्) व्यत्यासो विपर्य्यासो व्यत्यय-(च) विपर्य्यये ।

पर्य्ययो ऽतिक्रम-(स्तस्मिन्) प्रतिपात उपात्ययः ॥ २३

(प्रेषणं यत् समाहृय तच स्यात्) प्रतिग्रासनम् ।

(स) संस्तावः (क्रतुषु या स्तुतिर्भूमिर्द्विजन्मनाम्) ॥ २४ ॥

(निधाय तक्ष्यते यत्र काष्ठे काष्ठं स) उद्दनः ।

स्तम्बघ्न-(स्तु) स्तम्बघनः (स्तम्बो येन निहन्यते) ॥ २५ ॥

आविधो (विध्यते येन तच)

(विष्वक् समि) निघः ।

उत्कार-(च) निकार-(च द्वौ धान्योत्क्षेपणार्थकौ) ॥२६॥

निगारोद्गार विक्षावोद्ग्राहा-(स्तु गरणादिषु) ।

आरत्यवरति विरतय उपरामे

(वा स्त्रियां तु) निष्ठेवः ॥ २७ ॥

निष्ठूति र्निष्ठेवनं निष्ठीवन-(मित्यभिधानि) ।

अवनि जूतिः

साति (स्त्र) ऽवसाने (स्यात्)

(मथ) ज्वरे जूर्त्तिः ॥ २८ ॥

उदज-(स्तु) पयःप्रेरणम्

अकरणि-(रित्यादयः शापे) ।
(गीर्वान्तेभ्यस्तस्य हन्दमित्यौ)-पगवका-(दिकम्) ॥३८॥
आपूपिकं शाष्कुलिक-(मेवमाद्यमचेतसाम्) ।
(माणवानान्तु) माणव्यं
(सहायानां) सहायता ॥ ४० ॥
हल्या (हलानां)
ब्राह्मण्य वाड़व्ये (तु द्विजन्मनाम्) ।
(डे पर्शुकानां पृष्ठानां) पार्श्वं पृष्ठ्य-(मनुक्रमात्) ॥ ४१ ॥
(खलानां) खलिनी खल्या (ऽप्य-)
(ऽथ) मानुष्यकं (नृणाम्) ।
ग्रामता जनता धूम्या पाश्या गल्या (पृथक् पृथक्) ॥४२॥
(अपि) साहस्र कारीष चार्मणाश्वर्षा-(दिकम्) ॥ ४३ ॥
इति सङ्कीर्णवर्गः ।

अथ नानार्थाः ।

(नानार्थाः केऽपि कान्तादिवर्गेष्वेवात्र कीर्त्तिताः ।
भूरि प्रयोगा ये येषु पर्य्यायेष्वपि तेषु ते) ॥ १ ॥

अथ कान्तवर्गः ।

(आकाशे) (त्रिदिवे) नाको
लोक-(स्तु भुवने जने) ।
पद्मे यशसि च) श्लोकः
(शरे खड्गे च) सायकः ॥ २ ॥
जम्बुकी (क्रोष्टु कस्त्रियौ)
पृथुकी (चिपिटार्भकौ) ।
आलोकी (दर्शनोद्योतौ)

(भेरी पटहम्) आनकौ ॥ ३ ॥

(उत्सङ्ग विष्टयोः) अङ्कः

कलङ्को (ऽपवादयोः)।

तक्षका (नागवर्धक्योः)

वर्कः (स्फटिकसूर्य्ययोः) ॥ ४ ॥

(मारुते वेधसि ब्रह्मे पुंसि) कः

कं (शिरोऽम्बुनोः)।

(स्यात्) पुलाक-(स्तुच्छधान्ये संक्षेपे भक्तसिक्थके) ॥ ५ ॥

(उलूके करिणः पुच्छमूलोपान्ते च) पेचकः।

(कमण्डलौ च) करकः

(सुगते च) विनायकः ॥ ६ ॥

किण्कु-(हंसे वितस्तौ च)

(शूककीटे च) हस्तिकः।

(प्रतिकूले) प्रतीक-(श्लिष्वेकदेशे च पुंस्ययम्) ॥ ७ ॥

(स्यात्) भूतिक-(न्तु भूनिम्बे कत्तृणे भूस्तृणे ऽपि च)।

(ज्योत्स्निकायां च घोषे च) कोषातक्य-

(ऽथ कट्फले) ॥ ८ ॥

(सिते च खदिरे) सोमवल्कः (स्यात्)

(ऽथ सिद्धके।

तिलकल्के च) पिण्याकौ

वाह्लीकं (रामठे ऽपि च) ॥ ९ ॥

(महेन्द्रगुग्गुलूलूकव्यालग्राहिषु) कौशिकः।

(रक्तापराङ्गास्वा)-तङ्कः

(स्वल्पे ऽपि) क्षुल्लक (श्लिषु) ॥ १० ॥

जैवातृकः (यशाङ्के ऽपि)

(खुरे ऽप्यक्षस्य) वर्त्तकः।

(व्याघ्रेऽपि) पुण्डरीको (ना)

(यवान्यामपि) दीपकः ॥११॥

शालावृकाः (कपि क्रोष्टृ श्वानः)

(स्वर्णेऽपि) गैरिकम् ।

(पीड़ार्थेऽपि) व्यलीकं (स्यात्)

अलीकं (त्वप्रिये ऽनृते) ॥ १२ ॥

(शीलान्वयाव-) ऽनूके (हे)

शल्के (शकलवल्कले) ।

(साष्टे शते सुवर्णानां हेम्नुरोभूषणे पले ॥ १३ ॥

दीनारेऽपि च) निष्को-(ऽस्त्री)

कल्को-(ऽस्त्री) समलैनसोः ।

टङ्के-(ऽप्य-)

(ऽथ) पिनाको-(ऽस्त्री शूलशङ्करधन्वनोः) ॥१४॥

धेनुका (तु करेणवां च)

(मेघजाले च) कालिका ।

कारिका (यातनाहत्त्योः)

कर्णिका (कर्णभूषणे ॥ १५ ॥

करिहस्ताङ्गुली पद्मबीजकोश्यां)

(त्रिषूत्तरे) ।

हुन्दारको (रूपिमुख्याव्-)

एके (मुख्यान्यकेवलाः) ॥ १६ ॥

(स्याद्दाम्भिकः) कौकुटिको (यश्चादूरेरितेक्षणः) ।

लालाटिकः (प्रभोर्भालदर्शी कार्य्याज्ञमश्च यः) ॥ १७ ॥

(भ्रूभ्रन्वितम्बवलये चक्रेषु) कटको-(ऽस्त्रियाम्) ।

(सूच्यये क्षुद्रघण्टी च लोमहर्षे च कण्टकः ॥ १८ ॥

इति कान्तवर्गः

अथ खान्तवर्गः ।

मयूख-(स्त्रिघट्कर ज्वालास्त्र)

(ऽलिवाणौ) शिखीमुखौ ।

शङ्खो-(निधौ ललाटास्थि कम्बौ न स्त्री-)

(न्द्रिये ऽपि) खम् ॥ १९ ॥

(घृणिज्वाले ऽपि) शिखे

इति खान्तवर्गः ।

अथ गान्तवर्गः ।

(शैलवृक्षौ नगावगौ) ।

आशुगौ (वायुविशिखौ)

(शरार्कविहगाः) खगाः ॥ २० ॥

पतङ्गौ (पक्षिसूर्यौ च)

पूगः (क्रमुकवृन्दयोः) ।

(पशवो ऽपि) मृगा

वेगः (प्रवाहजवयोरपि) ॥ २१ ॥

परागः (कौसुमे रेणौ स्नानीयादौ रजस्यपि) ।

(गजे ऽपि) नागमातङ्गाव्-

अपाङ्ग-(स्तिलके ऽपि च) ॥ २२ ॥

स्वर्गः (स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु) ।

योगः (सन्नहनोपायध्यानसङ्गतियुक्तिषु) ॥ २३ ॥

भोगः (सुखे स्रग्रादिभृतावहेश्च फणकाययोः) ।

(चातके हरिणे पुंसि) सारङ्गः (शबले त्रिषु) ॥ २४ ॥

(कपौ च) प्लवगः

(शापे त्व-) ऽभिषङ्गः (पराभवे) ।

(यानाद्यङ्गे) युगः (पुंसि)

युगं (युग्मे ऽतादिषु) ॥ २५ ॥

(स्वर्गेषु पशुवाग्वज्रदिग्नेत्रघृणिभूजले ।

लक्षद्व्यां स्त्रियां पुंसि) गौः

लिङ्गं (चिह्नशेफसोः) ॥ २६ ॥

मृङ्गं (प्राधान्यसान्वोश्च)

वराङ्गं (मूर्द्धगुह्ययोः) ।

भगं (श्रीकाममाहात्म्यवीर्य्ययत्नार्ककीर्त्तिषु) ॥ २७ ॥

इति गान्तवर्गः ।

अथ घान्तवर्गः ।

परिघः (परिघाते ऽस्त्रे ऽप्य-)

ओघो (ह्रस्वे ऽम्भसां रये) ।

(मूल्ये पूजाविधाव्) ऽर्घो-

(ऽंहो दुःखव्यसनेष्व-) ऽघम् ॥ २८ ॥

(त्रिष्विष्टे ऽपि) लघुः

इति घान्तवर्गः ।

अथ चान्तवर्गः ।

काचाः (शिक्यस्रङ्नेदट्टगुजः) ।

(विपर्य्यासे विस्तरे च) प्रपञ्चः

(पावके) शुचिः ॥ २९ ॥

(माद्यमात्ये चाप्युपधे पुंसि मेध्ये सिते त्रिषु) ।

(अभिष्वङ्गे सुहायाश्च गभस्तौ च) रुचिः (स्त्रियाम्) ॥३०॥

इति चान्तवर्गः ।

अथ छान्तवर्गः ।

(प्रसवे भल्लुकेऽप्य-) ऽच्छो
गुच्छः (स्तवकहारयोः) ।
(परिधानाञ्चले) कच्छो (जलप्रान्ते विलिङ्गकः) ॥ २१ ॥

इति छान्तवर्गः ।

अथ जान्तवर्गः ।

(केकितार्क्षाव) ऽहिभुजौ
(दन्तविप्राण्डजा-) द्विजाः ।
अजा (विष्णुहरच्छागा-)
(गोष्ठाध्वनिवहा-) व्रजाः ॥ २२ ॥
धर्म्मराजो (जिनयमौ)
कुञ्जो (दन्ते ऽपि न स्त्रियाम्) ।
बलजे (क्षेत्रपूर्द्वारे)
बलजा (वल्गुदशंना) ॥ २३ ॥
(समे क्ष्मांशे रणे ऽप्या-) जिः
प्रजा (स्यात् सन्ततौ जने) ।
अजौ (यङ्कुशशाङ्कौ च)
(स्वके नित्ये) निजं (त्रिषु) ॥ २४ ॥

इति जान्तवर्गः ।

अथ ञान्तवर्गः ।

(पुंस्यात्मनि प्रवीणे च) क्षेत्रज्ञो (वाच्यलिङ्गकः) ।
संज्ञा (स्याच्चेतनानामहस्तादौ स्वार्थसूचना) ॥ २५ ॥

दोषज्ञौ (वैद्यविद्वांसौ)

ज्ञो-(विद्वान् सोमजो ऽपि च)।

इति आन्तवर्गः ।

अथ टान्तवर्गः ।

(काकेभगण्डौ) करटौ

(गजगण्डकटौ) कटौ ॥ ३६ ॥

शिपिविष्ट-(स्तु खलतौ दुश्चर्मणि महेश्वरे)।

(देवशिल्पिन्यपि) त्वष्टा

दिष्टं (देवे ऽपि न द्वयोः) ॥ ३७ ॥

(रसे) कटुः

कटु-(कार्य्ये त्रिषु मत्सरतीक्ष्णयोः) ।

रिष्टं (क्षेमाशुभाभावेष्व-)

ऽरिष्टे (तु शुभाशुभे) ॥ ३८ ॥

मायानिश्चलयन्त्रेषु कैतवानृतराशिषु ।

(अयोघने शैलशृङ्गे सौराङ्गे) कूट-(मस्त्रियाम्) ॥ ३९ ॥

(सूक्ष्मेलायां) त्रुटिः (स्त्री स्यात् काले ऽल्पे संशये ऽपि सः) ।

(अत्युत्कर्षाश्रयः) कन्यो-

(मूले लम्बकचे) जटा ॥ ४० ॥

व्युष्टिः (फले समृद्धौ च)

दृष्टि-(ज्ञाने ऽक्षिणि दर्शने)।

दृष्टि (र्यागेच्छयोः)

दृष्टि-(निश्चिते बहुले त्रिषु) ॥ ४१ ॥

कष्टे (तु कृच्छ्रगहने)

(दक्षामन्दागदेषु तु)।

पटु (द्वौ वाच्यलिङ्गौ च)

इति टान्तवर्गः ।

अथ ठान्तवर्गः ।

नीलकण्ठः (शिवे ऽपि च) ॥ ४२ ॥

(पुंसि) कोष्ठो-(ऽन्तर्जठरं कुसूलो ऽन्तर्गृहन्तथा) ।

निष्ठा (निष्पत्तिनाशान्ताः)

काष्ठो-(त्कर्षे स्थितौ दिशि) ॥ ४३ ॥

(त्रिषु) ज्येष्ठो-(ऽतिशस्ते ऽपि)

कनिष्ठो (ऽतियुवाल्पयोः) ॥ ४४ ॥

इति ठान्तवर्गः ।

अथ डान्तवर्गः ।

दण्डो-(ऽस्त्री लगुडे ऽपि स्यात्)

गुडो (गोलेक्षुपाकयोः) ।

(सर्पमांसात्मशू) व्याडौ

(गोभूवाचस्त्रि-) डा इलाः ॥ ४५ ॥

च्खेडा (वंशशलाकापि)

नाड़ी (काले ऽपि षट्क्षणे) ।

काण्डो-(ऽस्त्री दण्डवाणार्ववर्गावसरवारिषु) ।

(स्यात्) भाण्ड-(मस्त्राभरणे ऽमत्रे मूलधनिग्धने ॥ ४६ ॥

इति डान्तवर्गः ।

अथ ढान्तवर्गः ।

(भृशप्रतिज्ञयोर्) वाढं

प्रगाढ़ं (भृशदृढ्ययोः) ।

(यज्ञस्थूलौ त्रिषु) दृढ़ौ

व्यूढौ (ऽविन्यस्तसंहतौ) ॥ ४७ ॥

इति ढान्तवर्गः ।

अथ णान्तवर्गः ।

भ्रूणो (ऽर्भके स्त्रैणगर्भे)

बाणो (बलिसुते शरे) ।

कणो-(ऽतिसूक्ष्मे धान्यांशे)

(संघाते प्रमथे) गणः ॥ ४८ ॥

पणो (द्यूतादिषूत्सृष्टे भृतौ मूल्ये धने ऽपि च) ।

(मौर्व्यां द्रव्याश्रिते सत्वशुक्लसन्ध्यादिके) गुणः ॥ ४९ ॥

(निर्व्यापारस्थितौ कालविशेषोत्सवयोः) क्षणः ।

वर्णो (द्विजादौ शुक्लादौ स्तुतौ)

वर्णं (तु वाक्षरे) ॥ ५० ॥

अरुणो (भास्करे ऽपि स्याद्वर्णभेदेऽपि च त्रिषु) ।

स्थाणुः (शर्वे ऽप्य-)

(ऽथ) द्रोणः (काके ऽपि च)

(रवे) रणः ॥५१॥

ग्रामणी-(नापिते पुंसि श्रेष्ठे ग्रामाधिपे त्रिषु) ।

ऊर्णा (मेषादिलोम्नि स्यादावर्त्ते चान्तराभ्रुवौ) ॥ ५२ ॥

हरिणी (स्यान्मृगी हैमप्रतिमा हरिता च या) ।

(त्रिषु पाण्डौ च) हरिणः

स्थूणा (स्तम्भे ऽपि वेश्मनः) ॥ ५३ ॥

तृष्णे (स्पृहापिपासे द्वे)

(जुगुप्साकरणे) घृणे ।

(वणिक्पथे ऽपि) विपणिः

(सुराप्रत्यक् च) वारुणी ॥ ५४ ॥

करेणु (रिभ्यां स्त्रीनेभे)

द्रविणं (तु बलं धनम्)।

शरणं (गृहरक्षित्रोः)

श्रीपर्णं (कमले ऽपि च) ॥ ५५ ॥

(विषाभिमरलौहेषु) तीक्ष्णं (क्लीवे खरे त्रिषु)।

प्रमाणं (हेतुमर्य्यादाप्रास्तेयत्ताप्रमाढषु) ॥ ५६ ॥

करणं (साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि)।

(प्राण्युत्पादे) संसरण-(मसम्बाधचमूगतौ) ॥ ५७ ॥

घण्टापथे)

(ऽथ वान्तान्ने) समुद्गरण (मुन्नये)।

(अतस्त्रिषु)

विषाणं (स्यात् पशुशृङ्गेभदन्तयोः) ॥ ५८ ॥

प्रवणः (क्रमनिम्नोर्व्यां प्रह्वे ना तु चतुष्पथे)।

सङ्कीर्णौ (निचिताशुद्धाव्)

ईरणं (शून्यमूषरम्) ॥ ५९ ॥

इति णान्तवर्गः।

अथ तान्तवर्गः।

(देवसूय्यौ) विवस्वन्तौ

सरस्वन्तौ (नदार्णवौ)।

(पक्षिताच्यौ) गरुत्मन्तौ

शकुन्तौ (भासपक्षिणौ) ॥ ६० ॥

(अग्न्युत्पातौ) धूमकेतू

जीमूतौ (मेघपर्वतौ) ।

हस्तौ (तु पाणिनक्षत्रे)

मरुतौ (पवनामरौ) ॥ ६१ ॥

यन्ता (चस्तिपके सूते)

भर्त्ता (धातरि पोष्टरि) ।

(यानपात्रे शिश्नौ) पोतः

प्रेतः (प्राग्यन्तरे मृते) ॥ ६२ ॥

(ग्रहभेदे ध्वजे) केतुः

(पार्थिवे तनये) सुतः ।

स्थपतिः (कारुभेदे ऽपि)

भूभृद् (भूमिधरे नृपे) ॥ ६३ ॥

मूर्द्धाभिषिक्तो (भूपे ऽपि)

ऋतुः (स्त्रीकुसुमे ऽपि च) ।

(विक्षावप्य)-ऽजिता ऽव्यक्तौ

सूत-(स्वष्टरि सारथौ) ॥ ६४ ॥

व्यक्तः (प्राज्ञे ऽपि)

दृष्टान्तौ (उभे शास्त्रनिदर्शने) ।

क्षत्ता (स्यात्सारथौ हाःस्थे क्षत्रियायां च शूद्रजे) ॥ ६५ ॥

वृत्तान्तः (स्यात् प्रकरणे प्रकारे कार्त्स्न्यवार्त्तयोः) ।

आनर्त्तः (समरे नृत्यस्थाननीहद्विशेषयोः) ॥ ६६ ॥

कृतान्तो (यमसिद्धान्तदैवाकुशलकर्मसु) ।

(श्लेष्मादि रसरक्तादि महाभूतानि तद्गुणाः ॥ ६७ ॥

इन्द्रियाण्यश्मविकृति शब्दयोनिश्च) धातवः ।

(कक्षान्तरे ऽपि) शुद्धान्तो (नृपस्यासर्वगोचरे) ॥ ६८ ॥

(कायसामर्थ्ययोः) शक्तिः

मूर्त्तिः (काठिन्यकाययोः) ।

(विस्तारवल्लयोः) व्रततिः

(वसतौ) रात्रिवेश्मनोः ॥ ६८ ॥

(क्षयार्चयोः) अपचितिः

सातिः (दानावसानयोः) ।

अर्त्तिः (पीड़ा धनुष्कोट्योः)

जातिः (सामान्यजन्मनोः) ॥७०॥

(प्रचारस्यन्दयो) रीतिः

ईतिः (डिम्बप्रवासयोः) ।

(उदये ऽधिगमे) प्राप्तिः

त्रेता (त्व ऽग्नित्रये युगे) ॥७१॥

(वीणाभेदे ऽपि) महती

भूतिः (भस्मनि सम्पदि) ।

(नदीनगर्य्योर्नागानां) भोगवत्य-

(ऽथ सङ्करे) ॥ ७२ ॥

(सङ्के सभायां) समितिः

(क्षयवासावपि) क्षतिः ।

(रवेरर्चिश्च शस्त्रं च वह्निज्वालाच) हेतयः ॥ ७३ ॥

जगती (जगतिच्छन्दोविशेषे ऽपि क्षितावपि) ।

पङ्क्तिः (च्छन्दो ऽपि दशमं)

(स्यात् प्रभावे ऽपि चा) यतिः ॥ ७४ ॥

पत्तिः (गतौ च)

(मूले तु) पत्तिः (पत्तभेदयोः) ।

प्रकृतिः (योनिलिङ्गे च)

(कौशिक्यादयश्च) हस्तयः ॥ ७५ ॥

सिकताः (स्युर्वालुकापि)

(वेदे श्रवसि च) श्रुतिः ।

धनिता (जनितात्यर्थानुरागायां च योषिति) ॥ ७६ ॥
गुप्तिः (क्षितिव्युदासे ऽपि)
धृति-(धारण धैर्ययोः) ।
हृद्धतौ (क्षुद्रवार्त्ताकीच्छन्दोभेदे महत्यपि) ॥ ७७ ॥
वासिता (स्त्रीकरिण्योश्च)
वार्त्ता (हत्तौ जनश्रुतौ) ।
वार्त्तं (फल्गुन्यरोगे च त्रिष्व-)
(ऽप्सु च) घृता ऽमृते ॥ ७८ ॥
कलधौतं (रूप्यहेम्नोः)
निमित्तं (हेतुलक्ष्मणोः) ।
श्रुतं (शास्त्रावधृतयोः)
(युगपर्य्यायसयोः) क्षतम् ॥ ७९ ॥
अत्याहितं (महाभीतिः कर्मजीवानपेक्षि च) ।
(युक्ते क्ष्मादाहृते) भूतं (प्राण्यतीते समे त्रिषु) ॥ ८० ॥
हृत्तं (पद्ये चरित्रे त्रिष्वतीते दृढ़निश्चले) ।
महद् (राज्यं चा-)
ऽवगीतं (जन्ये स्याद्गर्हिते त्रिषु) ॥८१॥
श्वेतं (रूप्ये ऽपि)
रजतं (हारे रूप्ये सिते त्रिषु) ।
त्रिष्वितो-
जगद् (मूढ़ेऽपि)
रक्तं (नील्यादिरागि च) ॥ ८२ ॥
अवदातः (सिते पीते शुद्धे)
(बद्धार्जुनौ) सितौ ।
युक्तेऽतिसंस्कृते मर्षिण्य (ऽभिनीतो-
(ऽथ संस्कृतम्) ॥ ८३ ॥

(क्वचिमे लक्षणोपेते ऽप्य-)

ऽनन्तो-(ऽनवधावपि)।

(ख्याते हृष्टे) प्रतीतो

ऽभिजात (स्तु कुलजे बुधे) ॥ ८४ ॥

विविक्तौ ('पूतविजनौ)

मूर्च्छितौ (मूढ़सोच्छ्रयौ)।

(द्वौ चाम्लपरुषौ शुक्लौ

शितौ (धवलमेचकौ) ॥ ८५ ॥

(सत्ये साधौ विद्यमाने प्रशस्ते ऽभ्यर्हिते च) सन्।

पुरस्कृतः (पूजिते ऽत्यभियुक्ते ऽग्रतः कृते) ॥ ८६ ॥

निवातावृ (आश्रयावातौ शस्त्राभेद्यं च वर्म यत्)।

(जातोन्नद्धप्रहृद्धाः स्युः) उच्छ्रिता

उत्थिता-(स्त्वमी) ॥ ८७ ॥

(हृद्विमत्प्राद्यतोत्पन्ना)

आहृतौ (सादरार्चितौ)।

इति तान्तवर्गः।

अथ थान्तवर्गः।

अर्थो (ऽभिधेयो रैवस्तुप्रयोजननिवृत्तिषु) ॥ ८८ ॥

(निपानागमयोस्) तीर्थम् (ऋषिजुष्टजले गुरौ)।

समर्थं (स्त्रिषु शक्तिष्ठे सम्बन्धार्थे हिते ऽपि च) ॥ ८९ ॥

दशमीस्थौ (क्षीणरागहृद्यौ)

वीथी (पदव्यपि)।

(आख्यानीयवचयोः) आख्या

प्रख्यौ (ऽस्त्रीसानुमानयोः) ॥ ९० ॥

इति थान्तवर्गः।

अथ दान्तवर्गः ।

(अभिप्रायवशौ) छन्दाव्

अब्दौ (जीमूतवत्सरौ) ।

अपवादौ (तु निन्दाज्ञे)

दायादौ (सुतबान्धवौ) ॥ ९१ ॥

पादा (रश्मयङ्घ्रितूर्य्यांशाः)

(चन्द्राग्न्यर्काः तमोनुदः) ।

निर्वादौ (जनवादेऽपि)

श्वादौ (जम्बालशष्पयोः) ॥ ९२ ॥

(आराधे रुदिते वातर्ध्वा क्रन्दौ (दारुणे रणे) ।

(स्यात्) प्रसादौ (ऽनुरोधे ऽपि)

सूदः (स्याद्व्यञ्जने ऽपि च) ॥ ९३ ॥

(गोष्ठाध्यक्षे ऽपि) गोविन्दो-

(हर्षे ऽप्या-) मोद (वन्) मदः ।

(प्राधान्ये राजलिङ्गे च वृषाङ्गे) ककुदो-(ऽस्त्रियाम्) ॥९४॥

(स्त्रो) सम्बिज् (ज्ञानसभाषा क्रियाकाराजिनासु) ।

(धर्मे रहस्यु)-पनिषत्

(स्याद्दतौ वत्सरे) भरत् ॥ ९५ ॥

पदं (व्यवसिति त्राणस्थानलक्ष्माङ्घ्रिवस्तुषु) ।

गोष्पदं (सेविते मानं)

(प्रतिष्ठाकृत्यम्) आस्पदम् ॥९६॥

(विष्विष्टमधुरौ) स्वादु

मृदू (चातीक्ष्णोकमलौ) ।

(मूढाल्पापटुनिर्भाग्या) मन्दा (स्युर्)

(द्वौ तु) भारदौ ॥ ९७ ॥

(प्रत्यग्राप्रतिभौ)

(विदत्सुप्रगल्भौ) विशारदौ ।

इति दान्तवर्गः ।

अथ धान्तवर्गः ।

(व्यामो वटश्च) न्यग्रोधाव्

उत्सेधः (काय उन्नतिः) ॥ ९८ ॥

(पर्य्याहारश्च मार्गश्च) विधौ वीवधौ (च तौ) ।

परिधि-(र्यज्ञियतरोः शाखायामुपसूर्य्यके) ॥ ९९ ॥

(बन्धकं व्यसनं चेतः पीड़ाधिष्ठानम्) आधयः ।

(स्युः समर्थननीवाकनियमाश्च) समाधयः ॥ १०० ॥

(दोषोत्पादे)-ऽनुबन्धः (स्यात् प्रकृत्यादिविनश्वरे ।

मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्त्तने) ॥ १०१ ॥

विधु-(र्विष्णौ चन्द्रमसि)

(परिच्छेदे विले) ऽवधिः ।

विधि-(र्विधाने दैवे च)

प्रणिधिः (प्रार्थने चरे) ॥ १०२ ॥

बुधबुद्धौ (पण्डिते ऽपि)

स्कन्धः (समुदये ऽपि च) ।

(देशे नदविशेषे ऽब्धौ) सिन्धु-(र्ना सरिति स्त्रियाम्) ॥१०३॥

विधा (विधौ प्रकारे च)

साधू (रम्ये ऽपि च त्रिषु) ।

वधू-(र्जाया स्नुषा स्त्री च)

सुधा (लेपो ऽमृतं सुद्धी) ॥ १०४ ॥

सन्धा (प्रतिज्ञा मर्य्यादा)

श्रद्धा (सम्प्रत्ययः स्पृहा)।
मधु (मद्ये पुष्परसे क्षौद्रे चा)
ऽन्धं (तमस्यपि) ॥ १०५ ॥
(अतस्विषु)
समुन्नद्धौ (पण्डितम्मन्य-गर्वितौ)।
ब्रह्मबन्धु-(रधिक्षेपे निर्हेये)
(ऽथावलम्बितः) ॥ १०६ ॥
अविदूरो ऽप्य) ऽवष्टब्धः
प्रसिद्धौ (ख्यातभूषितौ)।

इति धान्तवर्गः ।

अथ नान्तवर्गः ।

(सूर्य्यवह्नौ) चित्रभानू
भानू (रश्मिदिवाकरौ) ॥ १०७ ॥
भूतात्मानौ (धाढदेहौ)
(मूर्खनीचौ) पृथग्जनौ ।
ग्रावाणौ (शैलपाषाणौ)
पत्रिणौ (शरपक्षिणौ) ॥ १०८ ॥
(तरुशैलौ) शिखरिणौ
शिखिनौ (वह्निवर्हिणौ)।
प्रतियत्नाव् (उभौ लिप्सोपग्राहाव्)
(अथ) सादिनौ ॥ १०९ ॥
(द्वौ सारथिहयारोहौ)
वाजिनौ (ऽश्वेषु पक्षिणः)।
(कुले ऽप्य) ऽभिजनो (जन्मभूम्यामप्य)
(ऽथ) हायनाः ॥ ११० ॥

(वर्षार्चि व्रीहिभेदाः स्यु-)

(स्यन्द्राम्यर्का) विरोचनाः ॥

(केशे ऽपि) हृजिनो

विश्वकर्मा (ऽर्कसुरशिल्पिनोः) ॥ १११ ॥

आत्मा (यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्मवर्त्म च) ।

(शक्रधातुकमत्तेभवर्षकाब्दा) घनाघनाः ॥ ११२ ॥

अभिमानो (ऽर्थादिदर्पे ज्ञाने प्रणयहिंसयोः) ।

घनो (मेघे मूर्त्तिगुणे त्रिषु मूर्त्ते निरन्तरे) ॥ ११३ ॥

इनः (सूर्ये प्रभौ)

राजा (मृगाङ्के क्षत्रिये नृपे) ।

वाणिन्यौ (नर्त्तकीमत्ते)

(स्रवन्त्यामपि) वाहिनी ॥ ११४ ॥

क्षादिन्यौ (वज्रतड़ितौ)

(बन्दायामपि) कामिनी ।

(त्वग्देहयोरपि) तनुः

सूना (ऽधोजिह्विकापि च) ॥ ११५ ॥

(क्रतुविस्तारयोरस्त्री) वितानं (त्रिषु तुच्छके) ।

(मन्दे)

(ऽथ) केतनं (क्षत्ये केतावुपनिमन्त्रणे) ॥ ११६ ॥

(वेदस्तवं तपो) ब्रह्म

ब्रह्मा (विप्रः प्रजापतिः) ।

(उत्साहने च हिंसायां सूचने चापि) गन्धनम् ॥ ११७ ॥

आतञ्चनं (प्रतीवापजवनाप्यायनार्थकम्) ।

व्यञ्चनं (लाञ्छनं श्मश्रु निष्ठानावयवेष्वपि) ॥ ११८ ॥

(स्यात्) कीलीनं (लोकवाटे युद्धे पञ्चद्विपञ्चिशाम्) ।

(स्याद्) उद्यानं (निःसरणे वनभेदे प्रयोजने) ॥ ११९ ॥

(अवकाशे स्थितौ) स्थानं

(क्रीड़ादावपि) देवनम्।

उत्थानं (पौरुषे तन्त्रे सन्निविष्टोऽङ्गेऽपि च) ॥ १२० ॥

व्युत्थानं (प्रतिरोधे च विरोधाचरणेऽपि च)।

(मारणे मृतसंस्कारे गतौ द्रव्ये ऽर्थदापने ॥ १२१ ॥

निर्वर्त्तनोपकरणानुव्रज्यासु च) साधनम्।

निर्यातनं (वैरशुद्धौ दाने न्यासार्पणे ऽपि च) ॥ १२२ ॥

व्यसनं (विपदि भ्रंशे दोषे कामजकोपजे।

पक्ष्मा (ऽक्षिलोम्नि किञ्जल्के तन्त्वाद्यंशे ऽप्यणीयसि) ॥१२३॥

(तिथिभेदे क्षणे) पर्व

वर्त्म (नेत्रच्छदे ऽध्वनि)।

(अकार्य्य गुह्ये) कौपीने

मैथुनं (सङ्गतौ रते) ॥ १२४ ॥

प्रधानं (परमात्माधीः)

प्रज्ञानं (बुद्धिचिह्नयोः)।

प्रसूनं (पुष्पफलयोः)

निधनं (कुलनाशयोः) ॥ १२५ ॥

क्रन्दने (रोदनाह्वाने)

वर्ष्म (देहप्रमाणयोः)।

(गृहदेहत्विट्प्रभाव) धामन्य

(ऽथ चतुष्पथे ॥ १२६ ॥

सन्निवेशे च) संस्थानं

लक्ष्म (चिह्नप्रधानयोः)।

आच्छादने (सम्पिधानमपवारणमित्युभे) ॥ १२७ ॥

आराधनं (साधने स्यादवासौ तोषणे ऽपि च)।

अधिष्ठानं (चक्रपुरप्रभावाध्यासनेष्वपि) ॥ १२८ ॥

रत्नं (स्वजातिश्रेष्ठे ऽपि)

वने (सलिलकानने)।

तलिनं (विरले स्तोके)

(वाच्यलिङ्गास्त्रयोत्तरे) ॥ १२८ ॥

समानः (सत्समैके स्युः)

पिशुनौ (खलसूचकौ)।

हीनन्यूनाव् (ऊनगर्ह्यौ)

(वेगिशूरौ) तरस्विनौ ॥ १३० ॥

अभिपन्नो (ऽपराद्धो ऽभिग्रस्तव्यापन्नतावपि)।

इति नान्तवर्गः ।

अथ पान्तवर्गः ।

कलापो (भूषणे वर्हे तूणीरे संहते ऽपि च) ॥ १३१ ॥

(परिच्छदे) परीवापः (पर्य्युप्तौ सलिलस्थितौ)।

(गोष्ठगोष्ठपतौ) गोपौ

(हरविष्णु) वृषाकपी ॥ १३२ ॥

वाष्पाव् (उष्माश्रु)

कम्बिपू (वस्त्रमाच्छादनं द्वयम्)।

तल्पं (शय्याट्टदारेषु)

(स्तम्बे ऽपि) विटपौ (ऽस्त्रियाम्) ॥१३३॥

प्राप्तरूपा स्वरूपा ऽभिरूपा (बुधमनोज्ञयोः)।

भेद्यलिङ्गा अमी)

(कूर्मी वीणाभेदश्च कच्छपौ) ॥ १३४ ॥

इति पान्तवर्गः ।

अथ फान्तवर्गः ।

(रवर्णे पुंसि) रेफः (स्यात्कुत्सिते वाच्यलिङ्गकः) ।

इति फान्तवर्गः ।

अथ बान्तवर्गः ।

(अन्तराभवसत्वे ऽस्रे) गन्धर्वो (दिव्यगायने) ॥ १२५ ॥

कम्बु-(र्नो बलये शङ्खे)

द्विजिह्वौ (सर्पसूचकौ) ।

पूर्वो (ऽन्यस्मिन्नः प्रागाह पुम्बद्भुत्वे ऽवि पूर्वजान्) ॥१२६॥

इति बान्तवर्गः ।

अथ भान्तवर्गः ।

कुम्भौ (घटेभमूर्द्धांशौ)

डिम्भौ (तु शिशुवालिशौ) ।

स्तम्भौ (स्थूणाजड़ीभावौ)

शम्भू (ब्रह्मत्रिलोचनौ) ॥ १२७ ॥

(कुक्षिभ्रूणार्भका) गर्भाः

विस्रम्भः (प्रणये ऽपि च) ।

(स्याद्भेर्य्यां) दुन्दुभिः (पुंसि स्यादत्ते) दुन्दुभिः (स्त्रियाम्) १२८

(स्यान्महारजनं क्लीवं) कुसुम्भं (करके पुमान्) ।

(क्षत्रिये ऽपि च) नाभि-(र्नां)

सुरभि-(गवि च स्त्रियाम्) ॥१२९॥

सभा (संसदि सभ्ये च)

(त्रिष्वध्यक्षे ऽपि) वल्लभः ।

इति भान्तवर्गः ।

अथ मान्तवर्गः ।

(किरणप्रग्रहौ) रश्मौ
(कपिभेकौ) भ्रुवङ्गमौ ॥ १४० ॥
(इच्छामनोभवौ) कामौ
(शक्त्युद्योगौ) पराक्रमौ ।
धर्मः (पुण्ययमन्यायस्वभावाचारसोमपाः) ॥ १४१ ॥
(उपायपूर्वं आरम्भ उपधा चाप्यु) पक्रमः ।
(वणिक्पथः पुरं वेदो) निगमो
(नागरो वणिक्) ॥ १४२ ॥
नगमौ (द्वौ)
(बले) रामो (नीलचारुसिते त्रिषु) ।
शब्दादि पूर्वो ह्रस्वेऽपि) ग्रामः
(क्रान्तौ च) विक्रमः ॥ १५ ॥
गुल्मा (रुक्स्तम्बसंनाश्च)
जामिः (स्वसृकुलस्त्रियोः) ।
(क्षितिक्षान्त्योः) क्षमा (युक्ते) क्षमं (शक्ते) हिते त्रिषु ॥ १४४ ॥
(त्रिषु) श्यामौ (हरित्कृष्णौ) श्यामा (स्याच्छारिवानिशा) ।
ललामं (पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु) ॥ १४५ ॥
सूक्ष्म (मध्यात्मम्प्य_)
(आदौ प्रधाने) प्रथम (स्त्रिषु) ।
वामौ (वल्गुप्रतीपौ द्वाव्)
अधमौ (न्यूनकुत्सितौ) ॥ १४६ ॥
(जीर्णं च परिभुक्तं च) यातयाम-(मिदं त्रयम्) ।

इति मान्तवर्गः ।

अथ यान्तवर्गः ।

(तुरङ्ग गरुड़ौ) तार्क्ष्यौ
(निलयापचयौ) क्षयौ ॥ १४७ ॥
श्वशुर्यौ (देवरश्यालौ)
भ्रातृव्या (भ्रातृजद्विषौ) ।
पर्जन्यौ (रसदब्देन्द्रौ)
(स्याद्) अर्घ्यः (स्वामि वैश्ययोः) ॥१४८॥
तिथ्यः (पुण्ये कलियुगे)
पर्य्यायो (ऽवसरे क्रमे) ।
प्रत्ययो (ऽधीनशपथज्ञान विश्वासहेतुषु ॥ १४९ ॥
रम्भे शब्दे)
(ऽथा) ऽनुशयो (दीर्घद्वेषानुतापयोः) ।
स्थूलोच्चय-(स्त्वसाकल्ये गजानां मध्यमे गते) ॥ १५० ॥
समयाः (शपथाचारकालसिद्धान्तसंविदः) ।
(व्यसनान्यशुभं दैवं विपदित्य) ऽनया-(स्त्रयः) ॥ १५१ ॥
अत्ययो (ऽतिक्रमे कृच्छ्रे दोषे दण्डे ऽप्य)
(ऽपापदि ।
युद्धायात्योः) सम्पराय:
पूज्य-(स्तु श्वशुरे ऽपि च) ॥ ५२ ॥
(पश्चादवस्थायिबलं समवायश्च) सञ्चयौ ।
(संघाते सन्निवेशे च) संस्त्याय:
प्रणया-(स्त्वमी ॥ १५२ ॥
विस्रम्भ याञ्चा प्रेमाणो)
(विरोधे ऽपि) समुच्चयः ।
विषयो (यस्य यो ज्ञातस्तत्र शब्दादिकेष्वपि) ॥ १५४ ॥

(निर्य्यासे ऽपि) कषायो (ऽस्त्री)
(सभायाञ्च) प्रतिश्रयः ।
प्रायो (भूम्नान्तगमने)
मन्युः (दैन्ये क्रतौ क्रुधि) ॥ १५५ ॥
(रहस्योपस्थयोः) गुह्यं
सत्यं (शपथतथ्ययोः) ।
वीर्य्यं (बले प्रभावे च)
द्रव्यं (भव्ये गुणाश्रये) ॥ १५६ ॥
धिष्ण्यं (स्थाने गृहे भेग्नौ)
भाग्यं (कर्म्म शुभाशुभम्) ।
(कशेरुहेम्नोः) गाङ्गेयं
विषल्या (दन्तिकापि च) ॥ १५७ ॥
हृषाकपायी (श्रीगौर्य्योः)
अभिख्या (नामशोभयोः) ।
(आरम्भो निष्कृतिः शिक्षा पूजनं सम्प्रधारणम् ॥ १५८ ॥
उपायः कर्म्म चेष्टा च चिकित्सा च नव) क्रियाः ।
छाया (सूर्य्यप्रिया कान्तिः प्रतिबिम्बमनातपः) ॥ १५९ ॥
कक्ष्या (प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने) ।
कृत्या (क्रियादेवतयोस्त्रिषु भेदे धनादिभिः ॥ १६० ॥
जन्यः (स्याज्जनवादे ऽपि)
जघन्यो (ऽन्त्ये ऽधमे) ऽपि च ।
(गर्ह्याधीनौ च) वक्तव्यौ
कल्यौ (सज्जनिरामयौ) ॥ १६१ ॥
(आत्मवाननपेतोर्थाद्) अर्थ्यः
पुण्यं (तु चार्वपि) ।
रूप्यं (प्रशस्तरूपे ऽपि)

वदान्यो (वल्गु वागपि) ॥ १६२ ॥

(न्याय्ये ऽपि) मध्यं

सौम्यं (तु) सुन्दरे (सोमदैवते) ।

इति यान्तवर्गः ।

अथ रान्तवर्गः ।

(निवहापसरौ) वारौ

मंस्तरौ (प्रस्तराध्वरौ) ॥ १६३ ॥

गुरू (गौष्मतिपित्राद्यौ)

द्वापरौ (युगसंशयौ) ।

प्रकारौ (भेदसादृश्याव्)

आकाराव् (इङ्गिताकृती) ॥१६४॥

किंशारू (धान्यशूकेषु)

मरू (धन्वधराधरौ) ।

अद्रयो (द्रुमशैलार्काः)

(स्रोस्तनाब्दौ) पयोधरौ ॥ १६५ ॥

(ध्वान्तारिदानवा) हतारा

(बलिहस्तांशवः) कराः ।

प्रदरा (भङ्गनारीसृग् वाणा)

अस्राः (कचा अपि) ॥ १६६ ॥

(अजातशृङ्गो गौः काले ऽप्यश्मश्रुर्ना च) तूवरः ।

(स्वर्णे ऽपि) राः

परिकरः (पर्य्यङ्कपरिवारयोः) ॥ १६७ ॥

(मुक्ता शुद्धौ च) तारः (स्यात्)

क्षारो (वायौ स तु त्रिषु) ।

(कर्बुरे)
(ऽथ प्रतिज्ञाजिसंविदापत्सु) सङ्गरः ॥ १६८ ॥
(वेदभेदे गुप्तिवादे) मन्त्रो
मित्रो (रवावपि) ।
(मखेषु यूपखण्डे ऽपि) खरुः
(गुह्ये ऽप्य) ऽवस्करः ॥ १६९ ॥
आड़म्बर-(स्तूर्य्यरवे गजेन्द्राणाञ्च गर्ज्जिते) ।
अभिहारो (ऽभियोगे च चौर्य्ये सन्नहने ऽपि च) ॥ १७० ॥
(स्याज्जङ्गमे) परीवारः (खड्गकोशे परिच्छदे) ।
विष्टरो (विटपौ दर्भमुष्टिः पीठाद्यमासनम्) ॥ १७१ ॥
(द्वारि द्वाःस्थे) प्रतीहारः
प्रतीहार्य्य (ऽप्यनन्तरे) ।
(विपुले नकुले विष्णौ) बभ्रुः (स्यात्पिङ्गले त्रिषु) ॥१७२॥
सारो (बले स्थिरांशे च न्याय्ये क्लीवे वरे त्रिषु) ।
दुरोदरो (द्यूतकारे पणे द्यूते) दुरोदरम् ॥ १७३ ॥
(महारण्ये दुर्गपथे) कान्तारः (पुंनपुंसकम्) ।
मत्सरो (ऽन्यशुभद्वेषे तद्वत्क्रपणयोस्त्रिषु) ॥ १७४ ॥
(देवाहूते) वरः (श्रेष्ठे त्रिषु क्लीवे मनाक् प्रिये) ।
(वंशाङ्कुरे) करीरो (ऽस्त्री तरुभेदे घटे च ना) ॥१७५॥
(ना चमूजघने हस्त सूचे) प्रतिसरो (ऽस्त्रियाम्) ।
(यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु ॥ १७६ ॥
शुकाहिकपिभेकेषु) हरि-(र्ना कपिले त्रिषु) ।
शर्करा (कपरांशे ऽपि)
यात्रा (स्याद्यापने गतौ) ॥ १७७ ॥
हरा (भूवाक्सुरासु स्यात्)
तन्द्री (निद्राप्रमीलयोः) ।

घात्री (स्यादुपमातापि क्षितिरप्यामलक्यपि) ॥ १७८ ॥
क्षुद्रा (व्यङ्गा नटी वैश्या सरघा कण्टकारिका) ।
क्षिप्रे क्रूरे ऽधमे ऽल्पे ऽपि) क्षुद्रो
मात्रा (परिच्छदे) ॥ १७९ ॥
(अल्पे च परिमाणे सा) मात्रं (कार्त्स्न्ये ऽवधारणे) ।
(आलेख्यार्थ्ययो)-चित्रं
(कलत्रं श्रोणिभार्य्ययोः) ॥ १८० ॥
(योग्यभाजनयोः) पात्रं
पत्रं (वाहनपक्षयोः) ।
(निदेशग्रन्थयोः) शास्त्रं
शस्त्रम् (आयुधलोहयोः) ॥ १८१ ॥
(स्याज्जटांशुकयोः) नेत्रं
क्षेत्रं (पत्नीशरीरयोः) ।
(मुखाग्रे क्रोड़हलयोः) पोत्रं
गोत्रं (तु नाम्नि च) ॥ १८२ ॥
सत्रम् (आच्छादने यज्ञे सदादाने वने ऽपि च) ।
अजिरं (विषये काये ऽप्य)
ऽम्बरं (व्योम्नि वाससि) ॥१८३॥
चक्रं (राष्ट्रे ऽप्य)
ऽक्षरं (तु मोक्षे ऽपि)
क्षौरम् (अप्सु च) ।
(स्वर्णे ऽपि) भूरिचन्द्रौ (द्वौ)
(द्वारमात्रे ऽपि) गोपुरम् ॥१८४॥
(गुहादभ्रौ) गह्वरे (द्वे)
(रहो ऽन्तिकम्) उपह्वरे ।
(पुरोऽधिकमुपर्य्य) ऽग्राण्य्

(आगारे नगरे) पुरम् ॥१८५॥

मन्दिरं (चा)

(ऽथ) राष्ट्रो (ऽस्त्री विषये स्यादुपद्रवे)।

दरो (ऽस्त्रियां भये खन्ने)

वप्रो (ऽस्त्री क्षीरके पवौ) ॥१८६॥

तन्त्रं (प्रधाने सिद्धान्ते सूत्रवापे परिच्छदे)।

औशीर-(स्यामरे दण्डे) ऽप्यौ (शीरं शयनासने) ॥१८७॥

पुष्करं (करिहस्ताग्रे वाद्यभाण्डमुखे जले)।

(व्योम्नि खड्गफले पद्मे तीर्थौषधिविशेषयोः) ॥ १८८ ॥

अन्तरम् (अवकाशावधिपरिधानान्तर्भिदतादर्थ्ये)।

छिद्रात्मीयविनावहिरवसरमध्ये ऽन्तरात्मनि च) ॥ १८९ ॥

(मुस्ते ऽपि) पिठरं

(राजकञ्चेरुण्यपि) नागरम्।

शार्वरं (त्वन्धतमसे घातुके भेद्यलिङ्गकः) ॥ १९० ॥

गौरो (ऽरुणे सिते पीते)

(व्रणकार्ये ऽप्य) ऽरुष्करः।

जठरः (कठिने ऽपि स्यात्)

(अधस्तादपि चा) ऽधरः ॥१९१॥

(अनाकुले ऽपि चै)-काग्रो

व्यग्रो (व्यासक्त आकुले)।

(उपर्य्युदीच्यश्रेष्ठेष्वप्यु)-त्तरः (स्याद्)

अनुत्तरः ॥ १९२ ॥

(एषां विपर्य्यये श्रेष्ठे)

(दरानाल्पोत्तमाः) पराः।

(स्वादुप्रियौ तु) मधुरौ

क्रूरौ (कठिननिर्दयौ) ॥ १९३ ॥

उदारो (दातृमहतोः)

इतर-(स्वल्पनीचयोः) ।

(मन्दस्वच्छन्दयोः) स्वैरः

शुभ्रम् (उद्दीप्तशुक्लयोः) ॥ १९४ ॥

इति रान्तवर्गः ।

अथ लान्तवर्गः ।

(चूड़ाकिरीटं केशाश्च संयता) मौलय-(स्त्रयः) ।

(द्रुमप्रभेदमातङ्ग काण्डपुष्पाणि) पीलवः ॥ १९५ ॥

(कृतान्तानेहसोः) काल-

(चतुर्थेऽपि युगे) कलिः ।

(स्यात्कुरङ्गेऽपि) कमलः

(प्रावारेऽपि च) कम्बलः ॥ १९६ ॥

(करोपहारयोः पुंसि) बलिः (प्राण्यङ्गजे स्त्रियाम्) ।

(स्थौल्यसामर्थ्यसैन्येषु) बलं (ना काकसौरिणोः) ॥१९७॥

वातूलः (पुंसि वात्यायामपि वातसहे त्रिषु) ।

(भेद्यलिङ्गः षठे) व्यालः पुंसि श्वापदसर्पयोः) ॥ १९८ ॥

मलो (ऽस्त्री पापविट्किट्टान्य)

(ऽस्त्री) शूलं (रुगायुधम्) ।

(शङ्कावपि द्वयोः) कीलः

पालिः (स्त्र्यस्रावङ्कपंक्तिषु) ॥ १९९ ॥

कला (शिल्पे कालभेदे ऽप्य्)

आली (सख्यावली अपि) ।

(अब्धाम्बुविक्लवौ) बेला (कालमर्य्यादयोरपि) ॥२००॥

बहुलाः (कृत्तिका गावो) बहुलो (ऽग्निः शिवौ त्रिषु) ।

लीला (विलासक्रिययोः)

उपला (शर्करापि च) ॥ २०१ ॥

(शोणिते ऽम्भसि) कोलालं

मूलम् (आद्ये शिफाभयोः) ।

जालं (समूह आनाये गवाक्षद्वारकावपि) ॥ २०२ ॥

शीलं (स्वभावे सद्वृत्ते)

(शस्ये हेतुकृते) फलम् ।

(छदिर्नेत्ररुजोः क्लीवं समूहे) पटलं (न ना) ॥ २०३ ॥

(अधःस्वरूपयोरस्त्री) तलं

(स्याद्वामिषे) पलम् ।

(और्वानले ऽपि) पातालं

चेलं (वस्त्रे ऽधमे त्रिषु) ॥ २०४ ॥

कुकूलं (भस्मभिः कीर्णे खभ्रे ना तु तुषामले) ।

(निर्णीते) केवलम् (इति त्रिलिङ्गं त्वेकशकृत्स्नयोः) ॥२०५॥

(पर्य्याप्तिक्षेमपुण्येषु) कुशलं (शिक्षिते त्रिषु) ।

प्रवालम् (अङ्कुरे ऽप्यस्त्री)

(त्रिषु) स्थूलं (जड़ेऽपि च) ॥ २०६ ॥

करालो (दन्तुरे तुङ्गे)

(चारौ दत्ते च) पेशलः ।

(मूर्खे ऽर्भके बालः स्यात्)

लोल (श्वलसतृष्णयोः) ॥ २०७ ॥

इति लान्तवर्गः ।

अथ वान्तवर्गः ।

दवदावौ (वनारण्यवह्नी)

(जन्यहरौ) भवौ ।

(मन्त्री सहायः) सचिवौ

(पतिग्राखिनरा) धवाः ॥ २०८ ॥

अवयः (शैलमेषार्कौ)

(आघ्राद्यानाध्वरा) हवाः ।

भावः (सत्वस्वभावाभिप्रायचेष्टात्मजन्मसु) ॥ २०९ ॥

(स्यादुत्पत्तौ फले पुष्पे) प्रसवो (गर्भमोचने) ।

(अविश्वासे ऽपङ्क्तवे ऽपि निह्नतावपि) निह्नवः ॥ २१० ॥

(उत्सेकामर्षयोरिच्छा प्रसवे मह) उत्सवः ।

अनुभावः (प्रभावे स्यात् सताञ्च मतिनिश्चये) ॥ २११ ॥

(स्याज्जन्महेतुः) प्रभवः (स्थानं चाद्योपलब्धये) ।

(शूद्रायां विप्रतनये शस्त्रे पारशवः (पुमान्) ॥ २१२ ॥

भ्रुवौ (भमेदे क्लीवं तु निश्चिते शाश्वते त्रिषु) ।

स्वौ (ज्ञातावात्मनि स्वं (त्रिष्वात्मीये) स्वो (ऽस्त्रियां धने)२१३

(स्वौकटीवस्त्रबन्धे ऽपि) नीवी (परिपणे ऽपि च) ।

शिवा (गौरीफेरवयोः)

द्वन्द्वं (कलहयुग्मयोः) ॥ २१४ ॥

(द्रव्यासुव्यवसायेषु) सत्वम् (अस्त्री तु जन्तुषु) ।

क्लीवं (नपुंसके षण्ढे वाच्यलिङ्गमविक्रमे) ॥ २१५ ॥

इति वान्तवर्गः ।

अथ शान्तवर्गः ।

द्वौ (विशौ वैश्यमनुजौ)

(द्वौ चराभिमरौ) स्मरौ ।

(द्वौ) राशी (पुञ्जमेषाद्यौ)

(द्वौ) वंशौ (कुलमस्करौ) ॥ २१६ ॥

(रहः प्रकाशौ) वीकाशौ

निवेशो (भृतिभोगयोः)।

(कृतान्ते पुंसि) कीनाशः क्षुद्रकर्षकयोस्त्रिषु) ॥ २१७ ॥

(पदे लक्ष्ये निमित्ते) ऽपदेशः

(स्यात्) कुशम् (अम्बु च)।

दशा-(वस्थानेकविधाप्यू)

आशा (तृष्णापि चायता) ॥ २१८ ॥

वशा (स्त्री करिणी च स्याद्)

दृग् (ज्ञाने ज्ञातरि त्रिषु)।

(स्यात्) कर्कशः (साहसिकः कठोरामर्षणावपि) ॥ २१९ ॥

प्रकाशो (ऽतिप्रसिद्धे ऽपि)

(शिशावज्ञे च) बालिशः ।

इति शान्तवर्गः ।

अथ षान्तवर्गः ।

(सुरमर्त्यावू अनिमिषौ)

पुरुषाव् (आत्ममानवौ) ॥ २२० ॥

(काकमर्त्यात् खगौ ध्वांक्षौ

कक्षौ (तु तृणवीरुधौ)।

अभीषुः (प्रग्रहे रश्मौ)

प्रैषः (प्रेषणमर्हणे) ॥ २२१ ॥

पक्षः (सहाये ऽप्यू)

उष्णीषः (शिरोवेष्टकिरीटयोः)।

(शुक्रले मूषिके श्रेष्ठे सुकृते वृषभे) वृषः ॥ २२२ ॥

कोषो (ऽस्त्री कुड्मले खड्गपिधाने ऽर्थौषधिद्रव्ययोः)।

(द्यूते ऽक्षे सारिफलके ऽप्य्) आकर्षो
(ऽथा) ऽक्षम् (इन्द्रिये) ॥ २२३ ॥
(नाद्यूताङ्गे कर्षचक्रे व्यवहारे कलिद्रुमे)।
कर्षू-(वार्त्ता करीषाग्निः) कर्षः (कुल्याभिधायिनी) ॥२२४॥
(पुम्भावे तत् क्रियायाश्च) पौरुषं
विषम् (अप्सु च)।
(उपदानि ऽप्य्) आमिषं (स्यात्)
(अपराधे ऽपि) किल्बिषम् ॥ २२५ ॥
(स्याद्दृष्टौ लोकधात्वंशे वत्सरे) वर्षम् (अस्त्रियाम्)।
प्रेक्षा (नृत्ये क्षणं प्रज्ञा
भिक्षा (सेवा ऽर्थना भृतिः) ॥ २२६ ॥
त्विट् (शोभा ऽपि)
(त्विषु परे)
न्यक्षं (कार्त्स्न्यानिक्षृष्टयोः)।
(प्रत्यक्षे ऽधिक्षते) ऽध्यक्षो
कक्ष-(स्वप्रेम्नाचिक्कणे) ॥ २२७ ॥

इति षान्तवर्गः ।

अथ सान्तवर्गः ।

(रविश्वेतच्छदौ) हंसौ
(सूर्य्यवह्नी) विभावसू ।
बल्सौ (तर्णकवर्षौ द्वौ)
(सारङ्गाश्च) दिवौकसः ॥ २२८ ॥
(शृङ्गारादौ विषे वीर्य्ये गुणे रागे द्रवे) रसः ।
(पुंस्य्) उत्तंसा ऽवतंसौ (द्वौ कर्णपूरे ऽपि शेखरे) ॥ २२९ ॥

(देवभेदे ऽनले रश्मौ) वसू (रत्ने धने) वसु ।

(विष्णौ च) वेधाः

(स्त्रीत्वा) श्री (श्रीर्हिताग्नंसा ऽहिदंष्ट्रयोः) ॥२३०।

लालसे (प्रार्थनोत्सुक्ये)

हिंसा (चौर्य्यादिकर्म्म च) ।

प्रसू-(रश्मापि)

(भूद्यावौ) रोदस्यौ रोदसी (च ते) ॥ २३१ ॥

(ज्वालाभासोर्नपुंस्य) ऽर्चिः

ज्योतिः (भद्योतदृष्टिषु) ।

(पापापराधयोः) आगः

(खगबाल्यादिनोः) वयः ॥ २३२ ॥

(तेजः पुरीषयोः वर्चो)

मह-(स्तूत्सवतेजसोः) ।

रजो (गुणे स्त्रीपुष्पे च)

(राहौ ध्वान्ते गुणे) तमः ॥ २३३ ॥

छन्दः (पद्ये ऽभिलाषे च)

तपः (कृच्छ्रादिकर्म च) ।

सहो (बलं) सहा (मार्गे)

नभः (खं श्रावणे) नभाः ॥ २३४ ॥

ओकः (सद्माश्रयश्चौ) कां:

पयः (क्षीरं) पयो (ऽम्बु च) ।

ओजो (दीप्तौ बले)

स्रोत (इन्द्रिये निम्नगारये) ॥ २३५ ॥

तेजः (प्रभावे दीप्तौ च बले शुक्रेऽप्य)

(ऽस्त्रिषु) ।

विद्वान् (विदंश्च)

बीभत्सौ (हिंस्रो ऽप्य्)
(अतिशये त्वमी) ॥ २३६ ॥
(हृद्यप्रशस्ययोः) ज्यायान्
कनीयांस्तु (युवाल्पयोः) ।
वरीयां-(स्तूत्तरयोः)
साधीयान् (साधुवाढ़यो:) ॥ २३७ ॥

इति क्षान्तवर्गः ।

अथ ह्रान्तवर्गः ।

(दर्ले ऽपि) वर्ह
(निर्बन्धोपरागार्कादयो) ग्रहाः ।
(हार्य्यापौड़े क्वाथरसे) निर्यूहो (नागदन्तके) ॥ २३८ ॥
(तुलासूत्रे ऽखादिरश्मौ) प्रग्राहः प्रग्रहो (ऽपि च) ।
(पत्नीपरिजनादानमूलशापाः) परिग्रहाः ॥ २३९ ॥
(दारेष्वपि) गृह्याः
(श्रोणयामप्या) रोहो (वरस्त्रियाः) ।
व्यूहो (द्वन्द्वे ऽप्य्)
अहि-(र्द्वंते ऽप्य्)
(अग्नीन्धर्का)-स्तमोपहाः ॥ २४० ॥
(परिच्छदे नृपार्हे ऽऽर्घे) परिबर्हो
(व्ययाः परे) ।

इति ह्रान्तवर्गः ।

अथ अव्यय नानार्थवर्गः ।

आङ् (ईषदर्थे ऽभिव्याप्तौ सीमार्थे धातुयोगजे) ।
आ (प्रगृह्य स्मृतौ वाक्ये ऽप्य्)
आ (स्तु स्याल्कोपपीड़योः) ॥ १ ॥
(पापकुत्सेषदर्थे) कु
धिङ् (निर्भर्त्सननिन्दयोः) ।
चा (ऽन्वाचये समाहारेतरेतरसमुच्चये) ॥ २ ॥
स्वस्त्या (शौः क्षेमपुण्यादौ)
प्रकर्षे लङ्घने ऽप्य) ऽति ।
स्वित् (प्रश्ने च वितर्के च)
तु (स्याद्वेदे ऽवधारणे ॥ ३ ॥
सकृत् (सङ्कैकवारे स्यात्)
आराद् (दूरसमीपयोः) ।
(प्रतीच्यां चरमे) पश्चाद्
उता-(प्यर्थविकल्पयोः) ॥ ४ ॥
(पुनः सदार्थयोः) शश्वत्
साक्षात् (प्रत्यक्षतुल्ययोः) ।
(खेदानुकम्पासन्तोषविस्मयामन्त्रणे) वत ॥ ५ ॥
हन्त (हर्षे ऽनुकम्पायां वाक्यारम्भविषादयोः) ।
प्रति (प्रतिनिधौ वीप्सालक्षणादौ प्रयोगतः) ॥ ६ ॥
इति (हेतुप्रकरणप्रकर्षादिसमाप्तिषु) ।
(प्राच्यां) पुरस्तात् (प्रथमे पुरार्थे ऽग्रत इत्यपि) ॥ ७ ॥
यावत् तावत् (च साकल्ये ऽवधौ माने ऽवधारणे) ।
(मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्व) थो अथ ॥ ८ ॥
हेथा (निरर्थकाविध्योः)
नाना (ऽनेकोभयार्थयोः) ।

नु (पृच्छायां विकल्पे च)

(पश्चात्साद्गुण्ययोः) अनु ॥ ८ ॥

(प्रस्तावधारणानुज्ञा ऽनुनयामन्त्रणे) ननु ।

(गर्हासमुच्चयप्रश्नशङ्कासम्भावनासु) ऽपि ॥ १० ॥

(उपमायां विकल्पे) वा

सामि (ऽर्द्धे जुगुप्सने) ।

अमा (सह समीपे च)

कम् (वारिणि च मूर्द्धि च) ॥ ११ ॥

(इवेत्यमर्थयोः) एवं

नूनं (तर्के ऽर्थनिश्चये) ।

(तूष्णीमर्थे सुखे) ओषं

किम् (पृच्छायां जुगुप्सने) ॥ १२ ॥

नाम (प्रकाश्यसम्भाव्यक्रोधोपगमकुत्सने) ।

अलम् (भूषणपर्य्याप्तिशक्तिवारणवाचकम्) ॥ १३ ॥

ह्रम् (वितर्के परिप्रश्ने)

समया (ऽन्तिकमध्ययोः) ।

पुनः (अप्रथमे भेदे)

निर् (निश्चयनिषेधयोः) ॥ १४ ॥

(स्यात्प्रबन्धे चिरातीते (निकटागामिके) पुरा ।

ऊर्य्यूरौ (धो) ररौ (च विस्तारे ऽङ्गीकृतौ क्षयम्) ॥१५॥

(स्वर्गे परे च लोके) स्वर्

(वार्त्तासम्भाव्ययोः) किल ।

(निषेधवाक्यालङ्कारजिज्ञासानुनये) खलु ॥ १६ ॥

(समीपोभयतः शीघ्रस्वाकूतस्वाभिमुख्ये) ऽभितः ।

(नामप्रकाश्ययोः) प्रादुः

मिथो (ऽन्योऽन्यं रहस्यपि) ॥ १७ ॥

तिरो (ऽन्तर्धौ तिर्य्यगर्थे
ह्वा (विषादप्रश्नगर्हासु) ।
अहहे-(त्यद्भुते खेदे)
हि (हेताववधारणे) ॥ १८ ॥

इति अव्ययनानार्थवर्गः ।

अथ अव्ययवर्गः ।

चिराय चिररात्राय चिरस्या-(द्या स्थिरार्थकाः) ।
मुहुः पुनःपुनः शश्वदभीक्ष्णमसकृत् (समाः) ॥ १ ॥
द्राग्झटित्यञ्जसा ऽङ्क्षाय सपदि द्राङ् मंक्षु (च द्रुते) ।
बलवत् सुष्ठु किमुत स्व ऽत्यतीव (च निर्भरे) ॥ २ ॥
पृथग्विना (ऽन्तरेणर्ते हिरुङ्नाना (च वर्जने) ।
यत्तद्यतस्ततो (हेतौ)
(असाकल्ये तु) चिच्चन ॥ ३ ॥
कदाचिज्जातु
सार्द्धं (तु) साकं सत्रा समं सह ।
(आनुकूल्यार्थकं) प्राध्वं
(व्यर्थके तु) वृथा मुधा ॥ ४ ॥
आहो उताहो किमुत (विकल्पे) किं किमूत च ।
तु हि च स्म ह वै (पादपूरणे)
(पूजने) खलु ॥ ५ ॥
दिवा (क्रीत्य)
(ऽह्य) दोषा (च) नक्तं (च रजनाविति) ।
(तिर्य्यगर्थे) साचि तिरो (ऽप्य)
(ऽथ सम्बोधनार्थकाः ॥ ६ ॥

स्युः) प्याट् पाडङ्ग है हे भोः

समया निकषा हिरुक् ।

(अतर्किते तु) सहसा

(स्यात्) पुरः पुरतो ऽग्रतः ॥ ७ ॥

स्वाहा (देवहविर्दाने) ओषड् वौषड् वषट् स्वधा ।

किञ्चिदीषन्मनाग्-(अल्पे)

प्रेत्या ऽमुत्र (भवान्तरे) ॥ ८ ॥

वृद्धा यथातथैवैवं (साम्ये)

ऽहो हो (च विस्मये) ।

(मौने तु) तूष्णीं तूष्णीकां

सद्यस् सपदि (तत्क्षणे) ॥ ९ ॥

दिष्ट्याश्रमुपजोषं (चेत्यानन्दे)

(ऽथा-) ऽन्तरे ऽन्तरा ।

अन्तरेण (च मध्ये स्युः)

प्रसह्य (तु हठार्थकम्) ॥ १० ॥

(युक्ते हे) साम्प्रतं स्थाने

ऽभीक्ष्णं शश्वद्-(अनारते) ।

(अभावे) न ह्य नो ना (ऽपि)

मास्म मा ऽलं (च वारणे) ॥ ११ ॥

(पक्षान्तरे) चेद्यदि (च)

(तत्वेत्व)-ऽङ्गा ऽञ्जसा (ह्ययम्) ।

(प्राकाश्ये) प्रादुराविः (स्यात्)

ओमित्वं परमं (मते) ॥ १२ ॥

समन्तत-(स्तु) परितः सर्वतोविष्वग् (ह्यपि) ।

(अकामानुमतौ) कामम्

(असूयोपगमे) ऽस्तु (च) ॥१३॥

ननु च (स्याद्विरोधोक्तौ)
कश्चित् (कामप्रवेदने)।
निःषमन्दुःषमं (गर्ह्ये)
यथास्वं (तु) यथायथम् ॥ १४ ॥
मृषा मिथ्या (च वितथे)
यथार्थं (तु) यथायथम्।
(स्युः) एवं तु पुनर्वे वे-(त्यवधारणवाचकाः) ॥ १५ ॥
प्राग् (अतीतार्थकं)
नूनमवश्यं (निश्चये ऽयम्)।
संवद् (वर्षे)
(ऽवरे त्व-) ऽर्वाग्
आमेवं
स्वयम् (आत्मना) ॥ १६ ॥
(अल्पे) नीचैः
(महत्यु)-च्चैः
प्रायो (भूम्नि-)
(ऽन्ते) मनैः।
सना (नित्ये)
बहिः (बाह्ये)
सा (ऽतीते)
ऽस्तम्-(अदर्शने) ॥ १७ ॥
अस्ति (सत्वे)
(सम्बोधने) -ऊम्
ऽहं (प्रश्ने)
(ऽनुनयेत्व-) ऽयि।
हं (तर्के स्यात्)

उषा (रात्रेरवसाने)

नमो (नतौ) ॥ १८ ॥

(पुनरर्थे) ऽङ्ग

(निन्दायां) दुष्टं

सुष्ठु (प्रशंसने) ।

सायं (सायो)

प्रगे प्रातः (प्रभाते)

निकषा (ऽन्तिके) ॥ १९ ॥

परुत्परार्य्यैषमो-(ऽब्दे पूर्वे पूर्वतरे यति) ।

अद्या-(ऽत्राह्नि-)

(ऽथ पूर्वेऽह्नीत्यादौ पूर्वोत्तरापरात्) ॥ २० ॥

(तथा ऽधरा ऽन्या ऽन्यतरेतरात्) पूर्वेद्युः (आदयः) ।

उभयद्यु-(यो)-भयेद्युः

(परे त्वह्नि) परेद्यवि ॥ २१ ॥

द्यो (गते)

(ऽनागते ऽह्नि) श्वः

परश्व-(स्त्यरे ऽह्नि) ।

सदा तदानीं

युगपदेकदा

सर्वदा सदा ॥ २२ ॥

एतर्हि सम्प्रतीदानीमधुना साम्प्रतं (तथा) ।

(दिग्देशकाले पूर्वादौ) प्रागुदक्प्रत्यग्-(आदयः) ॥२३॥

इति अव्ययवर्गः ।

अथ लिङ्गादिसंग्रहवर्गः ।

सलिङ्गघास्त्रैः सत्त्वादिकृत्तद्धितसमासजैः ।
अनुक्तैः संग्रहो लिङ्गं सङ्कीर्णवदिहोच्यते ॥ १ ॥
लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यवाधितः ।
स्त्रियामौदूदिरामैका सयोनिप्राणिनाम च ॥ २ ॥
नाम विद्युन्निशावल्लौ वीणादिगम्भूनदौक्षियाम् ।
अदन्तैर्द्विगुरेकार्थो न च पात्रयुगादिभिः ॥ ३ ॥
तल्लुन्दे ये निकळ्यत्रा वैरमैथुनकादिवुत् ।
स्त्रीभावादावनिञ्क्तिन्णुन्णच् क्यपोयुजिञङ्न्यग्राः ॥ ४ ॥
उणादिषु निरूरोश्च ञ्नाबुङन्तं चरं स्थिरम् ।
तत्क्रीड़ायां प्रहरणं चेन्नौष्टा पाल्लवा णदिक् ॥ ५ ॥
घञोजः साक्रियास्यां चेद्दाण्डपाता हि फाल्गुनी ।
श्येनम्पाता हि मृगया तैलम्पाता स्वधति दिक् ॥ ६ ॥
स्त्रीस्यात् काचिन्मृणाल्यादिर्विवक्षा ऽपचये यदि ।
लङ्का शेफालिका टीका धातकी पञ्चिकाढ़की ॥ ७ ॥
मिध्रका सारिका ह्रिका प्राचिकोल्का पिपीलिका ।
तिन्दुको कणिका भङ्गिः सुरङ्गा सूचि माढ़यः ॥ ८ ॥
पिच्छावितण्डाकाकिण्यश्चूर्णिः शाखी द्रुणी दरत् ।
साति कन्या (तथा) सन्दी नाभी राजसभा-(ऽपि च) ॥९॥
झल्लरी चर्चरी पारी होरा लट्वा (च) सिध्मला ।
लाक्षा लिक्षा (च) गण्डूषा गृध्रसी चमसौ मसौ ॥ १० ॥
पुंस्त्वे सभेदानुचराः सपर्य्यायाः सुरासुराः ।
स्वर्गयागादिमेधाब्धिद्रुकालासिधरारयः ॥ ११ ॥
करगण्डौष्ठदोर्दण्डकण्ठकेशनखस्तनाः ॥
अङ्गाहान्ताः

खेड़भेदा

रान्तान्ताः प्रागसंख्यकाः ॥ १२ ॥

श्वीवेष्टाद्यास्च निर्यासा

असन्नन्ता अबाधिताः ।

कशेरु जतुवस्तूनि ह्रिवा तुरुविरामकाः ॥ १३ ॥

क ष ण भ मरोपान्ता यद्यदन्ता अमी अथ ।

प थ न य स टोपान्ता

गोवाख्याः

चरणाह्वयाः ॥ १४ ॥

नाम्नयकर्त्तरि भावे च घ ञ ज प न ङ् ण घाश्चुचः ।

ख्यः कर्त्तरीममिज्भावे को घोः किः प्रादितो ऽन्यतः ॥१५॥

द्वन्द्वेऽखवड़वावखवड़वा न समाहृते ।

कान्तः सूर्येन्दुपर्य्यायपूर्वो ऽयःपूर्वको ऽपि च ॥ १६ ॥

वटकः (खा-) ऽनुवाक-(श्च) रल्लक-(श्च) कुटङ्गकः ।

पुङ्गो न्यङ्कः समुद्ग-(श्च) विटपट्टघटाः खटः ॥ १७ ॥

कोट्टारघट्टहट्टा-(श्च) पिण्डगोण्डचिपिण्ड (वत्) ।

गड़ः करण्डो लगुड़ो वरण्ड-(श्च) किणो घुणः ॥ १८ ॥

ट्टति सीमन्त हरितोरोमन्योद्भौथबुद्बुदाः ।

कासमर्दो ऽर्बुदः कुन्दस्फेनस्तूपौ (स) यूपकौ ॥ १९ ॥

आतपः (चन्द्रिये) नाभि कुणप क्षुरकेदराः ।

पूरक्षुरप्रक्षुक्का-(श्च) गोल ह्रिङ्गुलपुङ्गलाः ॥ २० ॥

वेताल मल्लभल्ला-(श्च) पुरोडाशो-(ऽपि) पट्टिशः ।

कुल्माषो रभस (श्चैव स) कटाहः पतद्ग्रहः ॥ २१ ॥

हिहीने ऽन्यच्च खारण्यपर्ण स्वभ्रहिमोदकम् ।

शीतोष्णमांसरुधिरमुखाच्छिद्रविषम्बलम् ॥ २२ ॥

फलहेमशुल्वलोह सुखदुःखशुभाशुभम् ।

जलपुष्पाणि लवणं व्यञ्जनान्यनुलेपनम् ॥ २३ ॥
कोट्यां: शतादिसंख्यान्यावालक्षान्नियुतं च तत् ।
यच्चक्रमसिसुसन्नन्तं
यदनान्तमकर्त्तरि ॥ २४ ॥
यान्तं सलोपधं शिष्टं
रात्रम्प्राक् संख्ययान्वितम् ।
पाचाद्यन्तैरनेकार्थां द्विगुर्लक्ष्यानुसारतः ॥ २५ ॥
इन्द्वैकत्वाव्ययीभावौ
पथः संख्याव्ययात्परः ।
षष्ठ्यास्छायाबहुनाञ्चेदिच्छार्थं
संहतौ सभा ॥ २६ ॥
शालार्थापि परारीजा ऽमनुष्यार्थादराजकात् ।
दासीसभं नृपसभं सभमिमा दिशः ॥ २७ ॥
उपज्ञोपक्रमान्तस्य तदादित्वप्रकाशने ।
कीपज्ञं कीपक्रमादि
कन्योशीनरनामसु ॥ २८ ॥
भावेनण कचिन्नञो ऽन्ये समूहे भावकर्मणोः ।
अदन्तप्रत्ययाः
पूर्वसूदिनाभ्यां त्वहःपरः ॥ २९ ॥
क्रियाव्ययानां भेदकान्येकत्वे ऽप्य-
उक्थतीटके ।
पोचं पिच्छं गृहस्थूर्णं तिरीटं मर्मयोजने ॥ ३० ॥
राजसूयं वाजपेयं गद्यपद्ये (क्रतौ कवेः) ।
माणिक्यभाष्यसिन्दूरचीरचीवरपञ्जरम् ॥ ३१ ॥
लोकायतं हरितालं विदलं स्यालवाङ्कवम् ।
(पुंनपुंसकयोः) शेषो ऽर्बुदंपिण्याककण्टकाः ॥ ३२ ॥

मोदकस्तण्डकष्टङ्कः शाटकः कर्वटो ऽर्बुदः ।
पातको द्योगचरकतमाला ऽमलका नडः ॥ २२ ॥
कुष्ठं मुण्डं शौधुवस्तं च्छेड़ितं चेमकुट्टिमम् ।
सङ्क्रमं शतमाना ऽर्मं शम्बला ऽव्ययताण्डवम् ॥ २४ ॥
कविय कन्दकार्पासं पारा ऽवारं युगन्धरम् ।
यूपं प्रयीवपात्नीये यूषं चमसचिक्कसौ ॥ २५ ॥
अर्हचार्दौ घृतादीनां पुंस्त्वाद्यं वैदिकं ध्रुवम् ।
तन्त्रोक्तमिह लोके ऽपि तच्छेदस्त्यस्तु शेषवत् ॥ २६ ॥
स्त्रीपुंसयोरपत्याद्या
द्विचतुःषट्पदोरगाः ॥

जातिभेदाः

पुमाख्याश्च स्त्रीयोगः सच्च
मल्लकः ॥ २७ ॥

मुनिर्वराटकः स्त्रातिर्वर्णको जाटलिर्मनुः ।
मूषा स्रपाटो कर्कन्धुर्यष्टिः शाटी कटी कुटिः ॥ २८ ॥
स्त्रीनपुंसकयोर्भावक्रिययोः ष्यञ्क्वचिच्च वुञ् ।
औचित्यमौचितो मैत्री मैत्रं वुञ् प्रागुदाहृतः ॥ २९ ॥
षष्ठ्यन्त प्राक्पदा सेना छायाशालासुरानिशाः ।
स्याद्वान्तसेन श्वनिशङ्कोशालमितरे च दिक् ॥ ४० ॥
आवन्तान्तरपदौ द्विगुश्चापुंसि नञ्च लुप् ।
त्रिखट्वश्च त्रिखट्वी च त्रितच्च त्रितच्यपि ॥ ४१ ॥
(त्रिषु) पात्री पुटी वाटी पेटी कुवलदाड़िमौ ।
परिलिङ्गं स्वप्रधाने द्वन्द्वे तत्पुरुषे ऽपि तत् ॥ ४२ ॥
अर्थाभ्ताः प्राग्वलं प्राप्तापन्नपूर्वाः परोपगाः ।
तद्धितार्थो द्विगुः
संख्या सर्वनाम तदन्तकाः ॥ ४३ ॥

बहुव्रीहिरदिङ्नाम्ना मुन्नेया तदुदाहृतिः ।
गुणद्रव्यक्रियायोगोपाधयः परगामिनः ॥ ४४ ॥
कृतः कर्त्तव्यसंज्ञायां कृत्या वर्त्तरि कर्म्मणि ।
अनाद्यन्तास्तेनरक्ताद्यर्थे नानार्थभेदकाः ॥ ४५ ॥
षट्संज्ञकास्त्रिषु समायुष्मदस्मत्तिङव्ययम् ।
परं विरोधे शेषं तु ज्ञेयं शिष्टप्रयोगतः ॥ ४६ ॥

इत्यमरसिंहकृतौ नामलिङ्गानुशासने ।
सामान्यस्तृतीयः काण्डः साङ्ग एव समर्थितः ॥

समाप्तः ।